Vol. XVI, No. 2] [July, 1974

# पुराणम्

# PURĀṆA

( Half-yearly Bulletin of the Purāṇa-Department )

*With the financial assistance from the Ministry of Education, Government of India*

## VYĀSA-PŪRṆIMĀ NUMBER

आत्मा पुराणं वेदानाम्

ALL-INDIA KASHIRAJ TRUST
FORT, RAMNAGAR, VARANASI

Annual Subs.—Inland Rs. 18 Foreign £ 1.50

## सम्पादक-मण्डल

पद्मभूषण पण्डितराज श्री राजेश्वरशास्त्री द्रविड ;
अध्यक्ष, साङ्गवेद विद्यालय, रामघाट, वाराणसी ।

पद्मभूषण डा० वे० राघवन्, एम० ए०, पी-एच० डी० ;
भू० पू० अध्यक्ष, संस्कृत विभाग, मद्रास विश्वविद्यालय, मद्रास।

डा० लुडविक स्टर्नबाख, एल-एल० डी०;
प्रोफेसर, भारतीय विद्या,
पेरिस विश्वविद्यालय, पेरिस (सोरबोने)।

श्री आनन्दस्वरूप गुप्त, एम० ए०, शास्त्री ; उपनिदेशक,
पुराण-विभाग, सर्वभारतीय काशिराजन्यास,
फोर्ट रामनगर, वाराणसी ।

## EDITORIAL BOARD

Padma-Bhushan Paṇḍita-rāja Śrī Rājeśvara Śāstrī Draviḍa;
Principal, Sāṅga-Veda-Vidyālaya, Varanasi.

Padma-Bhushan Dr. V. Raghavan, M. A., Ph. D.;
Rtd. Professor and Head of the Sanskrit Dept.,
Madras University, Madras.

Dr. Ludwik Sternbach, LL. D., Prof. of Indology,
University of Paris, Paris (Sorbonne).

Shri Anand Swarup Gupta, M. A., Shastri; Asstt. Director,
Purāṇa-Dept., All-India Kashiraj Trust. (*Editor-in-Charge*)


---

लेखकमहोदयैः प्रकटीकृता विचारास्तेषामेव स्वायत्ताः,
न पुनस्ते सम्पादकान् न्यासं च निबध्नन्ति

Authors are responsible for their views, which do not bind the Editors and the Trust.

Authors are requested to use standard system of transliteration and phonetic spellings when writing Sanskrit words in Roman letters. They are also requested to preferrably use Devanāgarī letters for Sanskrit ślokas and prose passages.

## पुराणम्—PURĀṆA

Vol. XVI., No. 2] व्यासपूर्णिमाऽङ्कः [July 4, 1974

लेखसूची—Contents

| | | Pages |
|---|---|---|
| 1. | व्यासप्रशस्तिः (Compiled from *Stotramahodadhi* By *Pt. Madhvacharya Adya*) | 135-136 |
| 2. | रैभ्यमुनिकृता गदाधरस्तुतिः [Eulogy of Gadādhara by sage Raibhya] With notes By *Sri A. S. Gupta* | 137-138 |
| 3. | Pratyabhijñā Philosophy—As propounded By the Skanda Purāṇa [स्कन्दपुराणप्रतिपादितं प्रत्यभिज्ञादर्शनम्] By *Dr. (Mrs.) Sudha Sahai*; Kamala Nehru College, Delhi | 139-142 |
| 4. | इतिहासपुराणयोः श्रीकृष्णस्य लौकिकचरितविमर्शः [Worldly life of Śrīkṛṣṇa as Depicted in the Itihāsa and Purāṇa] By *Pt. Baldeva Upadhyaya*; Former Director of Research Institute, Vārāṇaseya Sanskrit University, Varanasi | 143-154 |
| 5. | मूलसंस्कृतमत्स्यपुराण-तदनुवादभूतद्रमिळमत्स्यपुराणयोः साम्यवैषम्यविवरणपट्टिका [Concordance of the Agreement and Difference between the Sanskrit Matsya Purāṇa Text and its Tamil Translation] Compiled by *Sri S. Srinivasa Sarma*; Madras | 155-244 |
| 6. | Nature and Significance of Itihāsa & Purāṇa in Vedic Puruṣārtha Vidyās.—II [वैदिकपुरुषार्थविद्यासु इतिहासपुराणयोः स्वरूपं महत्त्वं च ] By *Prof. V. V. Deshpande*; Poona | 245-260 |
| 7. | Book-Review By *Sri A. S. Gupta* | 261 |
| 8. | Activities of the All India Kashiraj Trust [सर्वभारतीयकाशिराजन्यासस्य कार्यविवरणम्] | 262-273 |
| | *Supplement* | |
| 9. | The Mānava Dharma Śāstra I-III and the Bhaviṣya Purāṇa [मानवधर्मशास्त्रं १-३ अध्यायाः, भविष्यपुराणं च] By *Dr. Ludwik Sternbach*, LL. D.; Paris University | 1-122 |

# व्यासप्रशस्तिः

## श्रीवादिराजकृतकरावलम्बनस्तोत्रम्

(स्तोत्रमहोदधिः, श्रीरामतत्त्वप्रकाशप्रेस, वेलगाँव, पृ० १०४)

त्रय्याविकासकमजं मुहुरन्तरेव
सञ्चिन्त्य मध्वगुरुपादयुगं गुरूंश्च ।
वेदेशपादजलजं हृदि साधु कृत्वा
संप्रार्थये श्रुतिविकासकहस्तदानम् ।।१।।

पद्मासनादिसुरसत्तमभूसुरादि—
सल्लोकबोधजनने बदरीनिवासिन् ।
सच्छास्त्रशस्त्रहृतसत्कुमते सदिष्ट
वासिष्ठ कृष्ण मम देहि करावलम्बम् ।।२।।

आम्नायविस्तरविशारदशारदेश
भूताधिपादिसुरसंस्तुतपादपद्म ।
योगीश योगिहृदयामलकञ्जवास
वासिष्ठ कृष्ण मम देहि करावलम्बम् ।।३।।

सद्ब्रह्मसूत्रवरभारततन्त्रपूर्व—
निर्माणनिर्मलमतेऽखिलदोषदूर ।
आनन्दपूर्ण करुणाकर देवदेव
वासिष्ठ कृष्ण मम देहि करावलम्बम् ।।४।।

अर्कात्मजाजलतरङ्गविचारिचारु-
वायूपनीतशुभगन्धतरूषवासिन् ।
अर्कप्रभैणवरचर्मधरोरुधामन्
वासिष्ठ कृष्ण मम देहि करावलम्बम् ।।५।।

तर्कामयान्तकर तात शुकस्य कीट-
राज्यप्रदाघटितसंघटकात्मशक्ते ।
भृत्यार्त्तिहन् प्रणतपाल सुवंशकारिन्
वासिष्ठ कृष्ण मम देहि करावलम्बम् ।।६।।

काले जले जलदनीरकृतोरुवर्म-
न्नाम्नायहारिसुरवैरिहरावतार ।
मत्स्यस्वरूपकृत कञ्जजवेददायिन्
वासिष्ठ कृष्ण मम देहि करावलम्बम् ।।७।।

गीर्वाणदैत्यबललोलितसिन्धुमग्न-
मन्थाचलोद्धरण देव सुधाप्तिहेतोः ।
कूर्मस्य रूपधर भूधर नीरचारिन्
वासिष्ठ कृष्ण मम देहि करावलम्बम् ॥८॥

क्षोणीहरोरुबलदैत्यहिरण्यनेत्र-
प्रध्वंसदंष्ट्रयुगलाग्र सुरप्रमोद ।
पृथ्वीधराध्वरवराङ्गवराहरूप
वासिष्ठ कृष्ण मम देहि करावलम्बम् ॥९॥

प्रह्लादशोकविनिमोचन देवजात-
सन्तोषदोरुबलदैत्यहिरण्यदारिन् ।
सिंहास्यमानुषशरीरयुतावतार
वासिष्ठ कृष्ण मम देहि करावलम्बम् ॥१०॥

देवेन्द्रराज्यहर दानवराजयज्ञ-
शालार्थिरूपधर वज्रधरार्त्तिहारिन् ।
याच्ञामिषादसुरवञ्चक वामनेश
वासिष्ठ कृष्ण मम देहि करावलम्बम् ॥११॥

**(श्री पं० मध्वाचार्य आद्येन संगृहीतम्)**

# रैभ्यमुनिकृता गदाधरस्तुतिः

(वराहपुराणम्, अ० ७)

रैभ्य उवाच

गदाधरं विबुधजनैरभिष्टुतं
धृतक्षमं क्षुधितजनार्त्तिनाशनम् ।
शिवं विशालासुरसैन्यमर्द्दनं
नमाम्यहं हतसकलाशुभं स्मृतौ ॥१॥
पुराणपूर्वं पुरुषं पुरुष्टुतं
पुरातनं विमलमलं नृणां गतिम् ।
त्रिविक्रमं धृतधरणिं बलेर्हं
गदाधरं रहसि नमामि केशवम् ॥२॥
सुशुद्धभावं विभवैरुपावृतं
श्रियावृतं विगतमलं विचक्षणम् ।
क्षितीश्वरैरपगतकिल्बिषैः स्तुतं
गदाधरं प्रणमति यः सुखं वसेत् ॥३॥
सुरासुरैरर्च्चितपादपङ्कजं
केयूरहाराङ्गदमौलिधारिणम् ।
अब्धौ शयानं च रथाङ्गपाणिनं
गदाधरं प्रणमति यः सुखं वसेत् ॥४॥
सितं कृते त्रेतायुगेऽरुणं विभुं
तथा तृतीये पीतवर्णमच्युतम् ।
कलौ घनालिप्रतिमं महेश्वरं
गदाधरं प्रणमति यः सुखं वसेत् ॥५॥
बीजोद्भवो यः सृजते चतुर्मुखस्
तथैव नारायणरूपतो जगत् ।
प्रपालयेद् रुद्रवपुस्तथान्तकृद्
गदाधरो जयतु षडर्द्धमूर्त्तिमान् ॥६॥
सत्त्वं रजश्चैव तमो गुणास्त्रय-
स्त्वेतेषु नान्यस्य समुद्भवः किल ।
स चैक एव त्रिविधो गदाधरो
दधातु धैर्यं मम धर्ममोक्षयोः ॥७॥

संसारतोयार्णवदुःखतन्तुभि-
वियोगनक्रक्रमणैः सुभीषणैः ।
मज्जन्तमुच्चैः सुतरां महाप्लवे
गदाधरो मामु दधातु पोतवत् ।।८।।
स्वयं त्रिमूर्त्तिः स्वमिवात्मनात्मनि
स्वशक्तितश्चाण्डमिदं ससर्ज्ज ह ।
तस्मिञ्जलोत्थासनमार्यतेजसं
ससर्ज्ज यस्तं प्रणतोऽस्मि भूधरम् ।।९।।
मत्स्यादिनामानि जगत्सु केवलं
सुरादिसंरक्षणतो वृषाकपिः ।
मुख्यस्वरूपेण समन्ततो विभुर्
गदाधरो मे विदधातु सद्गतिम् ।।१०।।
**एतच्च रैभ्यनिर्दिष्टं स्तोत्रं विष्णोर्गदाभृतः ।**
**यः पठेत् स गयां गत्वा पिण्डदानाद् विशिष्यते ।।**
(Varāha-P., Cr. Text, 7.29-31, 45

**Important Variants in the text of the Stuti from the Collated Manuscripts**

1. –b) क्षुभित-(for क्षुधित-). –d) हृत-(for हत-).
2. –b) विमलधियां (for विमलमलं). –c) हृतधरणिं (for धृतधरणिं); बलेहिं, बलेर्दरं (for बलेहं).
3. –a) विशुद्धभावं, सुसिद्धभावं (for सुशुद्धभावं); उपाहृतं (for उपावृतं). –b) विरतमलं (for विगतमलं)
4. –c) अब्धौजशार्ङ्गसि-(for अब्धौ शयानं च)
6. –a) रजोभवो, प्रजाभवे (for बीजोद्भवो)
7. –b) वाच्यस्य (for नान्यस्य)
8. –c) महाप्लवो (for महाप्लवे). –d) अभ्युद्धरते सुपोतवत्, रक्षतु मामनाथम्, नयति परं हि धाम (for मामु दधातु पोतवत्).
9. –a) खमिव (for स्वमिव). –c) आप्य-, आप-(for आर्य-)
10. –a) जगत्समश्नुते (for जगत्सु केवलं). –c) सुखस्वरूपेण, मत्स्यस्वरूपेण (for मुख्यस्वरूपेण). –d) दधतु धियां ममेति (for मे विदधातु सद्गतिम्).

**Explanations**

1. –b) क्षुधित = tortured by material as well as spiritual hunger.
2. –c) बलेहं—an adjective of गदाधरं, and means producing terror in Bali. (ह = fear, terror).
4. –c) अब्धौज (v. l.) = शङ्ख.
8. –c) महाप्लवे = in the great flood. महाप्लवः (v. l.) = the large raft.

—A. S. Gupta

# PRATYABHIJNĀNA PHILOSOPHY—AS PROPOUNDED BY THE SKANDA PURĀṆA

DR. (MRS.) SUDHA SAHAI

[काश्मीरशैवसिद्धान्तस्य प्रत्यभिज्ञानदर्शनमद्वैतपरकं विद्यते। एतत् प्रत्यभिज्ञानं नाम दर्शनं ख्रीस्तीयदशमशताब्दयां सोमानन्दाचार्येण प्रवर्त्तितम्। शिवदृष्टिनामकश्च ग्रन्थस्तेन निर्मितः, तच्छिष्येण उदयकाराचार्येण च श्लोकरूपेण प्रत्यभिज्ञानसूत्रग्रन्थो रचितः, अभिनवगुप्तेन च एतेषां सूत्राणां व्याख्या कृता। अस्मिन् प्रत्यभिज्ञादर्शने ब्रह्मविश्वयोरेकत्वं प्रतिपादितम्। तस्माद् अद्वैतसिद्धान्तानुसारीदं मन्यते। स्कन्दपुराणेऽपि प्रत्यभिज्ञानदर्शनस्य स्वरूपं व्याख्यायते। स्कन्दपुराणमाश्रित्य प्रत्यभिज्ञादर्शनस्य स्वरूपमत्र लेखे वर्णितम्।]

The Pratyabhijñāna school of Kashmir Śaivism is a type of monism or Advaitism and is also propounded in the Skanda Purāṇa. The founder of this school was Somānada and the work composed by him was known as 'Śivadṛṣṭi. But the principal treatise of the school was composed by his pupil Udayakāra and it contains verses which are called Sūtras. On these Sūtras, there are glosses and detailed explanations by Abhinava-gupta written between 993 and 1015 A.D. and therefore Somānanda must have lived in the first quarter of the tenth century A.D.[1] But this system was a popular system of Kashmir, as it has been referred to again and again by the reputed poet Kalidāsa in his works. This system holds the view of non-difference between the universe and the Highest Being and thus it is termed as *Advaita* system. This system is also expounded in the Skanda Purāṇa.

Just as in this system, so according to the Skanda Purāṇa also, 'Parama-Siva' is the only reality in this universe. There is none who can transcend him.[2] Śiva alone is the creater, protector and the destroyer of the world.[3] He is only one but he

1. Bhandarkar, R.G., *Vaiṣnavism & Śaivism*, p. 131.
2. महेशान्नपरो देवो दृश्यते भुवनत्रये
   तस्मात्सर्वंप्रयत्नेन पूजनीयः सदा शिवः।
   Sk. Pu; MH. Kh; A. Ch. 5., v. 88.
3. नमो रुद्राय शान्ताय ब्रह्मणे परमात्मने
   त्वं हि विश्वसृजां स्रष्टा धाता त्वं हि प्रपितामह।
   Sk. Pu; MH. Kh; A; Ch. 5; v. 16.

assumes the form of Viṣṇu—When Sattva quality predominates, the form of Brahmā when Rajas quality predominates and the form of Rudra when Tamas quality is predominating.[1] The gods neither know his beginning nor his end. His nature is such that it cannot be explained by speech. He possesses innumerable forms and is immortal.[2] He is greater than the greatest and subtler than the subtlest.[3] 'Parama-siva' i.e., the true and innermost Self in every being is changeless reality of Nature. This Caitanya or Parama-śiva is the reality which underlies not only every human being but also everything else in the universe, both separately, i.e. individually as well as in its totality. In other words, Parama Śiva is beyond the limits of time, space and form and as such is eternal and infinite. Again, as the underlying reality in every being, he is all-pervading, and at the same time he is all-transcending. His nature has primarily a two-fold aspect—an imminent aspect in which he pervades the universe and transcendental aspect in which he is beyond all universal manifestations.[4]

Śiva has been identified here with everything of this world and even with the sacrifice.[5] His peculiar qualities have been described here as *sat*, *cit* and *ānanda.* He is full of knowledge and lusture.[6] He is without any name and form. He is lustrous and full of knowledge in his own nature. He is the very cause of all the causes and yet he is without any cause. He has got no form and at the same time he has got all the forms.[7] Thus this Śiva who is the true and innermost Self in every being, is a changeless reality of Nature. He is called by different names in the Skanda Purāṇa as Sadāśiva, Śaṁkara, Caitanya. The special feature of Śiva which has been described here is that he has been represented as having five faces,[8] which probably represent the five 'Śaktis' of Śiva accepted by the Pratyabhijñāna

1. Sk. Pu., Br. Kh., C, ch. 3, v. 18.
2. Sk. Pu., Br. Kh., ch. 3, vv. 14, 15.
3. Sk. Pu., Br. Kh., ch. 7, v. 21.
4. Sk. Pu., MH. Kh., A, ch. 5, vv. 108-109.
5. Sk. Pu., MH. Kh., A, ch. 3, vv. 77.
6. Sk. Pu., MH. Kh., A, ch. 10, v. 15.
7. Sk. Pu., Ks. Kh, B, ch. 78 v. 32.
8. SK. Pu; MH. Kh., A, ch. 3, v. 10.

philosophy. Like Pratyabhijñāna Philosophy, the Skanda Purāṇa propounds the doctrine that Śiva is united with thirty six principles.[1] Śiva himself has been called 'Parama tattva' and his very form illumines the rest of the tattvas.[2]

The manifestation of the universe takes place through his power known here as 'Śakti' which though only an aspect, is yet one and the same with him. The Śakti is the eternal power of Śiva and is never separated from him.[3] The Skanda Purāṇa repeatedly mentions that Śiva is staying in the cremation ground with his inseparable power technically known as Śakti.[4] Śakti again has several, indeed an infinite number of aspects or modes, of which five are the most fundamental and primary ones. These are Icchā śakti, Jñāna śakti, Ānanda śakti, Cit śakti and the Kriyā śakti. All these five Śaktis are mentioned in the Skanda Purāṇa. But the Skanda Purāṇa barely mentions these powers by their names and gives no other details about them.[5] The Ānanda rūpā śakti, however, has been referred to again and again in the contest of the nature of Śiva.[6] The technical names given by Pratyabhijñāna system to the Śiva Tattvas are not found but they are referred to here under the names of the five mūrtis of Śiva.[7]

With these five aspects of his Śaktis, Parama-śiva' manifests himself as the universe. Thus in reality, the universe is only an expansion of the power of 'Parama-śiva'. The phenomenal world arises through the force of Māyā which according to this system is of five types. These are Niyati, kalā, rāga, vidyā, kāla. Though the Māyā of Śiva is referred to again and again in the Skanda Purāṇa, we nowhere find the use of these technical terms. From this Māyā arise Puruṣa and Prakṛti which are self-propelled

---

1. तस्मिन्स्थानेस्थितस्साक्षाद्दैत्यानामन्तकश्शुभे
   अहं देवि त्वया सार्धं षट्त्रिंशत्तत्त्वसंयुतः ।
   Sk. Pu., Pr. Kh., A, ch. 8, v. 57.
2. Sk. Pu., KS., Kh., ch. 31, v. 24.
3. निर्गुणं परमात्मानं विद्धि लिङ्गस्वरूपिणम्
   पराशक्तिस्तथाज्ञेया निर्गुणा शाश्वती सती ।
4. Sk. Pu., KS. Kh., ch. 31, v. 29.
5. Sk. Pu., Ks. Kh., ch. 31, v. 33.
6. Sk. Pu., Ks. Ch., ch. 31, v. 33.
7. Sk. Pu., Br. Kh., ch. 7, v. 38.

but always dependent on the will of Śiva. Here lies the clear points of demarcation between the Sāṁkhya and the Pratyabhijñāna Philosophy. The Puruṣa and Prakṛti of Sāṁkhya are independent, but in the Kashmira Śaiva philosophy both are dependent. Further evolution of the universe takes place on the lines of the Sāṁkhya scheme. From the union of Puruṣa and Prakṛti, came out the three guṇas, buddhi, ahaṁkāra, the five organs of actions etc. according to Sāṁklya order. But all the stages of the evolution are traced back to the Absolute Śiva. The cyclical appearance and disappearance of the world are admitted. Ignorance is the main cause through which one is unable to understand the real nature of Śiva. It is through ignorance that one forgets that the world is unreal and the soul is identical with Śiva. Recognition of the reality is all that is needed for release. The bondage of ignorance is overcome only by this recognition. When the soul recognises it-self as God, it rests in the mystic bliss of oneness with God. According to the Skanda Purāṇa also, this oneness can be attained only through the true knowledge of Śiva known here as Śiva-tattva.[1]

Thus, taken as a whole, the Skanda Purāṇa propounds the doctrines of Pratyabhijñāna philosophy. As this system was not fully developed at that time, so the Skanda Purāṇa could not borrow all its doctrines. It borrowed all those doctrines alone which were prevalent at that time.

1. Sk. Pu, Br. Kh, B; Ch. 8, v. 1.

# इतिहासपुराणयोः श्रीकृष्णस्य लौकिकचरितविमर्शः

बलदेव उपाध्याय

[An attempt has been made in the article to give a picture of the worldly life of Śrī Kṛṣṇa as depicted in the Mahābhārata and the Purāṇas. Kṛṣṇa's personality was many-sided. Sabhā Parvan (adhyāya 41) and Droṇa Parvan prove undoubtedly that Kṛṣṇa whose life has been described in the Mahābhārata was the same person whose childhood-exploits have been depicted in the Śrīmad Bhāgavata. He was frank, fearless and outspoken in his views and this is proved by the *Syamantaka maṇi* episode as presented by the Viṣṇu Purāṇa (IV. 13). He was humble and meek in his behaviour towards his elders and the learned Brāhmaṇas, as in the Rājasūya of Yudhiṣṭhira he took upon himself the humble and lowly duty of washing their feet with his own hands. Besides these, he was a clear headed politician and an eminent diplomat as shown by his political acumen in the great Mahābhārata war. It was he who by dint of his political dexterity brought into one united organisation the warring factions of the Yādava Kṣatriya clan and worked out the federal government of the Andhakas and the Vṛṣṇis to a complete success by his political counsels and diplomatic action. His diplomacy is eminently obvious by the fact that he took upon himself the duty of a messenger to the Kaurava court and tried his best to achieve a workable peace between both the parties by his agreeable and attractive arguments. He was a pacifist in the real sense of the word and tried hard to desist the Kauravas from the destructive path of a terrible war. On account of these qualities of head and heart the Bhagavad-gītā asserts that the party to which Kṛṣṇa lends his moral support is bound to be the receptacle of *Śrī* (goddess of wealth), *Bhūti* (opulence) and *Vijaya* (victory) and the same thing is said by Bhīṣma at the time of Rājasūya Sacrifice.]

श्रीकृष्णस्य चारु चरित्रं कस्य विपश्चितश्चेतो नैवाकर्षति। कौरव-पाण्डवानां भीषणसंग्रामवर्णनं महाभारतं श्रीकृष्णस्य नानायुद्धप्रसङ्गो-पात्तानि जीवनवृत्तानि वर्णयति। पुराणानि यदुवंशस्य वर्णनावसरे तस्य रुचिराणि जीवनकार्याणि प्रतिपादयन्ति। श्रीकृष्णस्य अलौकिकजीवन-वृत्तान्येव लोकरञ्जकानि सामान्यजनानां विशेषतो भक्तिभावान्वितानां पुरुषाणां मनांसि स्वानवधिकमाधुर्येणावर्जयन्तीति विदितमेव विद्वज्-जनानाम्। तत्र महाभारते पुराणे च श्रीकृष्णस्य लौकिकचरितमनुरुध्य किञ्चिद् विचारयामः।

लोके जनानां सामान्यबुद्ध्या तर्कसम्मतानि चरितानि लौकिका-नीति निगदितुं पार्यते। तद्विपरीतानि सामान्यतर्कमसहमानानि चरितानि अलौकिकानीति भण्यन्ते। तत्र बहुशः पश्यामो यदलौकिकशेमुषीभाजां महापुरुषाणां द्विविधं चरितं तावत् स्फीतिमातनुते लोके। एकं तावत् लौकिकं चरित्रम्। अपरं तावत् अलौकिकं चरित्रम्। बहूनां महाभागानां लौकिकचरित्रमेव प्राधान्येन जनतायां प्रथते, तेषामलौकिकं निगूढं चरित्रं तु केवलं सुधियामेव बोधगम्यं भवतीति साधारणः कल्पः। नैषा सरणिः श्रीकृष्णस्य चरित्रविषये प्रतिपादयितुं शक्या यतस्तस्यालौकिकं चरितमेव पुराणेषु तदनुसरणपरायणेषु नानाकृष्णकाव्येषु च वैशद्येन एतावदुपबृंहितं वर्तते यत् तस्य लौकिकं चरितं सामान्यमानवानां किमु, अपि तु विद्वज्जनानामपि मानसात् तिरोहितमिव साक्षात् क्रियते साम्प्रतम्। श्रीकृष्णस्यालौकिकचारित्रचमत्कृतिरसाभिभूताः पण्डिता अपि नैव विदां-कुर्वन्ति यत् तस्य लौकिकं चरितमपि मानवानां भक्तिभाजामन्तः-करणेषु तथैव हृदयङ्गमां रसमाधुरीं प्रवाहयितुं क्षमते। निखिलेषु पुराणेषु, विशेषतः श्रीमद्भागवतस्य दशमस्कन्धे, परमैश्वर्यमण्डितोऽखिलब्रह्माण्ड-नायकोऽघटितघटनापटीयान् श्रीकृष्णो भगवानेवेति चमत्कृतया वाचा-र्चितः प्रौढैस्तर्कैश्च समर्थितो वर्तते इति समेषां विदितचरमेव। परन्तु विहाय तस्य नानाश्चर्यचर्याचमत्कृतिचणमलोकसामान्यं चरित्रम्, अपरं दृश्यते लोकसामान्यमपि चरित्रं यत्र दैनन्दिनव्यवहारस्य राजनीतिज्ञ-तायाश्च कोऽपि चेतोहारी महिमा नेत्रगोचरीक्रियते तज्ज्ञैः।

पुराणेषु प्रामुख्येन भक्तानां हृदयेषु प्रीतिरसोद्बलनाय, व्यवहार-गतानां विषयाणां चाप्रासङ्गिकत्वात् तेषां वर्णनक्षेत्राद् बहिर्भूतत्वात् च श्रीकृष्णस्यालोकसामान्यमेव चरित्रं तावद् वर्णनेनोपन्यस्तम्। लौकिकं वृत्तं तु मुख्यतया महाभारते एव संदृब्धम्। केषुचित् पुराणेष्वपि तदुपन्य-स्तमिति कृत्वा ग्रन्थानेताननुरुध्य श्रीकृष्णस्य लौकिकवृत्तस्य संक्षेपेण विमर्शो विदुषां पुरत उपस्थाप्यते।

## श्रीकृष्णस्य अद्वैतता

श्रीकृष्णस्याभिव्यक्तिविषये महानेकः संशयो जार्गात पाश्चात्यानां तदनुसरणपराणां च भारतीयानां विदुषां हृदयेषु यत् कृष्ण एक एवासीत् आहोस्वित् द्वौ कृष्णौ आस्ताम्। वैदुषीभाजां पण्डितानां समक्षं प्रश्नोऽय-मुपहासमेव भजते, परन्तु बहुशो नानाविधैः समर्थैस्तर्कैरपनीतोऽप्ययं सन्देहो मन्येऽनेकेषां पण्डितब्रुवां हृदयकोणे क्वापि लुक्कायितः साम्प्रतमपि विलोक्यते। अत एव तदपनयने ममैष आग्रहः। महनीयचरितानां पुरुषाणां जीवनचरिते एतादृशी विरोधच्छाया तु सर्वेषु एव कालेषु अवलोक्यते। श्रीकृष्णस्य बाललीलासु किञ्चन चापल्यं, व्यवस्थितमर्यादायाश्च ईषद्भङ्गः, गोपीभिः साकं नृत्यरासादिप्रसङ्गश्च, प्रौढे वयसि समुपदृब्धौ पाण्डवानां नेतृत्वं भगवद्गीतोपदेशादिभिः समं विरुद्धभावं भजते इत्यभि-युक्तानां युक्तिसरणिः। परन्तु निपुणं विमृशन्तो वयं न कमपि विरोधभावं तत्र साक्षात् कुर्मः। पुराणेषु अनावश्यकत्वेन तत्प्रौढे वयसि सम्पद्यमानानां चरितवृत्तानामनवसरः। अतएव पुराणानां लक्ष्यं तु इदमेव प्रतीयते यज्जनताया हृदये श्रीकृष्णस्यालौकिकलीलानुरोधाद् भक्तेराविर्भावो भवतु। तदर्थमेव यतमानानि पुराणानि श्रीकृष्णस्य व्रजमण्डले बाल्ये विहितानि वृत्तान्यनुरुध्य बाललीला एव वर्णयन्ति। मथुरालीला-द्वारकालीलयोश्च न तेषु विशेषोऽवलोक्यते आग्रहः। केवलमेव श्रीमद्भागवतमेव दशम-स्कन्धे श्रीकृष्णस्योभयविधं समग्रं चरितं वर्णयति। तत्र पूर्वभागे व्रज-लीलायाः प्राधान्येन निर्देशः, उत्तरभागे च द्वारकालीलाया विशेषेण वर्णनम्। इत्थं व्रजनन्दनस्य समग्रं सानुबन्धि च चरित्रं यथा श्रीमद्-भागवते समुपन्यस्तमुपलभ्यते, न तथान्येषु पुराणेषु। महाभारतस्य दृष्टिकोणस्तु पुराणेभ्यो नितरां भिद्यते। महाभारतयुद्धस्य निवारणार्थं दौत्यकार्यं स्वीकृत्य श्रीकृष्णः प्रभूतमुद्योगमचीकरत्। उद्योगस्य नैष्फल्याद् युद्धस्य सचारणार्थं च स बहूनि कार्याणि कूटनीतिसंकुलानि विदधे इति हेतोर्महाभारते तस्य युद्धसम्बद्धानि कार्याण्येव विस्तरशः प्रतिपादितानि। फलतो लक्ष्यभेदात् महाभारतीयं श्रीकृष्णचरितवर्णनं पुराणीयचरित-वर्णनान्नितरां भिद्यते इति गूढं रहस्यम्।

महाभारते तु श्रीकृष्णस्य प्रौढे वयसि अनुष्ठीयमानानां लीलावृत्ता-नामेव प्रामुख्यम्। अत एव महाभारते तान्येव वैशद्येन प्रतिपादितानि। परन्तु तत्र बालचरितस्य वृन्दावने विहितचरस्य संकेतो नोपलभ्यते इति ये वदन्ति ते तु नो समीक्ष्यभाषिणः। सभापर्वणि राजसूयेऽग्रपूजाया अवसरे शिशुपालेन विहिता निन्दा श्रीकृष्णस्य वृन्दावनलीलामेवावलम्बते।

यद्यनेन हता बाल्ये शकुनिश्चित्रमत्र किम्।
तौ वाऽश्ववृषभौ भीष्म यौ न युद्धविशारदौ। १॥

चेतनारहितं काष्ठं यद्यनेन निपातितम् ।
पादेन शकटं भीष्म ! तत्र किं कृतमद्भुतम् ।।८।।

वल्मीकमात्रः सप्ताहं यद्यनेन धृतोऽचलः ।
तदा गोवर्धनो भीष्म न तच्चित्रं मतं मम ।।९।।

भुक्तमेतेन बह्वन्नं क्रीडता नगमूर्धनि ।
इति ते भीष्म शृण्वानाः परे विस्मयमागताः ।।१०।।

यस्य चानेन धर्मज्ञ ! भुक्तमन्नं बलीयसः ।
स चानेन हतः कंस इत्येतन्न महाद्भुतम् ।।११।।

—सभापर्व, ४१ अ०

एतैः पद्यैः श्रीकृष्णस्य पूतनायाः, अश्वरूपधारिणः केशिनश्च वृषभासुरस्य च वधप्रसङ्गः, शकटासुरस्य पादाघातेन विनाशः, वल्मीकमात्रस्य गोवर्धनस्य हस्तेन धारणम्, कंसस्यापि वधः इत्यादयो वृन्दावनलीलाः प्रामुख्येन निर्दिश्यन्ते। सर्वा एताः नानापुराणेषु वैशद्येन प्रतिपादिता अधुनापि विलोक्यन्ते। यः खलु युधिष्ठिरेण राजसूये श्रीभीष्मपितामहस्य निर्देशेन समर्चितोऽयं महाभागः श्रीकृष्णः, स एव एतेषामपि वृन्दावनसम्बद्धानां वृत्तानामपि सम्पादयितेति शिशुपालस्य निन्दायास्तात्पर्यम् ।

अन्यच्च। द्रोणपर्वणि सञ्जयं प्रति धृतराष्ट्रेण विहितेयं कृष्णस्तुतिः श्रीकृष्णस्यैक्यमेव द्रढयति। तत्रत्यानि कानिचित् पद्यानि सिद्धान्तस्य दार्ढ्याय समुद्ध्रियन्ते—

शृणु दिव्यानि कर्माणि वासुदेवस्य सञ्जय ।
कृतवान् यानि गोविन्दो यथा नाऽन्यः पुमान् क्वचित् ।।
गोकुले वर्धमानेन बालेनैव महात्मना ।
विख्यापितं बलं बाह्वोस्त्रिषु लोकेषु सञ्जय ।।
उच्चैःश्रवसतुल्यबलं वायुवेगसमं जवे ।
जघान हयराजं तं यमुनावनवासिनम् ।।
दानवं घोरकर्माणं गवां मृत्युमिवोत्थितम् ।
वृषरूपधरं बाल्ये भुजाभ्यां निजघान ह ।।
प्रलम्बं नरकं जम्भं पीठं चापि महासुरम् ।
मुरं चामरसंकाशमवधीत् पुष्करेक्षणः ।।
तथा कंसो महातेजा जरासन्धेन पालितः ।
विक्रमेणैव कृष्णेन सगणः पातितो रणे ।।
चेदिराजं च विक्रान्तं राजसेनापतिं बली ।
अर्घ्ये विवदमानं च जघान पशुवत् तदा ।।

यच्च तन्महदाश्चर्यं सभायां मम सञ्जय ।
कृतवान् पुण्डरीकाक्षः कस्तदन्य इहार्हति ।।
—द्रोणप० ११।१-६,१३,२४

पद्यानीमानि विशदयन्ति यत् गोकुले हयराजकेशिनः वृषभासुरस्य प्रलम्बस्य कंसस्य च संहर्ता श्रीकृष्ण एव प्रौढे वयसि पाण्डवानां हितोपदेष्टा राजसूये ऽग्रपूजामण्डितः शिशुपालस्य वधकर्ता कौरवसभायां च विराड्रूप-प्रदर्शयिता चाऽऽसीदिति । अत एव सर्वाणीमानि कार्यजातानि एकेनैव महापुरुषेण सम्पाद्य विहितानीति ।

### श्रीकृष्णस्य स्पष्टवादिता

स्पष्टवादिता तु स्वत एव महान् गुणः । स्पष्टवादित्वगुणेन मण्डितो जनो नूनमेव महापुरुषपदवीं धारयितुं क्षमते स्वचरितस्य त्रुटिं जानन् यो जनः समेषां गण्यमान्यानां पुरुषाणां समक्षं निःसंकोचभावेन तामुद्घाटयितुं पारयति, नूनं स महान् पुरुष इति पुरुषमाहात्म्यस्य निकषग्रावा । आलोचनयाऽनया श्रीकृष्णः स्वचरित्रस्य परमं महिमानं समुद्भासयति । विष्णुपुराणे (४।१३) स्यमन्तकमणिप्रसङ्गे कथैषा संदृश्यते, श्रीमद्भागवते तु एष प्रसङ्गो नातिविशदं विवेचितः । संक्षेपेण कथाया अयं प्रकारः । शतधन्वा नाम यादवोऽक्रूरस्य सहमत्या सत्यभामायाः पितरं सत्राजितं निहत्य स्यमन्तकमणिमात्मसाद् विदधे । तदानीं श्रीकृष्णः वारणावते स्थितः सत्यभामया संसूचितो द्वारकामाजगाम । तदागमनं ज्ञात्वा शतधनुरप्यतुलवेगां शतयोजनवाहिनीं बडवामारुह्यापक्रान्तः । अश्वचतुष्टयेनयुक्ते रथे स्थितौ बलभद्रवासुदेवौ तमनुप्रयातौ । शतयोजनातिक्रमणात् परं सा वडवा मिथिलायां स्वान् प्राणानुत्ससर्ज । श्रीकृष्णस्तु शतधनुषशिरच्छेदं कृत्वा तत्र मणिमलब्ध्वा बलभद्रेण स्त्रैणेति नानाऽवाच्योपाधिभिः कदर्थीकृतो द्वारकां प्रत्याजगाम । अक्रूरो यदा स्वसन्निधौ स्थापितं स्यमन्तकमणिं श्रीकृष्णाय उपहारीकर्तुमियेष, तदा श्रीकृष्णेन स्वचारित्रस्य कोऽप्युत्कर्षः इत्थं प्रकटीकृतः । सोऽकथयत्—शुचिना ब्रह्मचर्यादिगुणवता पुरुषेण ध्रियमाणोऽशेषराष्ट्रस्योपकारकोऽयं मणिः । अशुचिना ध्रियमाणस्तु आधारमेव हन्ति । अतोऽहमस्य षोडशस्त्रीसहस्र-परिग्रहादसमर्थो धारणे । कथमेतत् सत्यभामा स्वीकरोति । यदा पतिरेव धारणेऽसमर्थः, तदा तद्भार्या कथं धारणे समर्था भविष्यतीति कृष्णस्याशयः । आर्यबलभद्रेणापि मदिरापानाद्यशेषोपभोगपरित्यागः कार्यः । तदलम्, यदुलोकोऽयं बलभद्रः सत्या च त्वां दानपते (इति अक्रूरस्य संबोधनम्) प्रार्थयामः—तद् भवानेव धारयितुं समर्थः ।

इति विष्णुपुराणीयकथायाः संक्षेपः । अनेन स्पष्टं प्रतीयते यत् श्रीकृष्णो राष्ट्रस्य कल्याणमेव स्वार्थादधिकतरं मन्वानोऽमूल्यस्य मणेर्ग्र-

हणाद् विरराम। स्वीयां चारित्रिकीं त्रुटिमपि उद्घाटयितुं न पश्चात्पदो बभूव। इयं निःस्पृहता नाम, एषा चैव स्पष्टवादिता खलु या श्रीकृष्णस्य चरित्रं नितान्तमुदात्तमभिव्यक्तं करोति। अन्यच्च युधिष्ठिरस्य राजसूये ब्राह्मणानां पादप्रक्षालनं कर्म आत्मार्थे स्वीकृत्य श्रीकृष्णः स्वीयं निरभिमानं स्वभावं स्फुटीचकार। तथा भागवते दशमस्कन्धीयं वाक्यं—**कृष्णः पादावनेजने** इति (भाग० १०।७५।५) अयमेवार्थः सभापर्वण्यपि वैशद्येन विवृतो वेदव्यासेन—

चरणप्रक्षालने कृष्णः ब्राह्मणानां स्वयं त्वभूत्।
सर्वलोकसमावृत्तः पिप्रीषुः फलमुत्तमम्॥

—सभा० ३५।१०

## श्रीकृष्णस्य राजनीतिज्ञता

श्रीकृष्णस्य व्यावहारिकराजनीतौ गणतन्त्रस्य संचालनकर्मणि च शेमुषी नितान्तं वैशिष्टचमभजत इति नातितिरोहितं प्राचीनेतिहासानुशीलनशीलानां विपश्चिताम्। शान्तिपर्वण एकाशीतितमाध्यायस्य गम्भीरमध्ययनमेतदर्थमपेक्ष्यते। इदमत्र ऐतिहासिकं वृत्तमप्यनुसन्धेयम्। यादवक्षत्रियाणां द्वे मुख्ये कुले आस्ताम्—अन्धककुलं वृष्णिकुलं च। तयोः शासनं सम्मिलितरूपेण गणतन्त्रराज्यमासीद् यद् आधुनिके काले Fedral Republic इति आङ्लभाषायां ख्याप्यते। उग्रसेनस्तु श्रीकृष्णेन यादवानामाधिपत्ये स्थापितोऽपि वार्धक्याद् हेतोर्न बहूनि कार्याणि कर्तुमपारयत्। अत एव यादवानां राजनीतिं श्रीकृष्ण एव स्वव्यवहारकौशलेन राजनीतिनैपुण्येन च सुचारु संचालयामास। यतो ज्ञानवृद्धत्वाद् राजनीतिपाटवाच्च तस्मिन्नेवासीत् तत्संचालनस्योत्तरदायित्वभरः। राजनीतिपरिषदो द्वावेव मुख्यावास्ताम् वृष्णिकुलस्य नेता आहुको विश्रुतनामा उग्रसेनः, अन्धककुलस्य च नेता अक्रूरः। द्वावेतौ विवाहादि सम्बन्धेन सम्बन्धिनावपि परस्परं नानुकूल्यमभजेताम्। आहुकश्चासीत् श्वसुरः अक्रूरश्चासीत् तस्य सुतनुनाम्नीं दुहितरं विवोढा जामाता। कुलस्वार्थ एवासीत् संघर्षबीजम्। परिषदः संचालनं विरुद्धकुलयोश्च स्वार्थसमन्वयं श्रीकृष्ण एव स्वराजनीतिनैपुण्येन भृशं चकारेति अध्यायस्यास्य परिशीलनेन स्फुटी भवति। नारदेन पृष्टः श्रीकृष्णः राजनीतेरसामञ्जस्याज्जायमानां स्वीयां दीनदीनां दशामित्थं प्रकटी करोति :—

दास्यमैश्वर्यभावेन ज्ञातीनां वै करोम्यहम्।
अर्धभोक्तास्मि भोगानां वाग्-दुरुक्तानि च क्षमे॥५॥
बलं संकर्षणे नित्यं सौकुमार्यं पुनर्गदे।
रूपेण मत्तः प्रद्युम्नः सोऽसहायोऽस्मि नारद॥७॥

सोऽहं कितवमातेव द्वयोरपि महामुने।
नैकस्य जयमाशंसे द्वितीयस्य पराजयम् ।।११।।
—शान्तिपर्व, अ० ८१

श्रीकृष्णवचनानामयम् आशयः—यादवानामीश्वरत्वेन शासकत्वेन ख्यापितोऽहमिति तु सत्यम्, परन्तु अहं स्वज्ञातीनां दायादानां दास्यमेव करोमि, तेषां कटुवचनान्येव सर्वदैव क्षमे। राजकर्मणि न कोऽपि मम साहाय्यं विधत्ते इति हेतोरसहायोऽस्मि। ममाग्रजो बलभद्रो बलमेव भद्रं मनुते, ममानुजो गदः सौकुमार्ये मतिं धत्ते; मम ज्येष्ठः सूनुः प्रद्युम्नः रूपेण मत्तो न किमपि कार्यं करोति। अतएव असहायतया नितान्तं तान्ति भजे। आहुकस्य अक्रूरस्य च मतद्वैविध्यनिरासपूर्वकं यादवानामभ्युदयाय राजनीतिं नयता मया कितवमात्रेव दुःखेन कालो याप्यते। कितवो द्यूतकरः तस्य माता कितवमाता। तस्याः पुत्रौ द्यूतकर्मणि परस्परं विवदमानौ परस्परं जयैषिणौ आस्ताम्। सा एकस्य पुत्रस्य न विजयमाकांक्षते न वाऽपरस्य सूनोः पराजयम्। तद्वदेवाहमपि न वृष्णीनां ह्रासं वाञ्छामि, न वा ऽन्धकानामभ्युन्नतिम्। उभयोः संघर्षं परिहरन् स्वकौशलेन क्लेशातिरेकेण कालं यापयामीति श्रीकृष्णवचनानामाशयः।

कितवमातेत्युपमा नितान्तमर्थाभिव्यञ्जिका वर्तते। सा उभयोरपि पुत्रयोः कल्याणमाकाङ्क्षते। अतएव तयोः समानशीलं समानीं चाभ्युन्नतिं कामयते। परन्तु विवदमानयोः परस्परं कलहायमानयोः विरुद्धाभिनिवेशवतोः पुत्रयोः मातृत्वं पितृत्वं नाम कियत् क्लेशावहमिति जानन्त्येव व्यवहारकोविदा लोकाः। भारतवर्षस्य पश्चिमे भागे बहुकालं यावत् वृष्ण्यन्धकसङ्घस्य मुख्यनेतृत्वमावहन् श्रीकृष्णः तं चरमामैहिकीमभ्युन्नतिमनयतेति ध्रुवं जागर्ति श्रीकृष्णस्य राजनीतिपाटवं व्यवहारकौशलं च।

**श्रीकृष्णस्य दौत्यकर्म**

महाभारतयुद्धस्य प्रारम्भात्पूर्वमेव श्रीकृष्णः महान्तं प्रलयकारिणं संग्रामं निवारयितुं महनीयं व्यापकं चोद्योगं महान्तं च प्रयत्नं विदधे इति प्रायशो नैव जानन्ति महाभारतानभिज्ञा विज्ञा अपि पण्डिताः। पाण्डवकौरवयोर्मध्ये सम्भाव्यमानस्य युद्धस्य भयंकरतां विषमं परिणामं च पूर्वत एव स व्यजानात्। रणचण्डिका नाम विश्वेषां संहारकारिणी काऽपि अनिर्वचनीयसत्त्वा देवी। तस्या मानवानां विघटनकारि धनुःक्वाणप्रचण्डकरालं नृत्यं मा भवतु भारतेऽस्मिन् वर्षे इति भूयानासीत् श्रीकृष्णस्याग्रहः। महाभारतस्योद्योगपर्वणः समीक्षणं कमपि पक्षपातविदूषितान्तःकरणं जनं विहाय अन्यान् सर्वानपि एतद् विश्वासयितुं पर्याप्तमिति मे मनीषा ध्रुवमुज्जृम्भते।

दुर्योधनस्य अन्यायाचरणेन भृशं क्लान्ताः पाण्डवाः कौरवैः सह सन्धिकर्मणि कथमपि न विश्वसन्ति स्म। परन्तु श्रीकृष्णस्य तु विपरीतैव मतिरासीत्। सन्धिकार्याय कोऽपि विश्वसनीयो दूतः प्रेष्यतामिति तस्यादेशं लङ्घयितुं, न कोऽप्यासीत् समर्थः। दूतकर्मणि राष्ट्रकल्याणाय पाण्डवानां विविधा अपि विमतीरवमत्य 'नहि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः' इति रामायणीयामपि सन्नीतिमुलङ्घ्य, श्रीकृष्णः तन्निपुणे प्रखरमतिसाध्ये च कर्मणि आत्मानमेव नियुयोज। स्वदौत्यकर्मणो नानाविधपरिणामपर्यवसायिनीमुद्देश्यतातिं स्वयमेव विवृण्वन् श्रीकृष्णः स्वयं कथयति :—

न जातु गमनं पार्थ भवेत्तत्र निरर्थकम्।
अर्थप्राप्तिः कदाचित् स्यादन्ततो वाप्यवाच्यता ।।

कौरवसभायां मम गमनं नितान्तं निरर्थकमेव भविष्यतीति पूर्वतः क्रियमाणाऽऽशङ्का नैव सामञ्जस्यं भजते। कदाचिदर्थस्य प्राप्तिर्भवेदेव। न वा भवेत् तदा अवाच्यता अनिन्दा तु भविष्यत्येव। पाण्डवैर्विहितोप्युद्योगो नैव साफल्यं भेजे इत्येव अनिन्दायाः स्वरूपम्। श्रीकृष्णः स्वविषये भाविनीमालोचनामुपलक्ष्य इत्थं तां निवारयति :—

न मां ब्रूयुरधर्मिष्ठा मूढा ह्यसुहृदस्तथा।
शक्तो नावारयत् कृष्णः संरब्धान् कुरुपाण्डवान् ।।
—उद्योग ९३।१६

पुरुषाणामित्थंभूता वाचो ध्रुवं प्रचरिष्यन्ति यत् संरब्धैः क्रोधाभिभूतमानसैः कुरुपाण्डवैर्यदि युद्धाद् विरतिर्न विहिता, तत्तु सन्धातुं शक्यम्। परन्तु प्रवीणो राजनीतिपटुः सर्वविधकार्यशक्तिसम्पन्नोऽपि कृष्णः तान् युद्धान्न निवारयामासेति श्रवणकटुं वाणीं को नाम आवारयितुं शक्तः यदि दौत्यकर्मणि उद्योगो मया विहितो न स्यादिति। श्रीकृष्णः स्वदौत्यकार्यस्योद्देश्यं स्फुटगम्भीरशब्दैरित्थमभिव्यनक्ति—

अहापयन् पाण्डवार्थं यथावत्
शमं कुरूणां यदि चाचरेयम् ।।
पुण्यं च मे स्यात् चरितं महात्मन्
मुच्येरँश्च कुरवो मृत्युपाशात् ।।

विदुरं प्रति श्रीकृष्णस्योक्तिरेषा। उभयोः कुरुपाण्डवयोर्मङ्गलभावनाऽस्यामुक्तौ प्रतिपदं स्फुटी भवति। पाण्डवानां मूलभूतार्थस्य सम्यक्सिद्धया साकं कुरूणां युद्धाद् उपराम एव दौत्यकर्मणो मुख्यं तात्पर्यम्। अत एव पाण्डवानां विजयं धर्मोपेतैरुपायैः साधयितुमेव कृष्णस्य सर्व आसीदुद्योगप्रवाहः। पाण्डवानां पक्षपाती कृष्णः इत्थंभूतव्यतिकरे किं

कश्चिदेवं मन्तव्यं प्रकाशयितुमर्हति ? पक्षपातस्य बिन्दुरपि तस्मिन् महापुरुषे नहि कथमपि पातनीयो भवेदिति नूनं मम विश्वासः।

श्रीकृष्णस्तु शान्तिवादी राजनीतिज्ञ आसीत्। आसीत् शान्तिपक्षे एव तस्याग्रहः, युद्धपक्षात् तु तस्य नितान्तं वैमुख्यमिति मतं उद्योगपर्वणः समीक्षणेन निर्धारयितुं सर्वोऽपि पारयति विपश्चित्। शोभनेयं तस्य युद्धस्य निन्दापरा सूक्तिः—

न युद्धे तात कल्याणं न धर्मार्थौ कुतः सुखम्।
न चापि विजयो नित्यं न युद्धे चेत आधिथाः॥
—उद्योग १२६।४०

युद्धे कस्यापि पक्षस्य कल्याणं नैव भवति। युद्धेन न धर्मोऽवाप्यते न वा अर्थ उपलभ्यते। धर्मार्थमूलत्वादेव सुखस्य धर्मार्थयोरभाव प्रयुक्तः सुखाभावसिद्धिरिति उन्नेतुं नूनं पार्यते। 'न चापि विजयो नित्य'मित्यत्र नित्यशब्दस्य प्रयोगः विजयस्य कादाचित्कत्वं द्योतयति। न धर्मार्थौ कुतः सुखमित्यत्र 'कुत' शब्दस्य प्रयोगः सुखस्य धर्मार्थमूलत्वं ध्रुवमभिव्यनक्ति।

उद्योगपर्वणः पञ्चाधिकनवतितमेऽध्याये वर्णितं कौरवसभां प्रविश्य राजसिंहासनारूढं धृतराष्ट्रमुद्दिश्य नितान्तगौरवपूर्णं राजनीतिनैपुण्यावभासकं श्रीकृष्णेन कृतं भाषणं राजनीतिप्रचुरेऽप्यस्मिन् युगे पठ्यमानं स्वीयोदात्तभावसम्पत्या उत वा स्वीयदण्डनीतिकौशलाविष्करणयुक्त्या समीक्षकाणां चेतः सुसविस्मयभरमाह्लादं जनयितुमलमिति नूनं वक्तुं पारयामः। धर्मस्याऽऽचरणमेव राजन्यानां प्रथमं कर्तव्यमित्युपदिशता महामतिना श्रीकृष्णेन धर्मस्य माहात्म्यं सभासदामाचारश्चेत्थं प्रतिपादिते—

यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः॥
विद्धो धर्मो ह्यधर्मेण सभां यत्र प्रपद्यते
न चास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः॥
धर्म एतानारुजति यथा नद्यनुकूलजान्॥
—उद्योग ९५।४८-५०

श्लोकानामयमेव निष्कर्षः यद् राजनि धर्मपक्षमनादृत्य अधर्मैकपक्षपातिनि सति तन्मताभिभावकाः सभासदोऽपि तथैव दूष्या भवन्ति। न केवलं धृतराष्ट्र एव अन्यायाचरणैकरसिकेषु स्वसूनुषु सत्सु दोषभाक्, अपि तु तत्सभासदो भीष्मद्रोणकृपाचार्यादयोऽपि विश्व एव दोषभाजिन इति श्रीकृष्णवचनानामभिमतं लक्ष्यम्।

श्रीकृष्णस्तु पाण्डवानामेव कल्याणमित्रमासीदिति कथनं तु प्रायोवादः। स कौरव-पाण्डवयोरुभयोरपि पारस्परिकं सौहार्दं दृढां मैत्रीं च हृदयेनाकामयत्त इत्येव समग्रं तथ्यम्। धृतराष्ट्रमुद्दिश्य तस्येयं वाचो युक्तिरौचित्येन समेषां समीक्षकाणां चेतांसि बलादाकर्षतीव। श्रीकृष्णः कौरवाणां पाण्डवानां च मिथोऽभिवर्धिष्णु सौहार्दं विग्रहपरिहारञ्च नूनं कामयमानः स्वपक्षमित्थं प्रस्तौति—

वनं राजा धृतराष्ट्रः सपुत्रो
व्याघ्रास्ते वै संजय पाण्डुपुत्राः।
मा वनं छिन्धि सव्याघ्रं
मा व्याघ्राऽनीनशन् वनात्॥

उद्योग २९।५४

पुत्रशतेन समन्वितो धृतराष्ट्रो बृहतो वनस्य प्रातिनिध्यं करोति। पाण्डुपुत्राः पाण्डवास्तु व्याघ्राणां प्रातिनिध्यं विदधते। वनव्याघ्रयोरियमुपमा नितान्तमौचित्यपूर्णा हृदयग्राहिणी चेति। व्याघ्रेण वनस्य शोभैव न भवति, अपितु रक्षणमपि। तथैव वनेनापि व्याघ्रस्य नूनं संरक्षणं विधीयते। वनव्याघ्रौ परस्परमुपकार्योपकारकभावसम्पन्नौ। वनेन विरहितो व्याघ्रः संरक्षणसाधनमन्तरेण वध्यते। व्याघ्रेण विना वनमपि पामरजनैर्व्याघ्रोपस्थितिशून्यात् निर्भयमानसैः सद्भिः परशुना छिद्यते। तस्माद्धेतोः वनस्य रक्षणं व्याघ्रेण विधेयम्, व्याघ्रस्य च पालनं वनेन कर्तव्यमिति जागर्ति कापि व्यावहारिकी नीतिः—

निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनम्
तस्माद् व्याघ्रो वनं रक्षेद् वनं व्याघ्रं च पालयेत्।

—तत्रैव श्लोक ५५

श्रीकृष्णस्योपदेशानामयं सिद्धान्तः: कौरवैः पाण्डवैश्च संभूयैव परस्परं कल्याणादिसाधनं सहयोगेन विधेयम्। उभयोर्मङ्गलसाधनं सहैव परस्परोपकार्योपकारकभावमाश्रित्यैव विधातुमर्हति। पाण्डवानवमत्य कौरवाणामुदयो भविष्यतीति विश्वास एव खपुष्पतां धत्ते। उभयोः संरक्षणं समकालिकमेव। यथा वनस्य छेदनमपि मा भवतु व्याघ्रस्य नाशोऽपि मा संजायतामित्यत्र राजनीतिर्वर्तनीयेति धृतराष्ट्रं प्रति श्रीकृष्णवचसामाशयः।

अन्यच्च वृक्षलतादृष्टान्तेनामुमेवार्थं तर्केण पुपोष तत्र भगवान् श्रीकृष्णः। वृक्षाणां लतानां परस्परं उपकार्योपकारकभावः समुपजृम्भते इत्यत्र न बहु वक्तव्यं नाम। वृक्षमाश्रित्यैव लतानां स्थितिः, तदभावे आधाररहिता लता ध्रुवमेव विलयं भजन्ते। तथैव वृक्षस्य शोभापि

लतामूलिकेति प्रत्यक्षमेव दर्शकानाम्। फलतः लतावृक्षयोः परस्परं सहयोग एव कार्यकारी। तयोर्वियोगस्तु महान्तमनर्थं प्रसूते इत्यर्थमभिव्यज्य कौरवाणां पाण्डवानां च पारस्परिकं सहयोगमेवाचकाङ्क्षे श्रीकृष्णः—

लताधर्मा धार्तराष्ट्राः शालाः सञ्जय पाण्डवाः।
न लता वर्धते जातु महाद्रुममनाश्रिता॥

पाण्डवास्तु कौरवान् शुश्रूषितुं स्थिताः, पक्षे तैः साकं योद्धुं स्थिताः। कौरवैः साकं शान्तिमेव समाकाङ्क्षन्ते पाण्डवाः परन्तु एषः शान्तिप्रस्तावः दुर्बलानां न वर्तते, अपि तु अरिन्दमानां बलमाश्रित्य शत्रूणामुच्छेतॄणां पाण्डवानां प्रस्तावमिमं धृतराष्ट्रः सर्वथा स्वीकर्तुमर्हति—

स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः।
यत् कृत्यं धृतराष्ट्रस्य तत् करोतु नराधिपः॥

उद्योगपर्वणि पञ्चाधिकनवतितमेऽध्याये श्रीकृष्णस्य राजनीतिमयं भाषणं शान्तेन मनसा साम्प्रतमपि विचारणीयं वर्तते तदुद्योगविदूषकाणां केषाञ्चन ऐतिहासिकब्रुवां पण्डितानाम्। युद्धस्य भयङ्करतां दुःखोदर्कं च स स्पष्टैः शब्दैर्व्याचख्ये, पाण्डवानां शान्तिभावं च विशदं प्रकटी चकार— तस्य केचन मार्मिका मतोपन्यासशीलाः श्लोकाः समुद्ध्रियन्ते—

संयुगे वै महाराज! दृश्यते सुमहान् क्षयः।
क्षये चोभयतो राजन् कं धर्ममनुपश्यसि॥२८॥
पाण्डवैर्निहतैः संख्ये पुत्रैर्वापि महाबलैः।
यद् विन्देथाः सुखं राजन् तद् ब्रूहि भरतर्षभ॥२९॥

× × ×

अहं तु तव तेषां च श्रेय इच्छामि भारत॥६०॥
धर्मादर्थात् सुखाच्चैव मा राजन् नीनशः प्रजाः।
अनर्थमर्थं मन्वानोऽप्यर्थं चानर्थमात्मनः॥६१॥
लोभेऽतिप्रसृतान् पुत्रान् निगृह्णीष्व विशांपते।
स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः।
यत्ते पथ्यतमं राजन्! तस्मिन् तिष्ठ परंतप॥६३॥

भाषणस्यास्य प्रभावोधार्तराष्ट्राणामुपरि विपरीत एव जातः। उभयोः कल्याणकामी श्रीकृष्णः शोभनां युद्धोपरतिपरमां राजनीतिमुपदिदेश, परन्तु फलं तु विपरीतमेव संजातम्। क्व च सन्धिमयोपदेशः श्रीकृष्णस्य क्व च तं निगडैर्नियन्तुं समुद्योगो दुर्योधनस्य। हा हन्त विपरीता मतिः पुत्रासक्तिपरायणस्य कौरवराजस्य धृतराष्ट्रस्य।

राजसूयावसानेऽग्रपूजाप्रसङ्गे भीष्मपितामहस्य श्रीकृष्णगुणोत्कर्ष-प्रकाशकानि वचनानि अवश्यं साम्प्रतम् अनुसन्धानमर्हन्ति—

वेदवेदाङ्गविज्ञानं बलं चाभ्यधिकं तथा ।
नृणां लोकेहि कोऽन्योऽस्ति विशिष्टः केशवादृते ।।
एकतो वा जगत् कृत्स्नमेकतो वा जनार्दनः ।
सारतो जगतः कृत्स्नादतिरिक्तो जनार्दनः ।।
भस्म कुर्याज् जगदिदं मनसैव जनार्दनः ।
न तु कृत्स्नं जगत् शक्तं भस्म कर्तुं जनार्दनम् ।।
यतो सत्यं यतो धर्मः यतो ह्रीरार्जवं यतः ।
ततो भवति गोविन्दो यतः कृष्णस्ततो जयः ।।

सत्यप्रतिज्ञस्य भीष्मपितामहस्यैतानि वचांसि नहि अक्षरेणापि मिथ्या भवितुमर्हन्ति । सत्यमेव श्रीकृष्णः सत्यस्य धर्मस्य ह्रिया आर्जवस्य च मूर्तिरासीत् । यं पक्षमाश्रयते श्रीकृष्णः, स पक्षो नूनं विजयी भवतीति सभापर्वणि भीष्मपितामहस्य वचनं महाभारतीयसंग्रामस्य पाण्डवपक्षीयं साफल्यं युद्धारम्भात् पूर्वमेव प्रकटीचकार ।

श्रीकृष्णो न केवलं राजनीतिज्ञ एवाऽऽसीदपि तु स कूटनीतिज्ञोऽपि बभूव । साध्यसाधनयोरैकरूप्ये यत् खलु वर्तते राज्ञो वर्तनं सा तु राजनीतिः । सति साध्यसाधनयोर्वैरूप्ये यः खलु शासकानां व्यवहारः, सा तु कूटनीतिः । श्रीकृष्णस्तु समकालमेव राजनीतेः कूटनीतेश्च मर्मज्ञो बभूव । इत्थं श्रीकृष्णे राजनीतिकौशलं धर्मपक्षस्याऽऽश्रयणं भारतराष्ट्रे सार्वत्रिकमङ्गलप्रसूतेः सार्वभौमशान्तेश्च दृढतरा कामना च समुपजृम्भन्ते स्म । एतानि वृत्तानि परीक्ष्यमाणानां हृदि श्रीकृष्णस्य लौकिकचरितस्यापि विशदं महत्त्वं स्थानमाधास्यतीति दिक् ।

# मूलसंस्कृतमत्स्यपुराण-तदनुवादभूतद्रमिळमत्स्य-पुराणयोः साम्य-वैषम्य-विवरणपट्टिका*

एस० श्रीनिवासशर्मा

## CONCORDANCE OF THE AGREEMENT AND DIFFERENCES BETWEEN THE SANSKRIT MATSYA PURĀṆA TEXT AND ITS TAMIL TRANSLATION

*Compiled by*

SRI S. SRINIVASA SARMA

● ● ●

[In the inaugural number of the *Purāṇa* (I. 1. July 1959, pp. 42–47), I dealt with 'An Unique Two Khaṇḍa Version of the Matsya Purāṇa', available in a Grantha ms., and the Tamil version of the *Matsya* of *c.* 1700 A. D. which is also in two khaṇḍas and shows agreement with this Grantha ms. and differences from the vulgate Matsya in Āss. etc.

In the present contribution, a detailed comparison of the Matsya, vulgate text and the Tamil version and a concordance of correspondences and differences between the two are tabulated.

One of the major differences of the two texts relates to the story of Hiraṇyakaśipu and Narasiṁha, which is in three chapters in the vulgate and takes 18 in the Grantha; the analysis of this portion is given separately.

V. R.]

---

* डा० वे० राघवार्याणां निर्देशानुसारं संस्कृतद्रमिलविदुषा श्री एस्० श्रीनिवासशर्मणा सन्दृब्धा ।

Compiled by Sri S. Srinivasa Sarma, Vidvan in Sanskrit & Tamil under the guidence of Dr. V. Raghavan.

**संस्कृतमत्स्यपुराणम्—**

**अध्यायः—१**

**श्लोकः** ( ९ )

अत्र मनुर्नाम नृपः पुत्रे राज्यं समारोप्य मलयाचलं गत्वा उत्तमं योगं प्राप्तवान् इत्युक्तम् ।

मनोः राज्यपरिपालनक्रमः अत्र नोक्तः । नृपः वार्धक्ये स्वभार्यया सह तपश्चरणाय वनं गतः इत्यपि वृत्तान्तः अत्र नास्ति ।

**श्लोकः** ( ११ )

अत्र नृपः तपश्चचार । वर्षायुतशते गते तपसा प्रीतः कमलासनः तस्य पुरतः आविर्भूय 'वरं वृणीष्व' इति अवदत् । नृपः पितामहं प्रणम्य एकं वरमवृणोत् इत्येव उच्यते ।

( १७-२२ )

मत्स्यस्य प्रमाणवृद्धिः तस्यकूपगङ्गासमुद्रादिप्रक्षेपः वर्णितः ।

( २५-३२ )

भगवतः उत्तरं, भविष्यत्प्रलयवार्ता, रक्षणार्था नौ, तत्र मनुना कर्तव्यम्·········

**द्रमिलमत्स्यपुराणम्—**

**अध्यायः—१**

**पद्यम्** ( ४ )

अयं विषयः अत्र समानः ।

अत्र तु नृपः स्वराज्ये सर्वाः प्रजाः स्वाः प्रजा इव ररक्ष । मातेव सः सर्वान् प्रीत्या पर्यपालयत् । सः नीतिमान् सर्वभूतेषु हितश्चासीत् । सः सविशेषं सर्वान् पालयित्वा सर्वसुखानि चानुभूय वार्धक्ये स्वसुतं राज्येऽभिषिच्य तपश्चरणाय स्वदेव्या सह मलयाचलं ययौ इति वर्णितम् । अयं विषयः अधिकः ।

**पद्यम्** ( ५-६ )

अत्र तु वर्षायुतशते गते नृपस्य तपसा प्रीतः धाता हंसारूढः, देवैः, विद्याधरैः, गन्धर्वैः, सिद्धैः, मुनिभिश्च सह आविर्बभूव । नृपः तं दृष्ट्वा अतीव सन्तुष्टः 'अद्य तपसः फलं मया लब्धम्' इति मेने । तस्य रोमाञ्चो जातः । आनन्दबाष्पगद्गदकण्ठः स नृपः तं प्रणम्य वरमवृणोत् इत्ययं विषयः अधिकः ।

( ९-११ )

इमे विषयाः अत्र समानाः ।

**अध्यायः—१**

**श्लोकः ( १५ )**

कदाचित् सः नृपः पितृतर्पणं चकार इत्यत्रोच्यते ।

आश्रमे तपश्चरणं नोक्तमत्र ।

**श्लोकः ( २३-२५ )**

अखिलं समुद्रं व्याप्य समुपस्थितं मत्स्यं विलोक्य भीतः मनुः एवं वदति—

किं त्वं असुरेश्वरः अथवा वासुदेवः ? अन्यः एवं कथं भवेत् ? ईदृशं महद्वपुः कस्य भवेत् ? हे केशव त्वमेव मत्स्यरूपेणागतः ? जगन्नाथ नमोऽस्तु ते' इति ।

**पद्यम्—( ७ )**

वरं प्राप्य आश्रममागतः स नृपः दीर्घं पावनं तपस्समातिष्ठत् । तस्य च तपसि वर्तमानस्य बहूनि दिनानि व्यतीयुः । एकस्मिन् दिने सः पितृतर्पणं चकार । अत्र वरप्राप्त्यनन्तरं आश्रमे सुचिरं तपश्चचार—इत्ययं विषयः अधिकः ।

**पद्यम्—( १२-१५ )**

अत्र तु भीतः नृपः एवमचिन्तयत्—

मत्स्यरूपेण आगतोऽयं दानवेश्वरो वा, तिमिरोन्मथनः सप्ताश्वः, मरीचिमान् भास्करो वा, सहस्राक्षः देवेन्द्रो वा, कमलासनः चतुराननो वा, चक्रपाणिः वनमाली वा इति ।

बहुधा पुनः पुनः चिन्तयित्वा अन्ते सः नवनीतप्रियः जलशायी वासुदेव एवेति निश्चित्य तं प्रणम्य एवं वदति—

'महाद्युतये, ज्ञानरूपिणे, अखिलाण्डस्वरूपाय, इष्टरूपधारिणे, शेषशयनाय, योगनिद्रापराय, धृतदशविधरूपाय, नक्रगृहीतगजेन्द्ररक्षकाय, तुभ्यं नमः । त्वां शरणं गतोऽस्मि । प्रसीद मह्यम्' इति ।

**अत्र अयं विषयः अधिकः ।**

**अध्यायः—२**

(१-१५)

मनुना अवान्तरप्रलयविषयकप्रश्नः—भगवता तद्वर्णनम्—तदानीं मनुना कर्तव्यम्—अवान्तरप्रलयः—तत्र मत्स्यरूपिणः भगवतः प्रादुर्भावः—तस्य शृङ्गे मनुना नौबन्धनम् ।

(२१-२४)

ततः मनुः मत्स्यरूपिणं हरिं प्रणम्य उत्पत्तिप्रलयादि-अपृच्छत् ।

यदुक्तं मत्स्यरूपिणा भगवता तदेव मत्स्यपुराणमभवत् । पुराणस्य विषयसंग्रहः—(२१-२४)

सृष्टिकर्तुः पितामहस्य प्रादुर्भावः—२५-३६

ब्रह्माण्डोत्पत्तिश्च

**अध्यायः—३**

अत्र ब्रह्मणः सकाशात् मरीच्यादिदशमानसानाम् उत्पत्तिः । सांख्यप्रक्रियानुसारेण तत्त्वसृष्टिः, पञ्चविंशतितत्त्वसृष्टिः—कपिलस्मरणं च । ततः स्वदेहात् शतरूपायाः कन्यायाः सृष्टिः । तां प्रति कामाविष्कारः । तयोः पुत्रत्वेन स्वायंभुवमनोः प्रादुर्भावः । तस्य विराड्त्वमधिपूरुषत्वं च—ततो वैराजादीनां सृष्टिः ।

**अध्यायः—२**

अत्र इमे विषयाः समानाः ।

**अध्यायः—३**

एते विषयाः अत्र समानाः ।

अध्यायः—४

श्लोकः ( १३-१६ )

ब्रह्मशापं प्राप्तः मदनः चतुर्मुखं प्रसादयित्वा एवं वदति—

"चतुरानन कारणं विना मां शप्तुं त्वं नार्हसि। त्वयैवाहं एवंविधः सृष्टः। स्त्रीपुंसोः अविचारेण सर्वेषामेव देहिनां मनः प्रयत्नेन क्षोभ्यमेवेति पूर्वं त्वयैवोक्तम्। अत एवाहं सर्वेषां इन्द्रियक्षोभजनकोजातः। तेनैव कारणेन भवतोऽपि मनः मम शरैः संक्षोभितम्। तस्मादहं अनपराधी। तथापि त्वया शप्तोऽस्मि। भगवन् प्रसादं कुरु" इति।

एवमत्र मदनप्रार्थना सविस्तरं वर्णिता।

श्लोकः (२२)

मनुः मत्स्यं विलोक्य "कोऽसौ यदुरिति प्रोक्तः यद्वंशे कामसम्भवः" इति अपृच्छदिति अत्रोक्तम्।

श्लोकः (३६)

अत्र ध्रुवः वर्षसहस्राणि त्रीणि तपश्चचार इत्युच्यते।

श्लोकः (३९)

अत्र सुच्छाया कृपादीन् पञ्च सुतान् सुषुवे इत्युच्यते।

अध्यायः—४

पद्यम्—( ६ )

शापात् भीतः मन्मथः कमलासनं प्रति "हे भगवन् सर्वेषां देहिनां इन्द्रियक्षोभजनकं क्षुद्रं कर्म त्वयैव मह्यं दत्तम्। अतः प्रसीदतु भवान्" इति उक्त्वा तं ननाम इति अत्रोच्यते।

अत्र मन्मथोक्तिः न्यूनीकृता।

पद्यम् (९)

अत्र तु त्वयोक्तः यदुः कः ? इति प्रश्नः नोत्थापितः।

पद्यम् (१६)

अत्र तु ध्रुवः वर्षसहस्राणि तपश्चार इति केवलमुक्तम्।

पद्यम् (१७)

अत्र तु कृपस्य नामैव नास्ति। कृपस्य स्थाने रिपुः इति पुत्रः उक्तः।

**अध्यायः—७**

**श्लोकः (१९-२०)**

अत्र मदनद्वादशीव्रतानुष्ठानक्रमः सविस्तरं वर्णितः ब्राह्मणान् श्रेष्ठान् भोजयित्वा दक्षिणां दद्यात्। तदा इमं मन्त्रमुदीरयेत्।

प्रीयतामत्र भगवान् कामरूपी जनार्दनः। हृदये सर्वभूतानां य आनन्दोऽभिधीयते॥

एवं मत्र एकः मन्त्रः उक्तः।

**श्लोकः (२५)**

"कामनामानि कीर्तयित्वा शुक्लतिलादिभिः होमः कर्तव्यः" इत्यत्र होमकरण प्रकारः उक्तः। कामनाम कीर्तनम् आवश्यकमिति ज्ञायतेऽत्र।

**श्लोकः (२७)**

मदनद्वादशीव्रतं विधिना यः कुर्यात् सः सर्वपापविनिर्मुक्तः भवतीत्यत्र निर्दिष्टम्।

**श्लोकः ( ४४ )**

गर्भिणीनियमवर्णने सर्वौषधीभिः कोष्णेन वारिणा गर्भिणी स्नानं आचरेत् इति अत्रोच्यते।

**अध्यायः—७**

**पद्यम्—(११)**

अत्र विप्रेभ्यः दक्षिणां दद्यात् इत्येव उक्तम्। दक्षिणादानसमये वक्तव्यः मन्त्रः अत्र नोच्यते।

**पद्यम्—(१२)**

सिततिलादिभिः द्रव्यैः होमः कर्तव्यः। तदा मन्त्रोऽपि वक्तव्यः। एवं होमे क्रियमाणे मन्त्रः वक्तव्यः इत्युक्त्वा कामनामकीर्तनकर्म नोक्तमत्र।

**पद्यम्–( १३ )**

अत्र तु 'सर्वपापविनिर्मुक्तः भवेत् व्रतानुष्ठाता' इति नोक्तम्। किन्तु खेदेभ्यः मुच्येत इति केवलमुक्तम्।

**पद्यम्–(२०)**

अत्र तु धान्यमिश्रिते जले स्नातव्यमित्येव उक्तम्। कोष्णे जले स्नातव्यं इति नोक्तम्।

श्लोकः (५२-५३)

त्रिभिः दिवसैः न्यूने वर्षशतान्ते दितिः प्रीत्या विस्मित-मानसा आत्मानं कृतार्थां मेने। अतः ईषत् अश्रद्धा जाता। तेन कारणेन पादयोः शौचम् अकृत्वा प्रसुप्ता इत्यत्र कथितम्।

श्लोकः—(५६-६१)

नियमविकलां निद्रितां दितिं विलोक्य इन्द्रः दितेः गर्भं वज्रेण सप्तधा चक्रे। रुदन्तः ते सप्त बालाः इन्द्रेण निषिद्धाः। भूयोऽपि रुदतः तान् एकैकं सप्तधा चिच्छेद।

पुनः ते सर्वेऽपि रुरुदुः।

इन्द्रः 'मा रोदिष्ट' इति निवारयामास। सः इन्द्रः, कस्य धर्मस्य प्रभावात् पुनस्ते सञ्जीविताः इति चिन्तयामास। ततः ध्यानयोगेन मदनद्वादशीफलं विदित्वा कृष्णपूजनात् तथा परिणतमिति ज्ञातवान्। वज्रेण हता अपि ते न नश्येयुः। ततः अवध्याः ते देवाः भवन्तु इति मेने इत्यत्र वर्णितम्।

पद्यम्—(२४)

अत्र तु वर्षशतान्ते दितिः पादयोः शौचमकृत्वा मुक्तमूर्धजा-निद्रामकरोत् इत्युक्तम्।

पादशौचविस्मृतिकारणं न निर्दिष्टम्। प्रीत्या विस्मित-मानसा—इत्ययं विषयश्च परित्यक्तः।

पद्यम्—(२६-२७)

अत्र इन्द्रः दितिगर्भं वज्रेण सप्तधा अकरोत् इत्युच्यते।

किन्तु 'ते बालाः एकोनपञ्चाशद्भूत्वा भृशं रुरुदुः। तदा इन्द्रः मा रोदिष्ट इति तान् निवारयामास' इत्ययं विषयः नोक्तः। केन वरेण एवमभूत् इति इन्द्रः अचिन्तयत्। ज्ञानदृष्ट्या तत् द्वादशीफलं ज्ञात्वा 'ते देवाः भवन्तु' इत्युवाच इन्द्रः इत्यत्र उच्यते।

अन्ये विषया त्यक्ताः।

अध्याय:—७

श्लोक:—( २,३ )

आधिपत्याभिषेचनप्रकरणे ये येषामधिपाः कृताः इत्ययं विषयः निर्दिष्टः। अत्र ओषधीनां, यज्ञव्रतानां, तपसां, नक्षत्रताराद्विज-वृक्षगुल्मलतावितानस्य च चन्द्रम् अधिपं चकार ब्रह्मा इत्युक्तम्।

श्लोक:—( ५ )

अत्र यमं पितॄणामधिपं चकार इत्युक्तम्।

श्लोक:—( ६ )

गिरीणामधिपं हिमवन्तमकरोत् इति अत्र निर्दिष्टम्।

श्लोक:—( १० )

पश्चिमायाः दिशः केतुमन्तम् अधिपं चकार इत्यत्रोच्यते।

अध्याय :—१०

श्लोक:—( ३–७ )

अङ्गो नाम प्रजापतिः मृत्युपुत्रीं सुनीथां परिणीतवान्। सुनीथायां तस्य वेनो नाम सुतः जातः। बलवान् अधर्मनिरतः सनृपः परजायापहारकः जातः। जगतः धर्माचारस्य सिद्ध्यर्थं महर्षिभिः अनुनीतोऽपि यदा धर्माचरणे सः अनुज्ञां न ददौ तदा शापेन तं मारयित्वा अराजकभयाकुलाः विप्राः तस्य देहं बलात् ममन्थुः—इत्यत्रोच्यते।

अध्याय :—७

पद्यम्—( २,३ )

अत्र तु सस्ययागव्रतानां तारकाद्विजपादपानां च इन्द्रम् अधिपं चकार इत्युच्यते। तपसां, गुल्मलतावितानस्य च चन्द्रः अधिपः जातः इति संस्कृतपुराणे निर्दिष्टः विषयः अत्र त्यक्तः।

पद्यम्—( ६ )

अत्र तु ब्रह्मा पितॄणामधिपः जातः इत्युच्यते।

पद्यम्—( ६ )

अत्र तु मेरुपर्वतमेव गिरीणामधिपं चकार इत्युच्यते।

पद्यम्—( १० )

अत्र तु सुकेतुमधिपमकरोत् इत्युक्तम्।

अध्याय :—१०

पद्यम्—(३,४,५)

संस्कृतपुराणे अङ्गाख्यः प्रजापतिः मृत्योः तनयां परिणीतवान् इत्युक्तम्। अत्र तु दमो नाम नृपः मृत्युकुमारीं सुनीकां उदवहत् इत्युच्यते। किं च सुनीकापुत्रः वेनः कामातुरः स्त्रीभिः सह सदा भोगाननुभवन् कालमनयत् वृथा। अतः मुनयः तस्य कायं ममन्थुः इत्येवोक्तमत्र।

अन्ये विषयाः त्यक्ताः।

**श्लोक :—( ७-१० )**

मथ्यमानात् वेनशरीरात् मातुरंशेन कृष्णाञ्जनसमप्रभाः म्लेच्छजातयः निपेतुः । धर्मचारिणः पितुरंशेन दक्षिणहस्तात्, सधनुः, सशरः, गदी, सरत्नकवचाङ्गदः, दिव्यतेजोमयवपुः पृथुनामकः पुरुषः जातः—इत्युक्तमत्र ।

**श्लोक :—( ११-१२ )**

निःस्वाध्यायवषट्कारं, निर्धर्मं भूतलमवलोक्य अमितविक्रमः पृथुः कोपात् शरेण दग्धुमेव उद्यतः इत्यत्रोच्यते ।

**श्लोक :—( १२-१४ )**

गोरूपमास्थाय पलायितवती भूमिः एकत्र स्थित्वा किं करोमि इति नृपमब्रवीत् । तदा नृपः सर्वस्य जगतः ईप्सितं देहीति अवदत् इत्यत्रोक्तम् ।

**श्लोक :—( २९-३० )**

पृथौ राज्यं प्रशासति सर्वे आयुष्मन्तो धनवन्तः सौख्ययुक्ताश्च अभवन् । किं च तस्य राज्ये दरिद्रो वा, रोगी वा, पापकृद् वा न दृष्टः । उपसर्गभयं नासीत् । सर्वे नराः दुःखशोकविवर्जिताः

**पद्यम्—( ५ )**

अत्र तु एवमुच्यते—

मथ्यमानात् वेनवामसक्थिस्थलात् म्लेच्छाः जाताः । दक्षिण-हस्तात् सधनुः, सशरः, सकवचः पृथुः अजायत इति । मातुरंशेन-म्लेच्छाः कृष्णाञ्जनसमप्रभाः जाताः इति नोक्तम् । पितुरंशेन पृथुः जातः इति च नोक्तम् । अन्ये विषयाश्च त्यक्ताः । वामोरोः म्लेच्छानामुत्पत्तिः अत्रोच्यते । संस्कृतपुराणे एवं न निर्दिष्टम् ।

**पद्यम्—( ६-७ )**

अधर्मनिरतस्य कामातुरस्य वेनस्य दुश्चरितमसहमाना वसुन्धरा भूतले दारिद्र्यमजनयत् । तेन कुपितः पृथुः स्वश-राग्निना भूमिं दग्धुमुद्यतः इत्यत्रोच्यते । अत्र निर्धनतायाः कारणं व्यक्तं प्रदर्शितम् ।

**पद्यम्—( ७ )**

गोरूपेण पलायितुमुद्यतां भुवं नृपः अनुगतः । तदा भूमिः पृथुमवलोक्य 'भो नृप हिंसां मा कुरु । तवेप्सितं वद' इत्युवाच । 'सर्वेभ्यः भोजनं दीयताम्' इति नृपः प्रत्युवाच इत्यत्रोच्यते ।

**पद्यम्—( १७ )**

पृथुभूपेन परिपालिते राज्ये सर्वे जनाः भयहीनाः, रोगशोक-विवर्जिताश्चासन् । तत्र न कोऽपि पापकृत् दृष्टः । विद्वेषः न जातः । सर्वे दुःखसंतापप्रतिबन्धवर्जिताः आसन् इत्यत्र

नित्यं प्रमुदिताः आसन्—इत्यत्र पृथुभूपस्य राज्यपरिपालनोत्कर्षः निरूपितः ।

**अध्यायः—११**

**श्लोकः—(१०-१५)**

छाया स्वसुते अधिकं स्नेहं चक्रे । संज्ञासुतः यमः तन्न चक्षमे । अतः क्रोधमूर्छितः सः यमः स्वदक्षिणपादमुद्यम्य तर्जयां चक्रे ।

तदा क्रुद्धा छाया तं यममशपत् । ततः यमः स्वजनकमुपसृत्य देव, सकोपया मात्रा निष्कारणमहं शप्तः । मातृवञ्चनामसहमानोऽहं क्रुद्धः अभवम् । अतः क्रुद्धेन मया बालभावात् सकृत् चरणः किंचिद् उद्यतः ।

सा तु मां सद्यः शशाप । यतः पुत्रं मां शशाप अतः सा प्रायः अस्माकं माता न भवेत्" इत्युवाच इति अत्र वर्ण्यते ।

**श्लोक :—( १५-१६-१७ )**

यमस्य वचनं श्रुत्वा विवस्वान् "महामते किं करोमि, मौर्ख्यात् कस्य दुःखं न भवेत्? भवस्यापि कर्मसन्ततिः अनिवार्या । का कथा अन्येषु । मया दत्तः कृकवाकुः त्वत्पादक्रमीन् भक्षयिष्यति । क्लेदं रुधिरं चापनेष्यति । अतः पादे वेदना न भवेत्" इत्युवाच इत्यत्रोच्यते ।

वर्णितम् । "सर्वे नराः दीर्घायुषः, धनैः तुष्टाः, सौख्ययुक्ताः, नित्यं प्रमुदिता आसन्" इत्येषः विषयः अत्र न वर्णितः ।

**अध्यायः—११**

**पद्यम्—(६)**

मातृवञ्चनां ज्ञात्वा यमः खिन्नः अभवत् । ततः क्रुद्धः सः यमः स्वपादमेकमुद्यम्य मातरं छायामुपासरत् । तदा छाया पादमुद्यम्य स्वसमीपमागच्छन्तं यममशपत् । यमः स्वपितरमुपसृत्य मातृशापं निवेदयामास इति केवलमत्रोच्यते ।

यमेन उक्ताः अन्ये विषयाः अत्र परित्यक्ताः ।

**पद्यम्—( ७ )**

यमेन निवेदितं छायाशापं श्रुत्वा सूर्यः तं प्रति "कोपं विहाय गोकर्णतीर्थं गत्वा तपः कुरु । तेन शापविमोचनं भवेत् । ततः श्रेष्ठा पदवी च लभ्येत" इत्याह इत्यत्रोक्तम् । अन्ये विषयाः त्यक्ता ।

श्लोकः—(१८)

यमः **वैराग्यात् फलपत्रानिलाशनः तीव्रं** तपस्तेपे इत्युक्तमत्र ।

(२१)

यमः महादेवात् लोकपालत्वं पितॄणामाधिपत्यं च अगमत् इत्युक्तमत्र ।

(२७-२८)

त्वष्टा सूर्यं विलोक्य एवमुवाच—'अपनेष्यामि ते तेजः यन्त्रे कृत्वा दिवाकर। रूपं तव करिष्यामि लोकानन्दकरं प्रभो' इत्युक्तमत्र ।

(४४-४८)

इलः शर वणं नाम शंभोरुपवनं गतः। उपवनं यदा सः विवेश तदा स्त्रीत्वमाप । तस्य हयोऽपि वडवात्वमाप। पुरुषत्वं सर्वं हृतम्—इत्युक्तमत्र ।

(४८-५१)

इलः इलेति नारी अभवत् । सा पीनोन्नतघनस्तनी, उन्नतश्रोणि-जघना, पद्मपत्रायतेक्षणा, पूर्णेन्दुवदना, विलासोल्लासितेक्षणा मूलोन्नतायतभुजा, नीलकुञ्चितमूर्द्धजा, तनुलोमा, सुदशना, मृदुगम्भीरभाषिणी, हंसवारणगामिनी, कार्मुकभ्रूयुगोपेता वने भ्रमन्ती आसीद् इति अत्र तस्याः सौन्दर्यं वर्णितम् ।

(८)

अत्र तु तपश्चचार यमः इत्युक्तम् ।

(६)

अत्र तु छायाशापविमोचनं कृत्वा वरः दीयतामित्युक्तम् ।

(११)

अत्र तु त्वष्टा सूर्यं दृष्ट्वा "तव उग्रं तेजः देहि" इत्युवाच । सूर्यश्च तथैव ददौ । त्वष्टा तत्तेजः पृथक्चकार इत्युक्तम् ।

(१९)

अत्र तु इलः शरवणं प्राप्य गौरीतीर्थे सन्तोषेण स्नात्वा जलक्रीडां चकार। ततः तीरं गतः सः स्त्रीत्वमाप। हयोऽपि नारीत्वमगात्—इत्युक्तम्।

अयं विषयः त्यक्तः ।

(२०)

अत्र तु सा अतीव रमणीया आसीत् इति उक्तम्। सौन्दर्या-तिशयो न वर्णितः ।

अध्याय :—१२

श्लोकः ( १–८ )

इलम् अन्विषन्तो भ्रातरो बुधाश्रमं प्राप्ताः। तत्र ते सर्वे चन्द्रप्रभं वाजिनं स्त्रीत्वं प्राप्तं ददृशुः सा वडवा रत्नपर्याणकिरण-दीप्त काया, अनुत्तमा आसीत्। पर्याणप्रत्यभिज्ञानात् ते सर्वे विस्मयं प्राप्य मैत्रावरुणिं पुरोधसम् एवमूचुः। वसिष्ठश्च सर्वं ध्यानचक्षुषा दृष्ट्वा एवमुवाच—'शरवणे पुरा दत्तगौरीशापेन अयं हयः राज्ञा सह नारीत्वमगमत्। 'यः पुमान् अत्र शरवणे प्रविशेत् सः नारीत्वं अवाप्स्यति" इति गौरी अशपत्। यथा असौ धनदोपमः पुनः पुरुषतामेति तथा यत्नः कर्तव्यः शिवाराधनेन' इति।

अध्याय :—२५

(८)

सुराणामसुराणां च मिथः ऐश्वर्यं प्रति युद्धः समभूत् इति अत्रोक्तम्।

(१०)

ब्राह्मणौ तौ उभौ नित्यमन्योन्यं भृशं स्पर्द्धिनौ आस्तामिति अत्राख्यातम्।

(१४)

भयोद्विग्नाः देवाः आङ्गिरसस्य ज्येष्ठपुत्रं कचमुपगम्य एव-मूचुः—"भजमानान् भजस्वास्मान् कुरु साहाय्यमुत्तमम्।

अध्याय :—१२

( ३–५ )

अत्र तु इक्ष्वाकुप्रमुखा भ्रातरः तत्रागताः। ते चन्द्रप्रभं हयं विलोक्य नारीत्वं तेन कथं प्राप्तमिति वसिष्ठं पप्रच्छुः। सः तत्कारणमुक्त्वा 'इलोऽपि नारीत्वं प्राप्य बुधेन वसति। शापविमोचनार्थं यूयं शिवाराधनं कुरुत इति' अब्रवीत् इत्युक्तम्।

अध्याय :—२५

(४)

अत्र तु सुराणामसुराणाञ्च महान् सङ्घर्षः अजायत इति आख्यातम्। युद्धकारणं नोक्तम्।

अत्र तु शुक्रबृहस्पतिविरोधो नोक्तः।

(६)

अतीव निरुत्सुका देवा बृहस्पतिपुत्रं कचमुपगम्य "शुक्र-समीपं गत्वा सञ्जीवनीं विद्यां गृहीत्वा आगच्छ। तदैव वयं

अमिततेजसि ब्राह्मणे शुक्रे या सञ्जीवनी विद्या निवसति तां क्षिप्रमाहर। भागभाग् नो भविष्यसि। वृषपर्वनाम्नः असुरस्य समीपे शुक्रं द्रक्ष्यसि। तं शुक्रमाराधयितुं त्वमेव शक्तः। तस्य दयितां देवयानीं तोषयितुं च त्वमेव शक्तः। तस्यां तुष्टायां तु तद्विद्यां शुक्राद् ग्रहीतुं शक्नुयाः" इति। एवं देवैः प्रेषितः कचः शुक्रसमीपं गतः—इत्युक्तमत्र विस्तरेण।

(२१)

कचः असुरेन्द्रपुरे शुक्रं प्रणम्येदमुवाच "अहं अङ्गिरसः ऋषेः पौत्रः। बृहस्पतेः पुत्रः। नाम्नाहं कचः मां शिष्यत्वेनाभ्युपगन्तुं भवन्तं प्रार्थये। भवन्तं चाहं शुश्रूषुरस्मि। हे महर्षे मामेवं कर्तुमनुमन्यतु भवान्" इति। तत् श्रुत्वा "कच, सुस्वागतं तेऽस्तु। तव वचः प्रतिगृह्णामि" इति शुक्रः उवाच इति अत्र उक्तम्।

(४६)

शुक्रः स्वपुत्रीम् एवमुवाच—"पुत्रि कचः प्रेतगतिं गतः। विद्यया जीवितोऽपि एवं हन्यते। किं करवाणि। मा रुद। त्वादृशी मर्त्यं नानुप्रशोचेत्। यस्याः तव मत्तपसः प्रभावात् सर्वमुपस्थितम्। द्विजातिः कचः सञ्जीवितोऽपि भूयः हन्यते। अतः अयं जीवयितुमशक्यः" इति। तत् श्रुत्वा देवयानी "कथमहं न रुद्याम्। कचस्तु सदोत्थितः कर्मसु दक्षश्च। तात, अभिरूपः कचः मे प्रियः। तं विना न भोक्ष्ये। तस्य मार्गमहमपि प्रतिपत्स्ये" इति उवाच।

उज्जीविताः भवेम" इति प्रार्थयामासुः। तत्कृत्यमङ्गीकुर्वन् कचः शुक्रसमीपं गतः—इत्युक्तमत्र। अन्ये विषयाः अत्र त्यक्ताः।

(८)

आगतं कचं दृष्ट्वा शुक्रः "देवगुरोर्बृहस्पतेः पुत्र, सुस्वागतं तेऽस्तु। आगमनकारणं ज्ञातुमिच्छामि" इत्युवाच। ततः कचः तं प्रणम्य "गुरो त्वयि अहं ब्रह्मचर्यं चरिष्यामि। अनुमन्यस्व माम्" इति प्रार्थयामास इत्युक्तमत्र।

(१७)

"तात, सुन्दरः कचः मे प्रियः। सः मां तोषयेत्। सः अतीव समर्थः। तं विना क्षणमपि अहं न जीवेयम्। अतस्तमुज्जीवितं करोतु भवान्" इति देवयानी उवाच इत्युक्तम्। शुक्रस्य वचनानि त्यक्तानि।

( ४९ )

शुक्रेण सञ्जीवनीविद्यया उपहूतः कचः शनैः वाचं जठरे व्याजहार। "केन उपनीतः मम उदरे तिष्ठसि। ब्रूहि वत्स" इति शुक्रः उवाच। कचः एवमुवाच—"भवत्प्रसादात् मां स्मृतिः न जहाति। यथावृत्तं सर्वं स्मरेयम्। असुराः मां हत्वा, दग्ध्वा, चूर्णयित्वा च सुरायां ददुः। एवमसुरैः मारितोऽहं सुरायां भवतः दत्तोऽस्मि। त्वयि स्थिते अत्र आसुरी माया ब्राह्मीं मायां कथं अभिबाधते" इति।

( ५७ )

कुक्षिविदारणेन बहिरागतः कचः पतितं वेदराशिं गुरुम् उत्थापयामास।

(५८)

ततः तं नमस्कृत्य एवमुवाच—"निधीनांनिधिं वराणां वरदं गुरुमर्चनीयं ये नाद्रियन्ते ते पापान् लोकान् व्रजन्ति" इति।

( ६२ )

सुरापानं प्रति जातशङ्कः शुक्रः एवमशपत्—"यः विप्रः अद्यप्रभृति मोहात् सुरां पास्यति मन्दबुद्धिः सः अपेतधर्मः, ब्रह्महा, गर्हितश्च स्यात्। सन्तो विप्राः, देवाः, दैत्याश्च सर्वे इदमुपश्रृण्वन्तु" इति।

( १५–१६ )

अत्र तु देवयानी 'कचः कुत्रगतः इति न ज्ञायते। स च न दृश्यते' इति खेदेन स्वजनकमुवाच। ततः शुक्रः ध्यानचक्षुषा सर्वं दृष्ट्वा एवमुवाच—'कचः मारितः। सः मम उदरे विद्यते' इति।

( २१ )

उदरं भित्त्वा बहिरागतः कचः गुरुं विद्यया उत्थापयामास। ततः कचः गुरुं ववन्दे। प्रीतः शुक्रः तं दृष्ट्वा 'विद्यामुपगतेन त्वया दक्षिणात्वेन मम प्राणाः दत्ताः। अतः अहमतीव तुष्टः' इति उवाच इत्याख्यातमत्र।

( २२ )

अद्यप्रभृति प्रीत्या ये विप्राः मधु पास्यन्ति ते जात्या नीचाः भूत्वा घोरे नरके पतेयुः' इति शुक्रः अशपत् इति उक्तमत्र।

अ—२६

(१-२-३)

गुरुणा विसृष्टं त्रिदशालयं प्रस्थितं कचं देवदानी इदमुवाच— "अङ्गिरसः पौत्र, वृत्तेनाभिजनेन, विद्यया, तपसा, दमेन च भ्राजसे। मम च बृहस्पतिः पूज्यः।

(४-६)

"तपोधन, एवं ज्ञात्वा विजानीहि यद् वदामि। व्रतस्थे, नियमोपेते त्वयि अहं यथा वर्तामि तत् ज्ञायताम्। भक्तां मां त्यक्तुं नार्हसि। विधिवन्मन्त्रपुरस्कृतं मम पाणिं गृहाण" इति देवयानी उवाच। ततः कचः "गुरुपुत्रि, यथा मम पिता तव पूज्यः मान्यश्च तथा त्वं पूजनीयतमा। यथा तवपिता मम गुरुः नित्यं मान्यः तथैव त्वमपि। त्वं नैवं मां वक्तुमर्हसि" इति देवयानीमुवाच। ततः देवयानी "त्वं मम गुरुपुत्रस्य पुत्रः। न मे पितुः पुत्रः। तस्मात् त्वं मम पूज्यः" इति कचमुवाच।

(१०)

देवयानी कचं दृष्ट्वा "त्वयि पुनः पुनः असुरैर्हन्यमाने त्वदर्थं मया प्रीत्या यत् कृतं तत् स्मर त्वम्। मया रक्षितः त्वं मे उत्तमां भक्तिमनुरागं च जानीहि। अनागसं भक्तां मां धर्मज्ञस्त्वं

अ—२६

(३)

त्रिदशावासं गन्तुमिच्छन् कचः देवयानीसमीपं गत्वा 'त्वया अनुज्ञातः गन्तुमिच्छामि' इति अवदत् इत्युक्तमत्र। ततः परं देवयानी तमुवाच "अङ्गिरसः पौत्र......इत्ययं विषयः समानः।

(४)

'इन्द्रियनिग्रहसमर्थः त्वं मां परिणेतुमर्हसि' इति देवयानी कचमुवाच। ततः कचः 'गुरुपुत्री त्वमेवं कथयितुं नार्हसि' इत्युवाच इत्यत्रोक्तम्। अन्ये विषयाः त्यक्ताः।

(५)

भद्रे तव पितुः उदरात् अहमपि जातः अतस्त्वं मे सोदरी भवसि। त्वं पूज्या च भवसि। त्वया अनुज्ञातस्त्रिदशालयं

त्यक्तुं नार्हसि । इति अवदत् । ततः कचः "शुभव्रते, अनियोज्ये नियोगे मां नियुनक्षि । सुभ्रु प्रसीद । शुभे मह्यं त्वं गुरोः गुरुतरा । विशालाक्षि त्वया यस्य शुक्रस्य कुक्षौ उषितं तत्रैव मयापि उषितम् । अतस्त्वं धर्मतः मम भगिनी असि । शुभानने आपृच्छे त्वाम् । अहं गमिष्यामि । मे पथि शिवमस्तु । धर्माविरोधेन स्मर्तव्योऽस्मि । नित्यं मम गुरूमप्रमत्ता, उद्यता आराधय" इत्युवाच ।

(१७-२४)

कचदेवयान्योः परस्परशापप्रदानम् । विद्यासिद्धिर्न भविष्यतीति देवयानीशापः । ऋषिपुत्रः तव पाणिं नैव ग्रहीष्यतीति देवयानीं प्रति कचस्य शापः । कचस्य त्रिदशालयं प्रति गमनम् । देवानां प्रशंसा ।

अध्याय :—२७

( ६ )

वृषपर्वणः पुत्री शर्मिष्ठा व्यतिक्रममजानन्ती देवयान्याः वस्त्रं जगृहे । ततः तयोः मिथस्तत्कृते विरोधः समजायत इति अत्र उक्तम् ।

( ८ ) देवयानी शर्मिष्ठां दृष्ट्वा 'शिष्या भूत्वा त्वं कस्मात् मे वस्त्रं गृह्णासि । समुदाचारहीनायाः ते श्रेयः न भविष्यति' इत्युवाच ।

गन्तुमिच्छामि । अतः क्रोधस्त्यज्यताम् । इति कचः देवयानीमुवाच इति केवलमत्रोक्तम् ।

(६-१०)

अयं विषयः अत्र समानः ।

अध्याय :—२७

( ५-६ )

अत्र तु वृषपर्वसुता शर्मिष्ठा देवयान्याः वासः जगृहे तत् देवयानी न सेहे इति केवलमुक्तम् । व्यतिक्रमं अजानन्ती जगृहे इति नोक्तम् ।

( ६ )

अत्र तु देवयानी 'त्वं मम तुल्या पुनीता नासि । किमर्थं मम वस्त्रं गृहीतवती' इति शर्मिष्ठामवददित्युक्तम् ।

( ९-१३ )

शर्मिष्ठा देवयानीं—"आसीनञ्च शयानञ्च मम पितरं ते पिता नीचस्थः सुविनीतवदभीक्ष्णं स्तौति पृच्छति च। याचतः, स्तुवतः, प्रतिगृह्णतः सुता त्वम्। अहं तु स्तूयमानस्य, ददतः सुता। भिक्षुकि, अनायुधा त्वं सायुधायै मह्यं कुप्यसि। लप्स्यसे प्रतियोद्धारं न च त्वां गणयाम्यहम्" इति उक्त्वा विस्मयं गतां देवयानीं कूपे प्रक्षिप्य तां हतां मत्वा अनवेक्ष्य क्रोधयुक्ता स्वपुरं गता इति अत्रोक्तम्।

(१४-१८)

मृगयार्थं तत्रागतः ययातिः श्रान्तयुग्यः, श्रान्तरूपः पिपासितः समीपे एकं कूपं ददर्श। तस्मिन् कूपे दीप्तामग्निशिखामिव तां कन्यां देवयानीं विलोक्य नृपः ययातिः एवमुवाच—"सुमध्यमे चारुमुखी, श्यामा, सुमृष्टमणिकुण्डला त्वं का? कस्मात् त्वं दीर्घं ध्यायसि आतुरा श्वसिषि च? वीरुत्तृणावृते अस्मिन् कूपे कथं पतिता? त्वं कस्य पुत्री? सर्वं वद" इति।

(१९-२१)

"देवैर्हतान् दैत्यान् विद्यया यः उत्थापयति तस्य शुक्रस्य कन्याहम्। त्वं मां नूनं न बुध्यसे। राजन् एषः ताम्रन-खाङ्गुलिः मे पाणिः। मां गृहीत्वा समुद्धर। त्वं हि कुलीनो

( ७ )

अत्र तु 'मम पितरमागत्य समयं विलोक्य याचतः तव पितुः स्थितिमनालोच्य मां कथं नीचां वदसि। इत्युक्त्वा शर्मिष्ठा देवयानीं ताडयित्वा कूपे प्रक्षिप्य कोपेन स्वपुरं ययौ इत्यत्रोक्तम्। अन्ये विषयाः त्यक्ताः।

(७)

मृगयार्थं तद् वनं गतः नृपो ययातिः कूपे पतितां देवयानीं दृष्ट्वा का त्वं कन्ये? इति अपृच्छत् इति केवलमत्रोक्तम्।

अन्ये विषयास्त्यक्ताः।

(९)

"नृप, मृतान् सर्वान् विद्यया सद्य एव यः उज्जीवितान् करोति तस्य श्रेष्ठस्य शुक्रस्य सुता अहं नाम्ना देवयानी।

मे मतः। त्वां च संशान्तं, वीर्यवन्तं, यशस्विनं जानामि। तस्मात् पतितां मामस्मात् कूपादुद्धर्तुमर्हसि'' इति देवयानी ययातिमवदत्।

(२४)

शोकसन्तप्ता देवयानी आगतां घूर्णिकां विलोक्य ''घूर्णिके त्वरितं गत्वा मे पितुः सर्वमाचक्ष्व। अद्य तु वृषपर्वणो नगरम् अहं न प्रवेक्ष्यामि ''इत्युवाच। सा घूर्णिका असुरमन्दिरं त्वरितं गत्वा शुक्रं दृष्ट्वा कम्पमाना, विचेतना एवमुवाच—'महाप्राज्ञ शर्मिष्ठया महाभागा देवयानी वने हता' इति। तदा शुक्रः दुःखात् सुतां मार्गमाणः वनं ययौ। वने सः स्वसुतां दृष्ट्वा बाहुभ्यां सम्परिष्वज्य दुःखितः वाक्यमब्रवीदित्युक्तम्।

(३०)

शुक्रः देवयानीं दृष्ट्वा 'भद्रे सर्वे जनाः आत्मदोषैः दुःख-सुखे नियच्छन्ति। मन्ये दुश्चरितं तेऽस्ति यस्येयं निष्कृतिः कृता' इति अवदत्। असुरसुतायाः दुश्चरितस्य कारणं नैव शुक्रेण पृष्टम्।

( ३१–३७ )

शर्मिष्ठया कृतं दुष्कृतं देवयानी स्वपितरं वदति तदा शर्मिष्ठया तीक्ष्णपरुषं वचनमुक्तं इति तया निन्दितां वार्तां

नृपश्रेष्ठ, मम दक्षिणं पाणिं गृहीत्वा मामुद्धृत्य रक्ष'' इति देवयानी ययातिमवदत् इति अत्रोक्तम्।

(१०)

अत्र तु देवयानी, प्रियसखीं दृष्ट्वा त्वं मम पितुस्समीपं गच्छ इत्युवाच। शुक्रः तस्याः वचनं श्रुत्वा वनमागत्य स्वसुतां विलोक्य तां परिष्वज्य एवमपृच्छत्। इत्युक्तम्। अन्ये विषयाः त्यक्ताः।

(११)

'सुभगे वृत्तं ते किमिदं, शीघ्रं वद' इति शुक्रः देवयानीम् अपृच्छत् इत्युक्तमत्र।

देवयानीशर्मिष्ठयोः कलहकारणमत्र शर्मिष्ठा स्वपितरं वदति। वस्त्रग्रहणमेव कलहकारणमित्यत्र उक्तम्। अयमधिकः विषयः।

( १२–१३ )

''मम पितुः माहात्म्यं त्वया न ज्ञातं इत्युक्त्वा मां निन्दितवती शर्मिष्ठा मम हस्तं स्वनखेन व्रणितं कृत्वा कूपे च अपातयत्।''

ब्रवीति । किन्तु कूपपतनं ययातिकृतोपकारं च नैव निवेदयति ।

अध्याय :—२८

( १-३ )

"यः समुत्पतितं क्रोधं हयमिव निगृह्णाति सः यन्तेत्युच्यते । तेन सर्वं जितं भवति । जीर्णां त्वचमुरगः इव यः क्रोधं क्षमया निरस्यति सः पुरुषः उच्यते" इत्युक्तं शुक्रेण अत्र ।

(१०-११)

'यत्र पापिनो वसन्ति तत्र शुभकामैः न वस्तव्यम् । साधु-समीपवासः एव श्रेष्ठः उच्यते । वृषपर्वसुतायाः महाघोरा वाङ् मे हृदयं मथ्नाति" इति देवयानी स्वपितरमुवाच इत्यत्रोक्तम् ।

अ—२९

(‍-७)

ततः समन्युः शुक्रः आसीनं वृषपर्वाणमुपगम्य "राजन् पापं एवं ध्रुवं फलति गुरुभुक्तमिवोदरे । अपापशीलस्य, धर्मज्ञस्य मम गृहे स्थितस्य, शुश्रूषानिरतस्य कचस्य वधात्, मम सुतायाः वधाच्च त्वां सबान्धवं त्यक्ष्यामि ।

मृगयार्थमागतः ययातिः नृपः मां कूपादुज्जहार । 'अहं सत्यमेव वदामि" इति देवयान्या उक्तम् ।

अध्याय :—२८

( ३ )

"यः सत्यमेव वदति, यस्मिन् क्षमा विद्यते, यः नीचां वार्तां तितिक्षति सः एव उत्तमः इति वेदाः ब्रुवन्ति । कोपेन धनं, बुद्धिः, विद्या, तपः इत्यादीनि सर्वाणि नश्यन्ति" इति शुक्रः देवयानीं वदति इत्यत्रोक्तम् ।

(५-६)

"असुरपुत्री गर्विष्ठा शर्मिष्ठा यद् उवाच तत् खेदं जनयति । सर्वप्रशंसार्हाणां भवतां समीपे ये वसन्ति तेषां दुःखं कथं भवेत् ? विना हेतुं मम वस्त्रं अपहृत्य, सर्वं कलापारङ्गतं भवन्तं निन्दित-वत्याः परुषं वचनं क्लेशं जनयति" इति देवयान्या उक्तमत्र ।

अ—२९

(२-५)

अत्र तु सक्रोधं शुक्रं दृष्ट्वा कोपकारणं ज्ञातुमशक्तो वृषपर्वा सभयं तस्य पुरतः आगत्य तं ववन्दे । तदा शुक्रः एवमुवाच—यूयं सर्वे मिथ्यावादिनः । पापनिरताः ।

त्वया सह त्वद्विषये स्थातुं न शक्नोमि। अद्य त्वां मिथ्या-प्रलापिनं जानामि" इति शुक्रः उवाचेत्यत्र उक्तम्।

(१२-१३)

वृषपर्वा "भार्गव त्वयि मृषावादं न जानामि। त्वयि सत्यमेव विद्यते। भवान् मां प्रसीदतु। यदि अस्मान् विहाय त्वमद्य यास्यसि अहं समुद्रं संप्रवेक्ष्यामि। नान्यत् परायण-मस्मि" इति शुक्रमुवाच।

तदा "हे असुराः समुद्रं प्रविशध्वं वा दिशो वा व्रजत। मे पुत्र्याः अप्रियं सोढुमहं न शक्तः। मम जीविततुल्या देवयानी प्रसाद्यताम्। इन्द्रस्य बृहस्पतिरिवाहं तव योगक्षेमकरः" इति शुक्रः उवाच।

वृषपर्वा "भार्गव भुवि असुरेन्द्राणां यत् वसु विद्यते, तस्य मम च त्वमेव ईश्वरः" इति शुक्रमुवाच।

(१४-१७)

ततस्तु शुक्रः सत्वरं वृषपर्वणा सह गत्वा देवयानीं प्रति एवं वदति—"सुभगे तव वचः प्रतिपन्नम्। अहमेव राज्ञो वित्तस्य ईश्वरः इति असुरेन्द्रः अवदत्" इति।

धर्मज्ञानशून्याः। दुर्गुणाश्रयभूताः। क्रूरकर्मासक्ताः। सुगुणः शुश्रूषुः कचः युष्माभिः मारितः। चूर्णयित्वा सः सुरायां दत्तः च। मम सुतायाः अपि महद् दुष्कृतं शर्मिष्ठया कृतम्। द्रुतमेव युष्मान् सर्वान् दग्धान् करिष्यामि" इति।

(६)

'यदि अस्मान् नाशयितुं भवतः इच्छा स्यात् तर्हि वयं समुद्रं प्रवेक्ष्यामः।

दैत्येन्द्राणां द्रविणस्य भवानेव ईश्वरः" इति वृषपर्वणा अत्रोक्तम्।

ततः परमेव शुक्रः "अपराधः क्षान्तः। देवयानी प्रसाद्यताम्" इति अत्र वदति।

शुक्रेण उक्ताः अन्ये विषयाः अत्र त्यक्ताः।

(७-८)

ततः वृषपर्वा देवयानी यत्रासीत् तत्र गत्वा तां प्रति "मृगाक्षि, मधुरभाषिणि, गुरुपुत्रि, अस्मद् दुःखविनाशिनि, वयं सर्वे तव दासाः अभवाम।

"तात यदि तस्य वित्तस्य भवानेव ईश्वरः तदहं नाभिजानामि।
७ असुरेन्द्रः स्वयं मां वदतु" इति देवयानी उवाच। तदा वृषपर्वा "देवयानि, यं कामं त्वमभिजानासि तं सुदुर्लभमपि अहं संप्रदास्यामि" इति अवदत्।

ततः देवयानी वृषपर्वाणं प्रति "कन्यासहस्रेण शर्मिष्ठा मम दासी भवतु। विवाहानन्तरमहं यत्र गच्छेयं तत्रापि तव सुतया आगन्तव्यम्" इति स्वेच्छामकथयत्।

(१८-२२)

ततः वृषपर्वा "शर्मिष्ठां शीघ्रमानय। सा देवयान्याः अभिलाषां पूरयतु" इत्युक्त्वा धात्रीं प्रेषयामास।

(१९-२२)

वृषपर्वणा प्रेषिता धात्री गत्वा शर्मिष्ठां प्रति "भद्रे शर्मिष्ठे उत्तिष्ठ। तव ज्ञातीनां सुखमावह। देवयान्या प्रचोदितः शुक्रः शिष्यान् असुरान् विहाय गन्तुमिच्छति। अनघे, तस्या देवयान्या इच्छा त्वया पूरिता भवितव्या। सुशोभने तस्याः दासीत्वमभिजातासि" इति वदति।

तदा शर्मिष्ठा "अहं देवयान्याः कामं पूरयितुमिच्छामि। मत्कृते तस्याः, शुक्रस्य च क्रोधः मास्तु "इत्युक्त्वा कन्यासहस्रेण आवृता पुरात् निश्चक्राम—इत्यत्रोक्तम्।

तव आज्ञा का ? किं कर्तव्यं मया ? सद्यः उच्यताम्" इति कथयति।

तत् श्रुत्वा देवयानी,

"तव सुता शर्मिष्ठा कन्यासहस्रेण मम दासी भूत्वा परिचर्यां करोतु" इति वृषपर्वणिमुवाचेत्यत्रोक्तम्। अन्ये विषयाः त्यक्ताः।

(९)

देवयान्याः वचनं श्रुत्वा तत् पूरयितुं वृषपर्वा स्वपुत्रीमानेतुं धात्रीं प्रेषयामास इत्यत्रोक्तम्।

(१०)

वृषपर्वणः वचनं श्रुत्वा धात्री गत्वा शर्मिष्ठां शीघ्रमानयतिस्म इति केवलमत्रोक्तम्। धात्र्या शर्मिष्ठां प्रति उक्तानि वचनानि त्यक्तान्यत्र।

(९-११)

आगता शर्मिष्ठा स्वजनकं ददर्श । सः नृपः स्वपुत्रीं विलोक्य "अद्यैव त्वं देवयान्याः दासी भूत्वा पारिचर्यां कुरु" इत्युवाच ।

तदा शर्मिष्ठा स्वपितरं नमस्कृत्य देवयान्याः पुरतः आगत्य "कन्यासहस्रेण अहं तव दासी भूत्वा परिचर्यां करिष्यामि । प्रसीदतु, भवती । तव विवाहानन्तरमपि त्वयैव सह आगन्तुमिच्छामि" इति वदति ।

ततः परं देवयानी "स्तूयमानस्य दातुः पुत्री कथं स्तुवतः, याचतश्च पुत्र्याः दासी भवेत्" इति सस्मितमुवाच । तदा शर्मिष्ठा "बन्धूनां सुखं दातुं अहं दासी भवितुमिच्छामि" इति कथयित्वा तां वन्दते स्म इतिवदत्यत्र ।

(१२-१३)

मञ्जुभाषिणी देवयानी वन्दितां शर्मिष्ठां विलोक्य संतुष्टा भूत्वा स्वपितरं एवं वदति—"मम विषादः संप्रतिगतः । सालावृतं पुराणं पुरं गच्छेम" इति ।

ततः कन्यासहस्रावृतया शर्मिष्ठया सह देवयानीं पुरमनयत् शुक्रः इति अत्रोक्तम् ।

अन्ये विषयाः नोक्ताः ।

(२३-२५)

शर्मिष्ठा देवयानीं प्रति "अहं कन्यासहस्रेण तव दासी भवामि । परिचर्यां करिष्यामि । यत्र ते पिता त्वां दास्यति तत्र अहमपि ते परिचर्यां कर्तुं ध्रुवं यास्यामि" इति वदति । तदा देवयानी "अहं स्तुवतः याचतः, प्रतिगृह्णतः पुत्री । त्वं तु स्तूयमानस्य नृपस्य पुत्री । एवं सति त्वं मम दासी कथं भविष्यसि" इति अपृच्छत् शर्मिष्ठाम् ।

तदा शर्मिष्ठा "आर्तानां ज्ञातीनां सुखं येन केनचित् आवहेत् । तव विवाहानन्तरं त्वं यत्र गमिष्यसि तत्रापि अहं आगमिष्यामि । सर्वदा तव परिचर्यां करिष्यामि" इति देवयानीमवदत् ।

(२६-२७)

वृषपर्वणः सुतया दासभावे प्रतिश्रुते सति देवयानी स्वजनकं प्रति एवं वदति—तात संतुष्टास्मि । पुरं प्रविशामि । विप्रोत्तम! तवामोघं विज्ञानं ज्ञातम् । तथा विद्याबलं च मया ज्ञातम्" इति ।

एवं स्वसुतया उक्तः द्विजश्रेष्ठः सुमहायशाः शुक्रः स्वपुत्र्या सह पुरं प्रविवेश । ततः सर्वे दानवास्तं विलोक्य अपूजयन् ।

**अध्याय :—३०**

( २–७ )

एकदा देवयानी शर्मिष्ठया, दासीसहस्रेण च सार्धं क्रीडार्थं वनं ययौ। वने सा यथाकाममचरत्। ता सर्वाः अभिरताः अक्रीडन्। माधवं मधु अपिबन्। विविधानि फलानि विविधान् भक्ष्यान् च खादन्त्यः सन्तुष्टा आसन्।

मृगलिप्सया वनमागतः नृपः ययातिः पानीयार्थं तत्र यदृच्छया जगाम। तत्र सः दिव्याभरणभूषिताः ललनाः योषितः शर्मिष्ठां, देवयानीं च ददर्श। तासां स्त्रीणां मध्ये वराङ्गनां, शर्मिष्ठया पादसंवाहनादिभिः सेव्यमानमनुपम-सुन्दरीं शुचिस्मितां देवयानीमुपविष्टां नृपः अपश्यत्।

(७-१५)

ययातिः कन्यासहस्रावृते द्वे वनिते विलोक्य "युवां के"? इत्यपृच्छत्। तदा देवयानी "नराधिप अहं वदामि। मे वचनं आदत्स्व। अहमसुरगुरोः शुक्रस्य सुता। इयं कन्या असुरगुरोः वृषपर्वणः पुत्री। मे दासी। तथापि सखी" इत्युवाच।

तदा ययातिः कथमियं सुन्दरी ते सखी दासी अभवत्। तत् श्रोतुं मे कौतूहलमस्ति इति देवयानीमुवाच।

**अध्याय :—३०**

( ३–४ )

कदाचित् ययातिः भूपतिः मृगयार्थं वनमागतः।∴ पिपासार्तः सः नृपः एकत्र क्रीडन्त्यः वह्वीः कन्याः ददर्श। तासां मध्ये पूर्णचन्द्रनिभाननां दीर्घकवरीं देवयानीं दीर्घलोचनया शर्मिष्ठया पादसंवाहनेन सेव्यमानामपश्यत् इति केवलमत्रोक्तम्।

अन्ये विषयाः सर्वे त्यक्ताः।

(५-७)

ययातिः देवयानीं दृष्ट्वा "कन्ये का त्वम्? कस्याः पुत्री त्वम्? पादसंवाहनं कुर्वन्ती अनुपमसुन्दरी सा का? अहं यशस्वी ययातिर्नाम नृपः। ब्रह्मचर्येण वेदान् चतुरः अधीत-वानहम्। मृगयार्थं वनमागतोऽहं पिपासार्तः अत्रागतः" इति स्वयमेव सर्वं वदत्यत्र।

"सर्वं विधानमेव अनुवर्तते । विधिना विहितमिदं ज्ञायताम् । भवतो नाम किम् ? कस्य पुत्रो भवान् ? त्वां नृपं मन्ये । शंस मे" इति देवयानी अवदत् । ततस्तस्य वचनात् तं ययातिं ज्ञात्वा तुष्टा बभूव । इत्यत्रोक्तम् ।

ततः परमेव देवयानी स्ववृत्तान्तं कथयति । शर्मिष्ठादासीभवनकारणमपि स्पष्टमुक्तम् ।

(१७-२७)

देवयानी ययातिमुवाच—"दास्या शर्मिष्ठया, कन्यासहस्रेण च सह अहं त्वदधीनास्मि । त्वं मे भर्ता भव" इति ।

तदा ययातिः "विप्रसुतां श्रेष्ठां त्वां परिणेतुं राजाहं नार्हः" इति वदति । ततः देवयानी बहूनि युक्तानि कारणानि कथयित्वा अन्ते तेन नृपेण गृहीतपूर्वपाणिं अन्यः पुमान् कथं स्पृशेत् ?" इति वदति ।

ततः ययातिः "सर्पः एकं दशेत् । शस्त्रेण एकः हन्यते । विप्रस्तु कुपितः सराष्ट्राणि पुराण्यपि हन्ति । अतः विप्रः दुराधर्षतरः । तस्मात् पित्रा अदत्तां त्वां परिणेतुमहमशक्तः" इति कथयति ।

तदा देवयानी "राजन् त्वं मया वृतः । पित्रा दत्तां मां वहस्व" इत्युक्त्वा स्वपितरमानेतुं धात्रीं प्रेषयामास इत्युक्तमत्र ।

(७-१०)

"राजन् मम पाणिः पूर्वं त्वया गृहीतः कूपादुद्धरणकाले । अन्यः कथं मम पाणिं स्पृशेत् । अतः त्वमेव मम भर्ता भवितुमर्हः । अयमेव धर्मः" इति देवयानी ययातिं वदति ।

तदा नृपः तां "प्रति कन्ये त्वं शुक्रसुता । अहं तु क्षत्रियकुले जातः । अतः त्वां परिणेतुं नेच्छामि" इति ब्रवीति ।

"मया वृतः त्वम् । मम पिता मां दास्यति" इत्युक्त्वा सा स्वजनकमानेतुं एकां सुन्दरीं प्रेषयामास इत्यत्रोच्यते ।

( २९—३७ )

धात्र्या निवेदितः शुक्रः स्वसुतां द्रष्टुं वनमागतः। ययातिः प्राञ्जलिः विप्रं शुक्रं ववन्दे। ततो देवयानी "तात अयं नृपः नाहुषः। दुर्गमे मम पाणिमग्रहीत्। नमस्ते। लोके अन्यं भर्तारं न वृणे। अतः माम् अस्मै देहि" इति वदति। ततः शुक्रः नृपं प्रति, "वीर अनया त्वं पतिः वृतः। इमां महिषीं गृहाण। वर्णसङ्करतः अधर्मः त्वां न स्पृशेत्। अधर्मात् त्वां विमुञ्चामि। ईप्सितं वरं च वरय। अनया सह अतुलां प्रीतिं लभस्व। इयं कुमारी शर्मिष्ठा त्वया सततं संपूज्या। न चैनां शयने ह्वय" इति ब्रवीति।

ततः नृपः शुक्रं नमस्कृत्य तेनानुज्ञातः संतुष्टः स्वनगरं ययौ—इत्यत्रोक्तम्।

अध्याय :—३१

(७-९)

ऋतुप्राप्तौ धर्मज्ञा सा शर्मिष्ठा एवं चिन्तयामास—"ऋतुकालश्च संप्राप्तः। मे न कश्चित् पतिः वृतः। किं कथं कृत्वा सुखं भवेत्। देवयानी तु प्रसूता। वृथाहं प्राप्तयौवना। यथा तया ययातिः भर्ता वृतः तथा अहमपि तं वृणोमि। नृपेण पुत्रफलं देयमिति मे मतिः निश्चिता। संप्रति तस्य नृपस्य

( १०—१४ )

शुक्रः वनमागत्य स्वसुतां ददर्श। सा देवयानी "पूर्वमनेन नृपेण ययातिना मम पाणिः गृहीतः। अतः तस्मै मां देहि" इति पितरमुवाच। तदा नृपो भीतो बभूव। शुक्रः"त्वमेवार्हः। तव दोषो न भवेत्। अहमेव मम सुतां ददामि" इत्युक्त्वा नृपाय स्वपुत्रीं ददौ।

तदा शुक्रः "शर्मिष्ठां प्राप्तुं यत्नः त्वया न कर्तव्यः" इति नृपमुवाच।

ततो ययातिः शुक्रं प्रदक्षिणं कृत्वा तेनानुज्ञातः स्वपुरं स्वभार्यया सह जगाम इत्यत्रोच्यते।

अध्याय :—३१

(५-६)

अत्र तु शर्मिष्ठा "पतिं विना मम यौवनं वृथा बभूवे"ति खेदं प्राप। ततः पुत्रं लब्धुमैच्छत् प्रतिदिनम्। तदनन्तरं विषादेन लाभो नास्तीति मत्वा देवयानी यथा ययातिं लेभे तथा तं पतिं लब्धुं सापि चिन्तयामास—इत्येवात्रोच्यते।

अन्ये विषया नोक्ताः।

दर्शनं लब्धुं शक्यते किम् ? रहसि तं द्रष्टुमिच्छामि" इति अत्रोच्यते ।

(१०-११)

नृपः ययातिः अशोकवनिकाभ्याशे शर्मिष्ठां विलोक्य विस्मितः बभूव । तं रहसि दृष्ट्वा चारुहासिनी सा प्रत्युद्गम्याञ्जलिं कृत्वा एवमुवाचेति उक्तम् ।

(१४-१५)

ययातिः शर्मिष्ठां प्रति "वेद्मि त्वां शीलसम्पन्नाम् । सूच्यग्रमपि ते रूपं न पश्यामि । शर्मिष्ठा ते शयने नाह्वयितव्येति पूर्वं शुक्रः उक्तवान् खलु । अतः तवाभिलाषा पूरयितुं न शक्यते" इति वदति ।

(१६-२३)

ययातिशर्मिष्ठासंवादः धर्मनिरूपणेन अत्र सविस्तरं वर्णितः ।

अ—३२
(१-२)

शर्मिष्ठायाः पुत्रः जातः इति ज्ञात्वा देवयानी चिन्तयाविष्टदुःखार्ता तां प्राप्य "कामलुब्धया त्वया इदं किमर्थं कृतम्" इति अपृच्छत् इति अत्रोच्यते ।

(७)

ययातिं विलोक्य शर्मिष्ठा तं नमस्कृत्य एवमुवाच इति केवलमत्रोच्यते ।

(९)

अत्र तु "व्रतमाचरन्ती कन्या त्वं रन्तुमनर्हा" इति शुक्रेणोक्तं खलु । तद्वचनं नातिक्रमणीयं इति केवलं नृपेणोक्तम् ।

(१०-१४)

अत्र तु तयोर्द्वयोः संवादः संविस्तरं नोक्तः ।

अ—३२
(३—)

अत्र तु धात्रीमुखात् प्रसूतां शर्मिष्ठां श्रुत्वा तदसहमाना तां प्राप्य "कन्यायाः अविवाहितायाः तव इदमुचितं किम्" इति अतिकोपेन पप्रच्छेत्यत्रोक्तम् ।

(१२-१७)

देवयानी क्रीडमानान् देवरूपिणः कुमारान् दृष्ट्वा विस्मिता ययातिमिदमुवाच "नृप, इमे कुमाराः देवपुत्रोपमाः शुभाः वर्तन्ते । वर्चसा, रूपतश्चैव तव सदृशाः दृश्यन्ते । इमे कस्य पुत्राः" ? इति नृपं पप्रच्छ । ततः तान् कुमारान् "युष्माकं पिता कः ? "अहम् अग्रतः श्रोतुकामास्मि । वदत मे सत्यम्" इति अपृच्छत् ।

ते कुमाराः पितरं ययातिं प्रदेशिन्या अदर्शयन् । शर्मिष्ठां मातरमूचुः । एवमुक्त्वा ते नृपमुपचक्रमुः । तदा नृपः देवयान्याः समीपे तान् कुमारान् नाभ्यनन्दत् । तेन बालकाः रुदन्तः स्वमातरं प्रापुः । तेषां बालानां प्रणयं दृष्ट्वा तत्त्वं बुद्ध्वा देवयानी शर्मिष्ठां प्राप्य एवमुवाच इत्यत्रोच्यते ।

(१९-२२)

देवयानी—"कस्मात् मम विप्रियमकार्षीः आसुरधर्मस्थिता त्वं किं न बिभेषि" इति शर्मिष्ठामुवाच । सा शर्मिष्ठा "न्यायतः धर्मतश्चैव चरन्ती अहं ते न बिभेमि । यदा नृपः त्वया वृतः तदा मयापि वृत एव । सखीभर्ता हि धर्मेण भर्ता भवति । मान्या, श्रेष्ठा, ज्येष्ठा, ब्राह्मणी त्वं मम पूज्यासि । त्वत्तो हि मे राजर्षिः पूज्यतरः खलु । तत् त्वं न वेत्सि किम्" इति देवयानीमुवाच इत्यत्रोच्यते ।

(७-८)

क्रीडमानान् त्रीन् कुमारान् सम्यक् विलोक्य "एते कस्य पुत्राः" इति नृपमपृच्छत् देवयानी । तदा नृपः तूष्णीमासीत् । ततः कुमारान् सा अपृच्छत् । "माता शर्मिष्ठा" ।

पिता तु अयमेवेति उक्त्वा तर्जन्या ययातिं प्रददर्श्य तस्य समीपं ययुः । रूपे ययातितुल्या एव ते कुमाराः इति निश्चित्य देवयानी शर्मिष्ठां प्राप्य सक्रोधा लोहितनेत्री एवमब्रवीत् इति अत्रोक्तम् ।

(१०-११)

"हे असुरपुत्रि, त्वादृशी वञ्चकी मिथ्यावादिनी लोके न दृश्यते । त्वं क्रूरा" इति देवयानी उवाच ।

तदा शर्मिष्ठा तां देवयानीं नमस्कृत्य एवं वदति—"प्रीत्या त्वया वृतः नृपः एव मयापि वृतः । तद् उचितमेव । विप्रियं मया न कृतम्" इति । अन्ये विषयाः अत्र नोक्ताः ।

(४०-४१)

"नहुषात्मज, जरां यथेष्ठं अन्यस्मिन् संक्रामय यदीच्छसि मामनुध्याय। न च पापमवाप्स्यसि। यः पुत्रः ते वयः दास्यति स राजा भविष्यति। सः आयुष्मान् यशस्वी च भविष्यति" इति शुक्रः उवाचेत्यत्र उच्यते।

**अध्याय :—३३**

(१-७)

शुक्रशापात् जरां प्राप्तः ययातिः स्वपुरं प्राप्य स्वज्येष्ठं पुत्रं यदुमुवाच—"यदो, शुक्रशापाद् अहं जरां वलीं, पलितानि च प्राप्तोऽस्मि। पाप्मानं च लब्धवान्।

यौवने नाहं तृप्तः। त्वं जरया सह पाप्मानं प्रतिपद्यस्व। त्वदीयेन यौवनेन अहं विषयान् चरेयम्। पूर्णे वर्षसहस्रे तु त्वदीयं यौवनं दत्वा पाप्मानं जरया सह संप्रतिपत्स्यामि" इति। ततः यदुः "जरायुक्तः नरः सितश्मश्रुधरः, दीनः, शिथिलीकृतः, वलीयुक्तः, दुर्दर्शः, दुर्बलः, कृशः, कार्यकरणे अशक्तः, सर्वैः परिभूतश्च भवेत्। अतः जरां नाभिकामये। मत्तः प्रियतराः वहवः पुत्राः सन्ति। अतः जरां ग्रहीतुमन्यं पुत्रं वृणीष्व" इति ययातिमुवाचेत्युक्तम्।

(२५-३०)

ययातिः पुत्रं पूरुं प्रति "पूरो त्वं जरया सह पाप्मानं

(१७-१९)

"त्वदीयां जरामन्यस्मै दत्वा तस्माद् यौवनं प्राप्य विषयान् चर। यः पुत्रः जरां स्वीकरोति सः त्वदीयं राज्यं लभताम्। यः इच्छति तस्मै त्वदीया जरा दीयताम्" इति शुक्रः ब्रवीत्यत्र।

**अध्याय :—३३**

(२-३)

अत्र ययातिः यदुं प्रति "जरां मदीयां स्वीकृत्य तव यौवनं प्रयच्छ। पूर्णे वर्षसहस्रे सुखानुभवानन्तरं जरां स्वीकृत्य त्वदीयं यौवनं प्रतिदास्यामि" इति केवलं वदति।

तदा यदुः "जरायुक्तः नरः सर्वैः निन्दितः भवति। सः कृशः भवति। कामभोगप्रणाशिनो खलु जरा। अतः मत्तः प्रियतरं सुतं वृणीष्व" इति केवलंब्रवीति।

अन्ये विषयाः त्यक्ताः।

(११-१२)

नृपः कनिष्ठं पुत्रं पूरुं दृष्ट्वा "शुक्रशापलब्धां जरां गृहीत्वा

प्रतिपद्यस्व । त्वं मे प्रियतरः सुतः । त्वं वरीयान् भविष्यसि ।
8 उशनसः शापात् प्राप्तां जरां पूर्णे वर्षसहस्रे स्वीकृत्य तव यौवनं प्रतिदास्यामि" इति उवाच ।

तत श्रुत्वा पूरुः सद्यः पितरम् एवमुवाच—"महाराज यत् भवता उक्तं तत् करिष्यामि । मत्तः यौवनं गृह्यताम् । यथेप्सितान् कामान् चरतु भवान् । जरया प्रतिच्छन्नोऽहं तव वयोरूपधरः यथेच्छया चरिष्यामि" इति अत्रोच्यते ।

अध्याय—३४

(१-३)

ययातिः महाव्रतं शुक्रं मनसा ध्यात्वा महात्मनि सुते जरां संक्रामयामास । सद्यः सः नृपः पौरवेण वयसा अशोभत ।

प्रीतियुक्तः ययातिः नरश्रेष्ठः यथाकामं, यथोत्साहं, यथाकालं, यथासुखं धर्माविरुद्धान् विषयान् चचार इति अत्र वर्ण्यते ।

(४-६)

ययातिराजस्य राज्यपरिपालनक्रमः अत्र सविस्तरं वर्णितः ।

सः नृपः देवान् यज्ञैः प्रीणयामास । पितामहान् श्राद्धैः अतर्पयत् । दीनान् अनुग्रहैः, विप्रोत्तमान् इष्टैः कामैः, अतिथीन् अन्नपानैः, विशः प्रतिपालनैः, शूद्रान् आनृशंस्येन, सर्वाः प्रजाः

तव यौवनं दीयताम् । पूर्णे वर्षसहस्रे प्रीत्या तव यौवनं प्रतिदास्यामि । राज्यं च दास्यामि" इति अवदत् ।

पूरुः स्वपितरं नमस्कृत्य "मम यौवनं दत्तम् । जरां ददातु भवान्" इति अब्रवीदित्यत्रोक्तम् ।

अध्याय ३४

(२-)

अत्र तु स्वजरां नृपः पुत्राय दत्वा पुत्रस्य यौवनं गृहीतवान् इति केवलमुक्तम् । शुक्रं मनसा ध्यात्वा' इति नोक्तम् ।

'तेन विषयाः सेविताः' इत्यत्रोक्तम् । अविरोधेन धर्मस्य इत्यादिकं नोक्तम् ।

(३-४)

अत्र तु परिपालनक्रमः अति संग्रहेणोक्तः । सः राजा देवान्, पितॄन्, भूसुरादींश्च प्रीणयित्वा इन्द्र इव धर्माविरोधेन पालयामास इति केवलमुक्तम् ।

धर्मेण च यथावत् अनुरञ्जयन्, सिंहविक्रान्तः सः युवानृपः साक्षात् अपरः देवेन्द्र इव पालयामास इति अत्र वर्ण्यते ।

(७-१३)

विषयगोचरः सः ययातिः धर्माविरोधेन उत्तमं सुखं चचार । शुभान् कामान् प्राप्य सः नृपः तृप्तः अभवत् । वर्षसहस्रान्तं कालम् अस्मरत् । कालं पूर्णं मत्वा पुत्रश्रेष्ठं पूरुम् एवमुवाच नृपः— “पुत्र, कामानामुपभोगेन कामः जातु न शाम्यति । हविषा अग्निरिव भूयः वर्धते एव कामः । पृथिव्यां यत् हिरण्यं, व्रीहियवं, पशवः, स्त्रियः तत् सर्वमपि एकस्य नालमिति मत्वा शमं लभेत । तव यौवनेन मया यथासुखं, यथोत्साहं, यथाकामं विषयाः सेविताः । प्रीतोऽस्मि । ते भद्रमस्तु ।

त्वदीयं यौवनं गृहाण । त्वमेव मम प्रियकृत्सुतः । अतः इदं राज्यमपि गृह्यताम् “इति अत्रोक्तम् ।

(१५-२९)

राजा पूरवे यौवनं ददौ ।

कनीयसं सुतं पूरुं राज्ये अभिषेक्तुं नृपः ययातिः ऐच्छत् । तदा विप्रप्रमुखाः वर्णाः “कथं ज्येष्ठमतिक्रम्य कनीयान् राज्यमर्हति” इति नृपमपृच्छन् तदा नृपः “सर्वे मे वचनं शृण्वन्तु । ज्येष्ठं प्रति राज्यं न देयम् । मम नियोगः यदुना नानुपालितः ।

(४-१०)

भोगैः प्रीतः नृपः कालं पूर्णं ज्ञात्वा पूरुं प्रति एवं वदति— “पुत्र, ज्ञाने गजशास्त्रे, अश्वशास्त्रे, धनुर्विद्यायां, शस्त्रास्त्रप्रयोगे ज्ञानप्रदासु विद्यासु च त्वत्समः कः अस्ति त्रिषुलोकेषु च ? मया धर्माविरोधेन इदं राज्यं परिपालितम् । त्वयापि सम्यक् राज्यं परिपालनीयम् । अहं अतीव प्रीतः । त्वदीयं यौवनं गृहीत्वा मदीयां जरां देहि । इदं राज्यमपि गृहाण” इति । इत्थमत्रोक्तम् । अत्र ययातिः पूरुमतीव प्रशंसति ।

(११-१७)

अत्र तु ययातिः पूरुं दृष्ट्वा “पुत्र, धर्माविरोधेन मया राज्यं परिपालितम् । इतः परं त्वं राज्यं परिपालय” इत्युक्त्वा राज्यपरिपालनक्रमं च नृपः अत्र सविस्तरं उपदिशति । अयं अधिकांशः अत्र ।

मातापित्रोः वचनकृत् पुत्रः एव सुपुत्रः। यदुना, तुर्वसुना, द्रुह्युणा, अनुना च अहमवज्ञातः। पूरुणैव मे वाक्यं कृतं, विशेषतः मानितं च। येन मम जरा धृता, कामश्च कृतः कनीयान् सः पूरुः एव मम दायादः। 'यः पुत्रः त्वां अनुवर्तेत् प्रियकृत् स एव पृथिवीपतिः भवतु' इति शुक्रेण वरश्च दत्तः। अतः पूरुः राज्ये अभिषिच्यताम्" इति अवदत्। तत् श्रुत्वा जनाः "यः सुतः मातापित्रोः हितः, गुणयुक्तश्च स एव कनीयानपि प्रभुः। स एव कल्याणमर्हति। शुक्रस्य वरदानेन तव प्रियस्य पूरोरेव इदं राज्यमर्हम्। अन्यथा उत्तरं वक्तुं न शक्यम्" इति ऊचुः।

तुष्टैः जनैः एवमुक्तः ययातिः राज्ये स्वपुत्रं पूरुमभिषिच्य वनवासाय दीक्षितः विप्रैः तापसैः सह नगरात् निर्ययौ—इति अत्र उच्यते।

**अध्याय—३५**

(११-१५)

पूरवे राज्यदानानन्तरं ययातिः मुदितः वनवासाय गतः। सः नृप फलमूलाशनः वने चिरमवसत्। सः शिलोञ्छवृत्तिमास्थाय वन्येन हविषा नित्यमतिथीन् पूजयन् शेषान्नकृतभोजनः कालमनयत्। सः पूर्णं वर्षाणां सहस्रमेवं वृत्तिरभूत्।

(१९-२१)

ययातिराजस्य उपदेशं श्रुत्वा पुत्रः पूरुः "तात किमर्थमेवमुच्यते। भवता दत्तया जरया मम खेदः नाभवत्। भवते दत्तं मदीयं यौवनमहं नैव स्मरामि। अतः भवतः करुणा मयि सदा अस्तु" इति वदति। तदा ययातिःपुत्र, मद्वचनकृद्भव। नो चेत् तपसः फलं नष्टं भवेत्" इति सक्रोधमुवाच। ततः पुत्रः पितरं ववन्दे। तदा ययातिः तं दृढमालिङ्ग्य 'यौवनं स्वीकृत्य जरा दीयतां त्वया, 'इति पुत्रमुवाच। अन्ते सः अङ्गीचकार। ययातिपूरुसंवादः अत्र अधिकतया वर्णितः। किं च अस्मिन् अध्याये अभिषेकोत्सववर्णनं, ययात्युपदेशवर्णनं (राजधर्मवर्णनं) राज्यपरिपालनक्रमवर्णनं च अधिकतया दृश्यन्ते।

**अध्याय —३५**

(६-८)

अत्र संग्रहेण नृपस्य वानप्रस्थाश्रमवासविधिः उक्तः।
अन्यः अधिकः विषयः अत्र वर्ण्यते।

जितात्मा जितमन्युः सः पितृदेवताः तर्पयन्, विधिवत् अग्नीन् जह्वन् वानप्रस्थविधानतः यत् कर्तव्यं तत् कुर्वन्नासीत् ।

अत्र चान्द्रायणव्रतं नृपेणानुष्ठितं न वर्णितम् ।

(१५-१७)

ययातिः नियतवाङ्मना अम्बुभक्षस् त्रीन् अब्दान् आसीत् । ततो वायुभक्षः अतन्द्रितः संवत्सरमासीत् । ततः पञ्चाग्निमध्ये संवत्सरं तपस्तेपे । ततः परम् अनिलाशनः एकपादस्थितः षण्मासान् आसीत् । ततः परमेव पुण्यकीर्तिः सः रोदसी आवृत्य स्वर्गं ययौ इत्यत्रोच्यते ।

(९-१६)

अत्र नृपेणानुष्ठितं चान्द्रायणव्रतं सविस्तरं वर्णितम् । अमावास्यादिने शुद्धोपवासः । प्रथमायामेकमेव कवलं भक्षयेत् ।

एवम् एकैकस्मिन् दिने एकैकं कवलमधिकतया भक्षयेत् ।

अन्ते पूर्णिमायां पुनः उपवासः । कृष्णपक्षे एकैकस्मिन् दिने एकैकं कवल न्यूनतया भक्षयेत् । इदमेव चान्द्रायणव्रतमित्युक्तम् । व्रीहिशुद्धीकरणे च विधिः उक्तः । एवं ययातिना बहूनि चान्द्रायणव्रतानि अनुष्ठितानि । एवम् अत्र व्रतानुष्ठानमधिकतया वर्णितम् ।

(१७-२०)

अत्र स्वर्गारोहणवर्णने तपश्चर्याकालावधिनिरूपणे महान् भेदः अस्ति ।

सः नृपः जितेन्द्रियः सलिलभक्षः पूर्णं वर्षाणां सहस्रं तपस्तेपे । ततः दक्षिणपादाङ्गुष्ठेन स्थित्वा वर्षसहस्रं तपस्तेपे । एवं वामपादाङ्गुष्ठेन स्थितः वर्षसहस्रं तपश्चकार । जलभक्षः त्रिशताब्दान् पञ्चगव्याशनः त्रिशताब्दान् च तपस्तेपे । सः वृष्टिवातातपादीन् अगणयित्वा अनिलाशनः एव शताब्दान्

**अध्याय—४३**

(१०)

यदुवंशे महिष्मतः पुत्रः प्रतापवान् रुद्रश्रेण्यः जातः इत्यत्रोच्यते ।

(२४-३१)

कार्तवीर्यार्जुनस्य गतिं क्षत्रियाः नूनं न यास्यन्ति । यज्ञैः दानैः, तपोभिः, विक्रमेण, श्रुतेन च सः श्रेष्ठः बभूव । तत्तुल्यः न कोऽप्यासीत् । ज्याघातकठिनत्वचा करसहस्रेण सः शारदेन करसहस्रेण सूर्य इव अभासत । अयं समुद्रस्य वेगं भजेत । क्रीडता तेन नर्मदानदी चकिता भवेत् इति तस्य बलातिशयः वर्ण्यते ।

(३७-३९)

एकदा सः कार्तवीर्यार्जुनः लङ्कायां रावणं सबलं स्वबलेन मोहयित्वा निर्जित्य धनुर्ज्यायां बद्ध्वा माहिष्मत्यामानीय बबन्ध । ततः पुलस्त्यः गत्वा अर्जुनं सम्प्रसादयत् । ततः सः मुमोच इत्यत्रोच्यते ।

तपस्तेपे । ततः पत्राशनः एकं संवत्सरं तपस्तेपे । ततः परं सर्वाणि विहाय निराहारः वर्षाणां सहस्रं तपस्तेपे इति वर्ण्यते । एवमुग्रं तपः कृत्वा सः स्वर्गं गतः इत्युच्यते ।

**अध्याय—४३**

(२)

अत्र तु महिष्मतः सुतः भद्रश्रेणिः जातः इत्युच्यते ।

(-५)

अत्र तु सः कार्तवीर्यार्जुनः यागादीन् अकरोत् इति केवलमुक्तम् । अन्ये विषयाः त्यक्ताः ।

(९)

अत्र तु लङ्कां गत्वा रावणं बद्ध्वा माहिष्मतीमागतः सः अर्जुनः पुलस्त्येन याचितः तम् अमुञ्चत् इति उच्यते ।

(४१-४३)

कदाचित् कार्तवीर्यः वनं स्वशरैः ददाह। अग्निः आश्रमं चादहत्। अतः क्रुद्धः मुनिः आपवः अर्जुनमेवमशपत्—

"यस्मात् विश्रुतं मम वनं प्रदग्धं तस्मात् कृतं तव दुष्करं कर्म अन्यः हरिष्यति। बली, विप्रः, तपस्वी, भार्गवः प्रथमं तरसा ते बाहुसहस्रं छित्वा त्वां वधिष्यति" इति। ततः परशुरामः, तस्य मृत्युः बभूव। वधश्च अधिकाद् भवितव्यः इति पुरा तेन वरः स्वयमेव वृतः। अतएव भार्गवेण हतः इत्यत्रोच्यते।

अध्याय—४४

(३-१४)

एकदा सूर्यः विप्ररूपेण कार्तवीर्यं प्राप्य स्वतृप्तिं पूरयितुं प्रार्थयामास। 'कीदृशं भोजनं त्वया इष्यते इति ज्ञात्वा ते तृप्तिं पूरयिष्यामि' इति नृपः उवाच।

'ददतांवर सर्वं स्थावरं मे आहारं देहि। सा मे तृप्तिः' इति सूर्यः अवदत्। नृपः सूर्यं प्रति "तपतांश्रेष्ठ त्वामहं वन्दे। सर्वे स्थावराः तेजसा बलेन च निर्दग्धुं कथं शक्याः ? इत्युवाच। तदा सूर्यः तुष्टोऽहं ते अक्षयान् सर्वतोमुखान् शरान् ददामि। मम तेजोभिः आविष्टा ते शराः स्थावरान् शोषयिष्यन्ति

(१०-११)

आपवस्य वनं कार्तवीर्यार्जुनः ददाह।

आपवमुनेः शापेन परशुरामस्तस्य अर्जुनस्य करसहस्रं छित्वा तं जघान। एवं पूर्वं तेन वरः वृतः। अतएव मृतः इति केवलमत्र उच्यते।

अध्याय—४४

(२-४)

अत्र तु सूर्यस्य प्रार्थना उक्ता। नृपः 'तत्रेच्छा का' इत्यपृच्छत्। तदा सूर्यः स्थावराः दग्धव्याः इत्युवाच।

सः नृपः तदङ्गीचकार। सद्यः सूर्यः तस्मै बहून् शरान् ददौ। तैः नृपः सर्वान् स्थावरान् ददाह। आश्रमाश्च दग्धाः। अतः क्रुद्धः मुनिः तं नृपमशपत् इति केवलमत्र संग्रहेण उच्यते।

शुष्कान् भस्मीकरिष्यन्ति च इति उवाच। ततः शरान् सः नृपाय ददौ। नृपः तैः शरैः सर्वान् स्थावरान् ददाह। तदैव आपवः क्रोधात् शशाप इत्यत्र सविस्तरं वर्णितम्।

क्रोष्टोः वंशवर्णनम्

(१५)
यदुपुत्रस्य क्रोष्टोः महारथः वृजिवीवान् सुतः जातः इत्यत्रोच्यते।

(१६)
अत्र त्वाहसुतः रुषङ्गुः इत्युच्यते।

**अध्याय—४५**

**वृष्णिवंशवर्णनम्**

(१)
गान्धार्याः पुत्रः सुमित्रः इति अत्रोच्यते।

(२)
माद्रीपुत्राः पञ्चेत्यत्रोच्यते। कस्यचित् पुत्रस्य नाम शिविः इत्यत्रोक्तम्।

क्रोष्टोः वंशवर्णनम्

(५)
अत्र तु क्रोष्टोः पुत्रःसिनीवरः इत्युक्तः।

(५)
अत्र तु सुवकासुतः विशङ्कुः इत्युच्यते।

अध्याय—४५

(२)
अत्र तु सुपुत्रः इति तस्य नाम उक्तम्।

(३)
अत्र तु माद्रीपुत्राश्चत्वार एव उक्ताः।
अत्र तु तस्य नाम, 'शिनि': इत्युक्तम्।

(३)

अनमित्रसुतस्य नाम 'निघ्नः' इत्यत्रोच्यते ।

(४-५)

स्यमन्तकमणिः सर्वरत्नेषु श्रेष्ठः । प्रसेनः तं मणिं याचितवते कृष्णायापि न ददौ । सर्वदा हृदि धारयन्नासीत् । शक्तोऽपि कृष्णः तं मणिं न जहार—इत्यत्रोच्यते ।

(६-८)

कदाचित् मृगयार्थं वनं गतः प्रसेनः बिले शब्दमश्रृणोत् । तत्र प्रविश्य सः ऋक्षमपश्यत् । ऋक्षः प्रसेनं हत्वा मणिमाददात् इत्युक्तमत्र ।

(११-१४)

मृगयार्थं गतः गोविन्दो यदृच्छया बिलस्याभ्याशं ययौ । बली जाम्बवान् तं विलोक्य महाशब्दं चक्रे । तं शब्दं श्रुत्वा कृष्णः खड्गपाणिः प्रविश्य जाम्बवन्तं बिले ददर्श । ततः क्रोध-संरक्तलोचनः कृष्णः तं तूर्णं जग्राह । ततः ऋक्षः वैष्णवैः कर्मभिः तं प्रभुं तुष्टाव । तुष्टः भगवान् तं वरेण प्रीणयामास इत्यत्रोच्यते ।

अध्याय—५१

(३)

अग्नेः त्रयः पुत्राः जाताः । तेषु पावकस्य पुत्रः वैद्युतः इत्युच्यते अत्र ।

(३)

अत्र तु 'निन्मित्र' इत्युच्यते ।

(४-५)

अत्र तु वरेण सूर्यात् मणिं प्रसेनः लेभे इत्युच्यते । स्यमन्तकमणिः कीदृशः इति न उक्तः ।

(५)

मृगयार्थम् अरण्यं गतः प्रसेनः मार्गे ऋक्षराजेन जाम्बवता युद्धे हतः । मणिश्च तेनापहृतः इत्युक्तमत्र । 'प्रसेनः जाम्बवतः बिलं प्रविवेश' इति नोच्यते ।

(७)

अत्र तु मृगयार्थं विपिनं गतः कृष्णः ऋक्षराजं जाम्बवन्तं मार्गे दृष्ट्वा तेन सह युद्धं कृत्वा तं विजितवान् । तदा सः ऋक्षस् तं नारायणं मेने ।

इत्यत्रोच्यते । अन्ये विषयाः त्यक्ताः ।

अध्याय—५२

(२)

अत्र तु पावकपुत्रः वलत्तुतः इत्युच्यते ।

(१२)

षोडश नदीनां नामानि अत्र उच्यन्ते। तासु नदीषु वितस्ता एका। अन्या इरावती।

**अध्याय—५४**

(४-८)

नारदमहादेवसंवादे नारदः पृच्छति—"भगवन् देवदेवेश क्रमात् मुक्तिप्रदं किंचित् व्रतमुच्यताम् इति। तदा ईश्वरः "ब्रह्मन् त्वया सम्यक् पृष्ठम्। सर्वलोकहितावहं, शान्तिप्रदं च व्रतं शृणु। नक्षत्रपुरुषं नाम व्रतं नारायणात्मकम्। विधिवत् विष्णुनामानुकीर्तनं पादादि कुर्यात्। वासुदेवस्य प्रतिमामर्चयेत्" इति वदति।

(२९)

"इति नक्षत्रपुरुषमुपास्य स्वयं विधिवत् सर्वान् कामान् लभते। विष्णुलोके च महीयते। किं च आत्मना वा पितृभिः वा कृतं ब्रह्महत्यादिकं सर्वं क्षयमाप्नुयात्" इति महादेवेन अन्ते फलमुच्यते।

(१२)

अत्रापि तानि नदीनामानि उक्तानि। तासु वितस्ता विनता इत्युक्ता अत्र। इरावती, इरवतीत्युक्ता अत्र।

**अध्याय—५५**

(६-९)

अत्र तु नारदः वाञ्छितफलप्रदं व्रत किंचिदुच्यतामिति पृच्छति। अन्यानि पुत्रपौत्रारोग्यादीनि फलानि उक्तानि। किन्तु मुक्तिप्रदं व्रतमिति नोक्तम्। किं च महादेवस्य वचने नक्षत्रपुरुषव्रतं इति व्रतनाम केवलमुच्यते। सर्वलोकहितावहं, शान्तिप्रदं, नारायणात्मकं व्रतमिति न वर्णितम्।

(२४)

अत्र तु उपासकः विष्णुलोकं च गत्वा फलानि अनुभवेत् इति केवलमुक्तम्। सर्वपापक्षयादिकं नोक्तम्।

अध्याय—६०

सौभाग्यशयनव्रतम्

(१-१२)

पुरा लोकेषु दग्धेषु सर्वभूतानां सौभाग्यं वैकुण्ठं स्वर्गमासाद्य विष्णुवक्षसि एकस्थमभवत् ततः परं सृष्टेः आरम्भे ब्रह्मणः विष्णोश्च स्पर्धा जाता। तदा ईश्वरः लिङ्गरूपी बभूव। अतिभीषणा वह्निज्वाला लिङ्गाकारा समुद्भूता। तयाभितप्तस्य हरेः वक्षसः विनिस्सृतं तत् सौभाग्यं रसरूपेण यावत् भूमिं गतं तावत् 'दक्षेण पीतम्। तेन सः रूपबलादीनि प्राप।

योगज्ञानविदा, ब्रह्मपुत्रेण दक्षेण पीतं सौभाग्यमिति उक्तं खलु। तेन तस्य सती दुहिता बभूव। लोकानतीत्य लालित्यात् सा ललितेत्युच्यते। त्रैलोक्यसुन्दरीं तां शङ्करः उपयेमे। सौभाग्यवती सा देवी भुक्तिमुक्तिफलप्रदा इत्यत्रोच्यते।

अध्याय—७०

अङ्गदानव्रतम्

'वसन्तकालः वर्ण्यते। वसन्तकाले कोकिलभ्रमरकुलाकुले, पुष्पिते, मारुतोत्फुल्लकह्लारसरसः तटे अलंकृतः, मालतीकृतशेखरः, परपुरञ्जयः, सर्वाभिरणभूषितः, रूपेण मन्मथतुल्यः

अध्याय—६१

(१-४)

अत्र तु सौभाग्यं रसरूपेण विनिस्सृतम्। तत् दक्षेण पीतम्। सः रूपादिकं लेभे। ततः ललिता जाता।

तां परमेश्वरः परिणीतवान् इत्युक्तम्। दक्षसुतायाः सौन्दर्यातिशयः न वर्णितः।

अन्ये विषयाश्च त्यक्ताः।

अध्याय—७०

वसन्तकाले जलक्रीडां कुर्वन्त्यः कृष्णभार्याः सर्वाः सुन्दरं साम्बं विलोक्य कामयुक्ताः बभूवुः। तत् दृष्ट्वा कृष्णः ताः सर्वाः अशपत्। ततः ताभिः प्रार्थितः सः कृष्णः "दाल्भ्यर्षिः

कृष्णसुतः श्रीमान् साम्बः गच्छन्नासीत्। तदा कृष्णभार्याः सर्वाः मदनशरतप्ताः तं साभिलाषम् अपश्यन्। तत् विलोक्य जगन्नाथः कृष्णः शापं ददौ। ततः प्रसादितः कृष्णः शान्तः भूत्वा, "दालभ्यः मुनिः यत् व्रतं कथयिष्यति तेन युष्माकं मनोरथाः पूरिताः भविष्यन्ति" इति अवदत् इत्युक्तमत्र।

(२०-२१)

दाल्भ्यः वेश्यात्वं प्राप्ताः कृष्णपत्नीः दृष्ट्वा एवं वदति—

पुरा भवन्त्यः सर्वाः हुताशनसुताः अप्सरसः आसन्। मानसे सरसि जलक्रीडाविहारपराः भवन्त्यः समीपे आगतं नारदं गर्वेण अप्रणम्य, 'उपदेशः क्रियताम्' इति अवदन्। अतः नारदः शापं ददौ। तेन शापेन, कृष्णस्य शापेन च ईदृशी गतिः अभवत्। कर्तव्यं व्रतमहमुपदिशामि इति अत्रोक्तम्।

**अध्याय—७२**

(१०-१३)

शुक्रविरोचनसंवादे शुक्रः अङ्गारकव्रतमाहात्म्यं वदति—

पुरा कुपितः शिवः दक्षविनाशाय वीरभद्रं जनयामास। भीमवदनस्य शूलिनः ललाटात् स्वेदबिन्दुः पतितः। सः स्वेदबिन्दुः सप्तपातालान्, सप्त सागरान् च भित्त्वा अदहत्। तस्मात् अनेकवदननेत्रः, ज्वलज्ज्वलनभीषणः करपादायुतैर्युतः वीरभद्रः

यत् व्रतं कथयिष्यति तदनुष्ठानेन पूरितमनोरथाः भवेत" इति अवदत् इत्युच्यते। अत्र अन्ये विषयाः त्यक्ताः।

दाल्भ्यः मुनिः—दाभ्यः मुनिः इत्युच्यते।

(११-१२)

अत्र मानससरसि क्रीडितवत्यः नार्यः हुताशनसुताः अप्सरसः इति नोच्यते।

प्रणामाकरणकारणं गर्वः इति च नोच्यते।

**अध्याय—७२**

(५-७)

दक्षः यज्ञमकरोत्। यज्ञाय शिवं नाहूतवान्। शिवस्य भार्या स्वपित्रा अनाहूतापि यज्ञं द्रष्टुं गता। तत्र दक्षः शिवं निनिन्द। अतः सती मृता। तत् श्रुत्वा क्रुद्धः शिवः वीरभद्रम् उत्पादयामास—इति अत्र दक्षविनाशस्य कारणमपि उच्यते। अयमधिकः विषयः।

जातः। सः यज्ञमथनं कृत्वा दक्षं च हत्वा जगत्र यं दहन् शिवेन विनिवारितः

( २०-२१ )

विविधा च रुचिः विदूरगा यस्मात् तव जाता तस्मात् देवदानवाः विरोचन इति वदन्तीति विरोचननामोत्पत्तिकारण-मत्रोक्तम्।

( २१—२२ )

"शूद्रेण क्रियमाणस्य व्रतस्य दर्शनात् प्राप्तां तव रूपसंपत्ति विलोक्य अहं विस्मितवान्। अत एव साधु-साधु इति मयोक्तम्" इति शुक्रः वदति।

( २३ )

भक्त्या कृतं गवादिदानं दृष्ट्वा त्वया निन्दितम्। अत एव त्वम् असुरगर्भे जातः" इति अत्रोच्यते शुक्रेण।

अध्याय—१००

विभूतिद्वादशीव्रतम्

(१-७)

पुरा रथन्तरे कल्पे पुष्पवाहनो नाम राजा आसीत्। लोकेषु विख्यातः सः तेजसा सूर्यतुल्यः आसीत् तस्य तपसा तुष्टेन

( १० )

अत्र तु तत् कारणं नोक्तम् श्रेष्ठया कान्त्या तत् नाम लब्ध-मित्युच्यते।

अयं विषयः अत्र त्यक्तः।

( १० )

अत्र तु "पूजायां निवेदनार्थं गौर्हृता। त्वया तत् कर्म निन्दितम्। अत एव त्वया असुर जन्म लब्धम्" इत्युच्यते शुक्रेण।

अध्याय—८९

(१५-१९)

एकदा पुष्पवाहनो नाम नृपः तपसा ब्रह्माणं प्रीणयित्वा वरान् लेभे। पुष्पवाहनेन सः सर्वत्र व्यचरत्। सः पुष्करद्वीपे

ब्रह्मणा यथाकामंगमं हैमं कमलं तस्मै नृपाय दत्तम् समस्तैः लोकैः नगरवासिभिः सहितः नृपः द्वीपानि, सुरलोकं च तदा यथेष्टं व्यचरत् । यतः ब्रह्मणा तस्मै अम्बुजं यानं दत्तं तस्मात् देवदानवाः तं पुष्पवाहनं वदन्ति । शिवस्य पार्वतीव तस्य इष्टतमा लावण्यवती भार्या आसीत् । सः नृपः आत्मनः पुण्यफलं सर्वं विलोक्य मुहुर्मुहुः विस्मयं प्राप । सः एकदा आगतं मुनिश्रेष्ठं प्राचेतसं एवमपृच्छत् इत्यत्रोच्यते ।

( ८-१० )

"मुनिश्रेष्ठ, अमरमर्त्यपूज्या अमला विभूतिः कस्मात् जाता ? 'विजितामरसुन्दरी भार्या कथं लब्धा' । अस्य पुष्पवाहनस्य प्रभावस्तु महान् खलु । सामात्यगजरथौघजनावृतानां नृपाणां कोटिशतम् अस्मिन् प्रविष्टमपि न लक्ष्यते । मम अल्पतपसा संतुष्टेन ब्रह्मणा इदं पद्मगृहं दत्तम् । इदं सर्वमस्मिन् जन्मनि कृतस्य पुण्यकर्मणः फलं न भवेत् । गते जन्मनि मया वा मम भार्यया वा पुत्रैः वा महत् धर्मादिकं कृतं किम् ? अखिलं कथ्यतां मुनीन्द्र" इति नृपः पप्रच्छ इत्यत्रोच्यते ।

(११-१३)

मुनिः नृपं एवमुवाच—

"पूर्वजन्मनि अतिघोरे लुब्धकुले तव जन्म अभवत् । प्रतिदिनं त्वं पापकारी आसीः । तव वपुः समन्तात् दुर्गन्धि सत्व अवसत् ।

सः रूपवत्या लावण्यवत्या भार्यया सह सुखानि अनुबभूव ।

सर्वे जनाः तं प्रशशंसुः । एवं सः यशस्वी सुखेन अवसत् । सः एकदा आगतं मुनिं प्राचेतसं पूजयित्वा एवं तं पप्रच्छ इति ।

अत्रोच्यते । अन्ये विषयाः त्यक्ता ।

( १९ )

"मुनीन्द्र, महदैश्वर्यं श्रेष्ठा जाया, पुत्राणामयुतं, ब्रह्मदत्तं पुण्यवाहनमित्यादीनि फलानि मम कथं जातानि ? कस्य तपसः फलानि उच्यताम्" इति नृपः पप्रच्छ इत्यत्रोच्यते । अन्ये विषयाः नोक्ताः ।

(२०)

मुनीन्द्रः अत्र एवं वदति—

"नृप, गते जन्मनि किरातकुले त्वं जातः । पितरि, मातरि, अन्येषु त्वदीयेषु जनेषु च ते प्रीतिः नासीत् । किन्तु जायैव

भुजगावरणम् अभवत् । ते प्रियतमः बन्धुजनः कोऽपि नासीत् । इयं योषिदेव तव अभीष्टतमा आसीत् । इयमेव पूर्वमपि तव भार्या" इत्युक्तमत्र ।

(१३)

अनावृष्टया धान्यफलामिषाद्यं न लब्धम् । क्षुत्पीडा अतीव जाता इत्युक्तमत्र ।

( १५-१६ )

"पद्ममौल्यलाभाय त्वया वैदिशं पुरं समस्तं भ्रान्तम् । कमलानि न कोऽपि अक्रीणात् । अतः त्वं भृशं श्रान्तः क्षुत्परिपीडितश्च भूत्वा एकस्मिन् भवनाङ्गणे उपविष्टः आसीदिति अत्र मुनिना उच्यते ।

( २३ )

अनङ्गवत्या आनीतं चतुर्विधं अन्नमपि न भुक्तम् इत्यत्रोच्यते ।

( २८ )

द्वितीयदिने मित्रदीनान्धकृपणैः समं भोजनं भुक्तम् इत्युक्तमत्र ।

प्रियतमा आसीत् । मृगादीन् हत्वा जीवनं त्वया कृतम्" इति ।

(२१)

अनावृष्टिः जाता । अतः ते आहारार्थं मृगाः न लब्धाः इति केवलमत्रोच्यते ।

( २२ )

कमलानि आदाय विदिशानगरं त्वं प्राप्तः । तत्र त्वया भ्रान्तम् । किन्तु पुष्पक्रेता न कश्चिदासीत् । अतः सभार्यः त्वं रात्रौ क्षुधापीडितः आसीः'' इति मुनिना अत्र उच्यते । इति नोक्तम् ।

श्रान्तेन तेन भवनाङ्गणे उपविष्टमिति नोक्तम् ।

( २७ )

अत्र तु अन्नं न भुक्तमिति न केवलमुक्तम् । चतुर्विधं इति नोक्तम् ।

( ३० )

अत्र तु बन्धुमित्रैः सह भुक्तमित्युच्यते ।

अध्याय—११५

(१०-१४)

द्विजग्रामे द्विजश्रेष्ठः राज्यकामः जनार्दनं पूजयामास। सोपवासः अभ्यङ्गपूर्वकं स्नानं चकार। उपवासफलात् राज्यं प्राप्तम्। तथापि अभ्यङ्गात् रूपहीनः जातः। "उपोषितैः नरैः अभ्यङ्गपूर्वकं स्नानं प्रयत्नेन वर्जनीयम्। अभ्यङ्गेन रूपहानिः भवेत्' इति शास्त्रं वदति, इत्यत्रोच्यते।

(१६-१७)

मद्रेशः सर्वैः राजगुणैरुपेतोऽपि रूपहीनत्वात् तस्य जनानुरागः नैवासीत्। अतः सः नृपः रूपकामः तपश्चरितुमियेष। कृत-निश्चयः सः नृपः राज्यं मन्त्रिगतं कृत्वा हिमाचलं ययौ इत्यत्रोच्यते।

अध्याय—१२९

(३—७)

मायानां जनकः मयासुरः, बलवान् विद्युन्माली, वीर्यवान् तारकः एते त्रयः दानवाः लोकत्रयं तापयन्तः मूर्ताः त्रयः अग्नयः इव तेपुः इत्यत्रोच्यते।

अध्याय—१०३

(७-९)

द्विजश्रेष्ठः सोपवासः अभ्यङ्गपूर्वकं स्नानमकरोत्।

उपवासफलात् राज्यं लब्धम्। तथापि अभ्यङ्गात् रूपहानिः जाता इत्युच्यते।

किन्तु शास्त्रवाक्यं नोक्तमत्र।

(१०-)

सर्वैः जनैः उपहसितत्वात् रूपहीनः मद्रेशः रूपकामः तपश्चरितुमुत्तरां दिशं प्रतस्थे इति केवलमत्रोच्यते।

सर्वराजगुणोपेतः नृपः राज्यममात्यगतं कृत्वा प्रतस्थे इति नोक्तम्।

उत्तरकाण्डे—३१

(२-६)

मायायामति समर्थः मयः तपः तताप। तस्य पार्श्वे विद्युन्माली, तारकश्च तपस्तेपतुः इति केवलमत्रोक्तम्।

(१०-१३)

तेषां तपःप्रभावेण जगत् सर्वं निष्प्रभं जातम्। तैः त्रिभिः दानवाग्निभिः लोकेषु दह्यमानेषु तेषां पुरतः जगद्बन्धुः पितामहः प्रादुर्बभूव। ततः साहसकर्तारःते दानवाः सहसागतं स्वकं पितामहं ब्रह्माणं तुष्टुवुः। अथ तपनप्रभान् तान् दानवान् हर्षपूर्णनेत्रः, हर्षपूर्णवदनः ब्रह्मा उवाच—"वत्साः, 'तपस्तोषितोऽहं वरदः आगतः' ईप्सितं व्रियताम्। अभिलषितमुच्यताम्" इति अत्रोच्यते।

( १६-२१ )

प्रहर्षोत्फुल्ललोचनः मयः ब्रह्माणमेवं वदति—"देव पुरा संग्रामे देवैर्दैत्याः निर्जिताः। आयुधैः ताडिताः हताश्च। देवैः वैरानुबन्धात् भयवेपिताः धावन्तः शरणार्थिनः शरणं न लेभिरे। सोऽहं तपःप्रभावेण भक्त्या च देवैरपि दुस्तरं दुर्गं कर्तुमिच्छामि। तस्मिन् त्रिपुरे दुर्गे मत्कृते भूम्यानां, जलजानां च शापानां मुनितेजसां देवप्रहरणानां देवानां च अलङ्घनीयं भवतु त्रिपुरं यदि ते प्रियम्" इति।

(२२-२७)

मयस्य वचनं श्रुत्वा ब्रह्मा एवं वदति प्रहसन्—"दानव असद्वृत्तस्य सर्वामरत्वं नैवास्ति। तस्मात् दुर्गविधानं तृणादपि विधीयताम्" इति।

(५-६)

मयस्य तपःप्रभावेण सूर्यचन्द्रनक्षत्राणि न्यूनप्रभायुक्तानि बभूवुः। तस्य सोदरौ तस्य पार्श्वे तेपतुः। तदा कमलासनः आविर्भूय "दुष्करेण तपसा प्रीतोऽहम्। वरः व्रियताम्" इति केवलमत्रोच्यते।

( ७-१० )

मयः ब्रह्माणमेवं वदति—"देवैः असकृत् वयं पीडिताः। अतः दुःखिताः वयं देवैरपि दुस्तरं दुर्गं कर्तुमिच्छामः। त्रिपुरं दुर्गं मनस्संचारचारितं भवितव्यम्। इन्द्रवज्रेण, विष्णुचक्रेण अन्यैः आयुधैश्च तस्य नाशः न भवितव्यः"। इति।

(११-१२)

ब्रह्मा मयं प्रति एवं वदति—"दानव वरः दत्तः। किन्तु त्वया करिष्यमाणस्य त्रिपुरयुक्तस्य दुर्गस्यापि नाशः भवेदेव। तस्य केन प्रकारेण नाशः भवितव्यः इति त्वयैव उच्यताम्।

ततः दानवः मयः प्राञ्जलिः पुनरपि पद्मसंभवं ब्रह्माणमेवं वदति—"परमेश्वरः सकृत् मुक्तेन एकेषुणा दुर्गं निर्दहेत्। सः संयुगे समं हन्यात्। शेषतः अवध्यं भवेत्" इति।

तत् श्रुत्वा ब्रह्मा तथैवास्तु इति कथयित्वा गतः। गते ब्रह्मणि ते दैत्याः वरदानात्, तपसा च महाबलाः विरेजुः। महाबुद्धिमान्, वृषसत्तमः सः मयस्तु दुर्गं कर्तुमचिन्तयत् इति अत्रोच्यते।

अ—१३१
(१०-१७)

मयेन निर्मिते स्थाने असुराः सर्वे संतुष्टाः आसन्। ते धर्मार्थकामेषु मतीः स्वयमेव निदधुः। त्रिपुरयुक्तानां तेषामसुराणां स्वर्गस्थानां देवानामिव सुखमभवत्। कालः सुखेन व्यतीतः। सुताः पितॄन्, भार्याः पतींश्च शुश्रूषन्तेस्म। ते सर्वे व्यक्तकलहाः आसन्। त्रिपुरस्थानामसुराणां भक्तिः आसीत्। अधर्मः न बभूव। ते सर्वे हरं आनर्चुः भक्त्या ते वेदगान् पुण्याहशब्दान्, अशीर्वादांश्च उच्चेरुः। ते सर्वे प्रत्यहं देवान् अर्चन्ति स्म। विप्रांश्च ववन्दिरे।

एवं धर्मार्थकामेषु पुरुषार्थेषु आसक्तानां तेषां महान् कालः गतः।

अथ अलक्ष्मीः, असूया, तृड्बुभुक्षे, कलिः, कलहश्चैव सहिताः त्रिपुरं अविशन् इति अत्र वर्ण्यते।

यत् त्वं वदसि तथा भवेत्" इति। ततः मयः एवं वदति—यदा पुण्ययोगेन पुराणि एकत्र समेष्यन्ति तदा यः कोऽपि तानि निर्दग्धुं शन्कुयात्। अयं वरः दीयता"मिति। ब्रह्मापि तदङ्गीचकार। मयः दुर्गं निर्मातुमियेष इति अत्रोच्यते।

उत्तरकाण्डे—३३
(४-६)

नानाविधान् भोगान् अनुभूतवन्तः ते सर्वे असुराःमयनिर्मिते त्रिपुरे प्रतिदिनं परमेश्वरमपूजयन् वेदघोषाः तत्र श्रुताः। नारीनूपुररवः, वेणुवाद्यरवः वीणावाद्यरवः अन्यवाद्यरवश्च तत्र सर्वदा श्रुताः।

प्रतिदिनं ते सर्वे देवपूजामकुर्वन्। धर्मनिरताः आसन्। विप्रोत्तमान् नमस्कृत्य शशंसुः।

एवं कालः गतः। त्रिपुरस्य नाशकालः आगतः। अतः हरेः मायया बहवः विपरीताः बभूवुः। तेषां मतिः विकृता अभवत् इति अत्रोच्यते।

(१७-२१)

अथ सन्ध्याकाले त्रिपुरे प्रविष्टाः आमयतुल्याः, घोराः भयावहाः असुरेन्द्रेण स्वप्ने दृष्टाः ।

उदिते सूर्ये मयः सभां प्रविवेश । तेन सह तस्य सोदरौ च आगतौ । अत्र कविः वर्णयति—भास्कराभ्यां मेघः इव मयः सभामाविवेश । मेरुशिखरतुल्ये रम्ये कनकमण्डिते आसने स्वर्णगिरिशृङ्गे अम्बुदः इव मयः उपाविशत् । तस्य समीपे तस्य सोदरौ गजकलभौ इव उपविष्टौ । एवमत्र वर्णितम् ।

(२४-२७)

असुरेन्द्रः मयः सुखासनगतान् देवशत्रून् विलोक्य एवं वदति—'भोः दाक्षायणीसुताः, मया भयावहः स्वप्नः दृष्टः । तं शृणुत—चतस्रः नार्यः भयावहाः त्रयः मर्त्याश्च दुर्गं प्राविशन् । ते सर्वे त्रिपुरार्दिनः कोपाग्निदीप्तवदनाः, अतुलविक्रमाः पुराणि प्रविश्य अतीव रुषिताः बहुशरीरिणः बभूवुः । तदा इदं त्रिपुरं नगरं तमसा समवस्थितम् । ततः नगरमिदं सगृहं युष्माभिः सह समुद्रजले मज्जितम् । एवमत्रोच्यते ।

(२९-३१)

पुनश्च सः दानवेन्द्रः स्वप्ने दृष्टं विषयमन्यं च कथयति—

(७-११)

ते असुराः शनैः शनैः धर्मकर्माणि अत्यजन् । कारणं विना ते सर्वे कलहं कर्तुं आरेभिरे । पापकर्मसु मतिं चक्रुः । व्याधितुल्येषु दुष्कृत्येषु आसक्ताः आसन् । तस्मात् दुःखसागरमग्नाः बभूवुः ।

अयं विषयः अत्र अधिकः ।

असुरेन्द्रः मयः रात्रौ घोरं स्वप्नं अपश्यत् । रात्रिः गता । प्रातः सुकर्माणि कृत्वा मयः सभां प्रविश्य मेरुतुल्ये सिंहासने उपविश्य सर्वान् असुरान् दृष्ट्वा एवमवोचत् इति अत्र वर्ण्यते ।

(१२-१४)

दानवपतिः मयः सभायामासीनान् सर्वान् असुरान् दृष्ट्वा एवं स्वप्नं वर्णयति—

"हे त्रिपुरालयाः दानवाः, मया पूर्वेद्युः रात्रौ घोरः स्वप्नः दृष्टः। शृणुत तं स्वप्नम् मात्सर्ययुक्ताः, क्रुद्धाः चतस्रः कन्याः चत्वारः पुरुषाश्च अनलदीप्तमुखाः दुर्गं विविशुः । उन्नतं गोपुरमारुह्य नाशयन्तिस्म । भित्तयः पादैः ताडिताः अपतन् । पश्यति मयि तत् सौधमधः पततिस्म । त्रिपुरं चूर्णमभवत् । सर्वत्र अन्धकारः व्याप्तः । एवमत्रोक्तम् ।

(१४-१६)

स्वप्नस्य अन्यः भागः संप्रति तेन असुरपतिना एवमत्र

एका मञ्जुला नारी नग्ना उलूकं खरं च रूढा त्रिपुरमागता । चतुरङ्घ्रिः, त्रिलोचनः सिन्दुतिलकः कश्चन पुरुषश्च आययौ । सा रुचिरा नारी तेन पुरुषेण नुन्नाभवत् । अहं च विबोधितः । एतादृशी भयावहा नारी मया विलोकिता । हे दितिपुत्राः ईदृशः भयंकरः स्वप्नः मया दृष्टः । अस्माकमसुराणां कीदृशं कष्टं भविष्यतीति न जाने । किन्तु कष्टमवश्यं भविष्यत्येव । अत्र स्वप्नवृत्तान्तः एवमुक्तः ।

(३२-३५)

पुनः मयः असुरान् एवं वदति "हे दितिपुत्राः, यदि अहं युष्माकं क्षमः नृपः, यदि मद्वचनं हितं वेत्थ तर्हि शृणुत ।

संप्रति देवैः सह विद्वेषः न कर्तव्यः । कामम्, ईर्ष्यां, क्रोधं, असूयां च त्यजत । सत्ये, धर्मे, दमे, मुनिवादे च आसक्ताः भवत । शान्तिकर्माणि प्रयुज्यन्ताम् । परमेश्वरश्च पूज्यताम् । यदि एतस्य दुःस्वप्नस्य एवमुपरमः भवेत् महेश्वरः न कुप्येत्" इति ।

(३७-४६)

दितिनन्दनाः मयस्य वचनं श्रुत्वा क्रोधेर्ष्यावस्थायुक्ताः बभूवुः । सत्यं धर्मं च त्यक्त्वा अकार्याणि कर्तुमैच्छन् । विनाशगाः, संक्रोधापूरितेक्षणाः ते असुराः पुण्यान् विप्रान्

कथ्यते—

अतीव मनोज्ञा काचन वनिता नग्ना भूत्वा कस्यचित् पुरुषस्य अंसमारूढा इदं त्रिपुरं प्रति आययौ । सा अत्र सर्वत्र संचरन्ती आसीत् तां सुन्दरीं सर्वेऽपि उपसृत्य चुम्बनं चक्रुः । एवं सा बहुभिः प्रकारैः परिभूता । किं च चतुर्भुजः त्रिनेत्रः कश्चन पुरुषोऽपि तां चकर्ष । बहूनि अवाच्यानि कर्माणि कृतानि । अनेन स्वप्नेन नूनं कष्टं भविष्यति । एवमत्र स्प्नवृत्तान्तः उच्यते ।

(१६-१७)

अत्र असुरराजः दानवान् एवं वदति—

"हे दानवाः, अस्मिन् समये कष्टनिवारणार्थमस्माभिः शान्तिकर्म कर्तव्यम् । तेन कष्टनिवृत्तिः भवेत् । सत्ये दमे च मनः आसक्तं भवतु । यथाविधि ईश्वरपूजा क्रियताम् ।

एवं कर्मणि क्रियमाणे नियमः आवश्यकः" इति । अत्र एवमुच्यते ।

(१७-१९)

मयेन उक्तानि वचनानि श्रुत्वा असुराः "अस्मत्कुलोचितानि कर्माणि विहाय त्वया कथ्यमानानि नूतनानि कर्माणि कर्तुं वयं नाभिलषामः । अतः त्वदीयानि वचनानि श्रोतुमपि नेच्छामः"

द्विषन्तिस्म। देवताः नार्चन्। गुरुं च नामन्यन्त। परस्परं क्रोधमलभन्त। कलहासक्ताः बभूवुः। स्वधर्मान् तत्यजुः। अन्योन्यमनिन्दन्। अहङ्कारः अभूत्। शौचाचारवर्जिताः बभूवुः। असकृत् विनाकारणं भीतिमापुः। रहोवृत्तिषु निर्लज्जाः जाताः। दुःशीलत्वमापुः। मयेन वार्यमाणाः अपि ते असुराः पापकर्माणि चक्रुः—इति अत्र असुरकार्याणि वर्ण्यन्ते।

(४७-४९)

कलहप्रियाः ते दितिपुत्राः विप्राणां विप्रियाणि सर्वदा अकुर्वन्। ते असुराः क्रुद्धाः देवायतनं स्वर्गं तपोधनवनानि च अनाशयन्। तथा नन्दनं, चैत्ररथंवनं सर्वर्तुकं वृक्षश्रेष्ठं च विध्वंसयन्ति स्म। रात्रिषु अखाद्यानि अखादन्। उच्छिष्टाः एव शय्यां संविशेयुः। शौचाचारवर्जिताः अवसन् इति अत्र उच्यते।

**अध्याय :—१३२**

(१-७)

असुरैः लोकेषु उत्साद्यमानेषु सर्वे भीताः अभवन्। भीताः सर्वे देवाः कमलासनं ब्रह्माणं शरणं प्रापुः ते तं नमस्कृत्य एवं वदन्ति—

इति अवदन्।

ततः सः असुरेन्द्रः विधिनैव एवं भवति इत्युक्त्वा गतः।

ततः ते सर्वे असुराः सर्वेषां हिंसां चक्रुः—

इति अत्रोच्यते।

(१९-२२)

क्रूराः ते असुराः सर्वे देवानां तपस्विनां विप्राणां च हिंसां अकुर्वन्। गुरून् अनिन्दन्। उत्तमानां विप्रियाणि चक्रुः। यागान् अनाशयन् स्त्रीहत्यामकुर्वन्। पतिव्रतानां करं बलात् गृहीत्वा मार्गे कलहं चक्रुः विना कारणं वीराः। दुष्कृत्यानि बहूनि यथेच्छमकुर्वन्। शौचाचारविवर्जिताः बभूवुः। देवालयान्, तपोधनाश्रमांश्च विध्वंसयन्ति स्म। सुकर्माणि, पूजां च अत्यजन्। दुष्कृत्यान्येव सर्वदा चक्रुः।

**उत्तरकाण्डे-अध्याय :—३४**

(२-४)

देवाः सर्वे असुरपीडामसहमानाः चतुराननं प्राप्य तं नत्वा एवमूचुः—

| | |
|---|---|
| "प्रपितामह, त्वद्वरगुप्ताः त्रिपुरालयाः असुराः सर्वान् यथेच्छं बाधन्ते । मेघागमे हंसा इव, मृगेन्द्रभयात् हरिणाः इव च असुरभयात् वयं सर्वे अभ्रमाम । असुरैः भ्राम्यमाणानाम् अस्माकं भीत्या पुत्रकलत्रनामधेयानि विस्मृतानि लोभमोहान्धैः असुरैः देवायतनप्रभङ्गाः आश्रमभ्रंशनानि च क्रियन्ते इति अत्र असुरपीडाः वर्णिताः । | "असुरबाधाभीताः वयं व्याघ्रभीताः मृगाः इव सर्वत्र अधावाम । पुण्यकर्माणि सर्वाणि नष्टानि । प्रत्यहं सूर्यचन्द्र-सञ्चारः न भवति । देवायतनानि, तपोधनवनानि च विध्वं-सितानि तैः असुरैः । एवमत्र असुरदुष्कृत्यानि वर्णितानि । |
| (९-) "प्रपितामह, असुरैः विद्रुतं लोकं यदि शीघ्रं न रक्षसि तर्हि अयं लोकः अनेन धर्षेण निर्देवः निर्मनुष्यः निराश्रमश्च भवेत्" इति देवाः ब्रह्माणं वदन्त्यत्र । | (५-) देवाः चतुराननमेवं वदन्ति—'यदि भवान् असुरा-णामायुषः समाप्ति न करोत्यद्य तर्हि त्रिपुरवासिनः सर्वे असुराः सर्वलोकनाशं कुर्युः । ततः, पुनः भवता नूतनसृष्टिः कर्तव्या भवेत् । भवतः कृपया अतिश्रमेण अत्रागताः । भीताः वयं भवन्तमेव शरणमागताः । रक्षणमार्गः भवतैव वक्तव्यः" इति । अत्र अधिकतया एवमुच्यते । |
| (१०-१६) चतुराननः सेन्द्रान् देवान् एवं वदति— "मतिमतांवराः सुराः, शृणुत—मयस्य मया दत्तस्य वरस्य समाप्तिकालः संप्राप्तः । तेषामसुराणामधिष्ठानत्रिपुरं एकेषु-पातमोक्षेण हन्तव्यम् । न शरवृष्टिभिः । यस्तु एकप्रहारेण त्रिपुरं हन्तुं शक्नुयात् सासुरं तादृशं महा-वीरं कमपि भवतां मध्ये न पश्यामि । | (६-७) देवानां वचनं श्रुत्वा चतुर्मुखः एवं वदति—"भीतिः मास्तु । सर्वदुःखप्रदानां त्रिपुरासुराणां नाशकालः आगतः । मयस्य वरदानकाले—पुण्ययोगेन युक्तानि त्रिपुराणि जय-प्रदेन एकशरेण महावीरः यदि हन्यात् तदा नाशः भवेत् । |

अल्पवीर्येण इषुणा त्रिपुरनाशः कर्तुं न शक्यते ।
महादेवं महेशानं विहाय नान्येन त्रिपुरदाहः कर्तुं शक्यते ।

अतः सर्वैः देवैः याचितः यागविध्वंसकः परमेश्वरः त्रिपुरं नूनं हनिष्यति । योजनानां शतं शतं कृतः पुराणः विष्कम्भः एकप्रहारेण हरेण नाशयितुं शक्यते । अतः महादेवं द्रष्टुं सर्वैः गन्तव्यम्" इति अत्र उच्यते ।

(१६-१७)

'चतुराननस्य वचनं श्रुत्वा देवाः तं महादेवमेव यास्यामः इति ऊचुः । ततः ब्रह्मदेवश्च तैः देवैः सह भवसंसदमागतः इत्यत्रोच्यते ।

अत्र चतुरानन-नारायण संवादः नोच्यते ।
चतुर्मुखः देवैः सह परमेश्वरमेव द्रष्टुं गतः इत्युक्त्वा इत्युक्तं मया । एवं एकेषुणा एकप्रहारेण त्रिपुरं 'नाशयितुं' कः शक्नुयात् ?

क्षीरसागरात् आगतं हालाहलं स्वकण्ठस्थं कृत्वा सर्वान् रक्षितवन्तं नीलकण्ठं कृपासागरमनुपमं महादेवं विना अन्येन त्रिपुरनाशः कर्तुं न शक्यते—इति चतुर्मुखः देवान् अवदत् इत्यत्रोक्तम् ।

(९-१३)

ब्रह्मदेवः देवान् सान्त्वयामास । ततः सः हंसारूढः तैः देवैः सह महाविष्णुं द्रष्टुं ययौ । ते सर्वे देवाः पञ्चायुधधारिणं, "जगद्रक्षकं, लक्ष्मीकान्तं क्षीरसागरशायिनं, वैकुण्ठवासिनं नारायणं नेमुः । ततः ब्रह्मदेवः तं दृष्ट्वा "त्रिपुरवासिनः दानवाः तपोबलेन बहून् हतवन्तः । सर्वान् देवान् वरनिर्भयाः ते बाधन्ते । देवाः दीना जाताः । तेषां पीडया सर्वलोकनाशः भविष्यति । अतः तान् क्रूरान् हत्वा धर्मं स्थापय" इति उवाच इत्यत्र अधिकतया वर्ण्यते । संस्कृतपुराणे तु ब्रह्मदेवः देवैः सह महादेवमेव प्रापेत्युक्तम् । अत्र तु नारायणं प्राप्य एवं प्रार्थयामास इति च उच्यते ।

(१४-१५)

नारायणः तान् देवान् प्रति "सासुरं त्रिपुरं नाशयितुं,

ब्रह्मादिसर्वदेवकृतमहेश्वरस्तवः सविस्तरं वर्णितः ।

(२२-२९)

अष्टभिः श्लोकैः अत्र सर्वदेवकृतमहेश्वरस्तवः वर्ण्यते ।

(१६-२१)

सर्वे देवाः महेश्वरं ददृशुः । सः भवः भूतभव्येशः, शूलपाणी गिरिशः, उमया सार्धमासीत् । महात्मा नन्दिदेवश्च तत्रासीत् । अग्निकुण्डतुल्यलोचनं, वह्निवर्णं, अजं, अग्निवर्णविभूषितं, इन्दुनिभाननं, अग्न्यादित्यसहस्राभं, नीललोहितं, वरदं, गोपतिं तं शम्भुं विलोक्य ते सर्वे एवं स्तुवन्ति स्म—इत्यत्र महादेवदर्शनं वर्णितम् ।

महेशः एव समर्थः । अन्ये न शक्ताः । अतः वयं सर्वे तमेव यास्यामः" इत्यवदत् । ततः सर्वे महादेवं द्रष्टुं प्रतस्थिरे । एवमत्र अधिकः विषयः उक्तः ।

(१५-२१)

कैलासाद्रिसौन्दर्यं षड्भिः श्लोकैः अत्र वर्ण्यते । अयमपि अधिकः विषयः ।

(२७-३३)

अत्र सप्तभिः श्लोकैः परमेश्वरस्तवः वर्ण्यते ।

(२३-२६)

ब्रह्मविष्णुयुक्ताः ते सर्वे देवाः हिमगिरिसुतायुक्तस्य, वृषयानस्य महादेवस्य संसदं कैलासाद्रिं गत्वा द्वारस्थं नन्दिदेवं नत्वा 'वयं सर्वे परमेश्वरं द्रष्टुमिच्छामः' इत्यूचुः । नन्दिदेवः सर्वदेवागमनं महादेवमुवाच । ततः ते सर्वे देवाः महेश्वरं ददृशुः । तं दृष्ट्वा ते सर्वे एवं स्तुवन्ति स्म इत्यत्रोच्यते ।

अध्याय :—१३४

(३-६)

रणाङ्गणात् प्रभुः देवर्षिः नारदः प्रतस्थे। कान्त्या चन्द्र-तुल्यः सः द्रुतं त्रिपुरं ययौ। त्रिपुरे दानवानामौत्पातिकं ध्रुवं अस्तीति भगवान् तपोधनः नारदः चिन्तयति। आगतं नारदं विलोक्य सर्वे दैत्याः उत्थाय अभिवादनमवदन् चतुराननं देवेन्द्रः इव मयादयः तं नारदं अर्घ्येण, पाद्येन, मधुपर्केण च अपूजयन्। हैमे परमासने सुखमासीनः महामुनिः तपोधनः पूजार्हः सः नारदः पूजया सन्तुष्टः बभूव। असुरैः सार्धं यथार्हमासीनः दैत्याधिपः मयः तुष्टः, हृष्टरोमाननेक्षणः आसीनं नारदं मेव मुवाच इति अत्र उच्यते।

(१०-१५)

मयः नारदं वदति—

"मुनीन्द्र, अस्माकं पुरे यथा औत्पातिकं वर्तते तथा नान्यत्र कुत्रचित्। कारणं न ज्ञायते। भयप्रदाः दुःस्वप्नाः दृश्यन्ते। ध्वजाः भज्यन्ते। विना पवनेन केतुः भुवि पतति। सपताकाः सगोपुराः अट्टालकाश्च नृत्यन्ति। पुरे हिंसहिंसेति भयप्रदाः गिरः श्रूयन्ते। इन्द्रादिभिः देवैः किमपिकर्तुं न शक्यते। अतः तेभ्यः न भीतोऽहम्। भक्ताभयप्रदं, वरदं स्थाणुं हरं मत्वैव बिभेमि। भगवन् अविदितं किमपि नास्ति भवतः। अतः

अध्याय :—३६

(२-३)

त्रिपुरे महाबलिष्ठेन मयेन सह सर्वे असुराः सभायामुपविष्टाः आसन्। तदा नारदमुनिः तत्रागतः। स्वपुरमागतं नारदं नत्वा असुराधिपः तं दृष्ट्वा अस्माकं पुण्यकर्मणा भवानागतः अत्र इति प्रशशंस। ततः सः तं पूजयित्वा एवं वदति इति केवलमत्र उच्यते।

(३-६)

असुराधिपः मुनिश्रेष्ठं विलोक्य एवं वदति—

"नारद, त्रिपुरस्य आपदागमिष्यतीति बिभेमि। त्रिपुरे औत्पातिकाः भवन्ति। रथध्वजनाशः भवति। विना वायुना केतनानि भग्नानि। तानि भुवि अपतन्। अट्टानि च शिथि-लानि जातानि। सर्वत्र रिपूणां वधघोषाः श्रूयन्ते। एतादृशैः उत्पातैः किं भविष्यतीति न जाने। सर्वज्ञेन भवता सर्वमुच्य-ताम्" इति।

उत्पाताभिनिवेदितं भयस्थानं तत्त्वतः कथयतु भवान्" इति। अत्र मयस्य वचनानि एवमुक्तानि।

**अध्याय—१४०**

(४४-५३)

अथ पुष्ययोगः अभवत्। तद्योगेन पुरत्रयमपि संयुक्तम्। ततः परमेश्वरः त्रिदैवतमयं शरं त्रिपुरे मुमोच। तेन मुक्तेन शरेण, रविरञ्जितं नभः कनक तुल्यं कृतम्।

तदा परमेश्वरः नन्दिदेवमुवाच—'अद्य भक्तस्य मयस्य विनाशः भविष्यतीति। ततः बलिष्ठः नन्दीश्वरः मनोमारुतवत् द्रुतं त्रिपुरं गत्वा मयं ददर्श। कनकोपमः गणपः सः तं विलोक्य 'मय अस्य त्रिपुरस्य सुदारुणः विनाशः आगतः। अनेनैव गृहेण त्वमपक्राम मद्वचनं शृणु' इति उवाच। शिवेदृढभक्तः मयः तथैव त्रिपुरादपसर्पितः सद्यः अरेण पुरत्रयं दग्धम्—इति अत्रोच्यते।

(५४-५७)

शरतेजसा रम्याणि मेरुकैलासतुल्यानि मन्दराग्रनिभानि शोभितानि, सर्वाणि प्रासादानि दग्धानि। बद्धध्वजपताकानि, स्वर्णरौप्यमयानि गृहाणि च दग्धानि इत्यत्रोच्यते।

एवमत्र असुरेन्द्रवार्ता उक्ता। अन्ये विषयाः मयवचनेषु त्यक्ताः।

**अध्याय—४३**

(२-६)

तस्मिन् दिने पुष्ययोगः जातः। तदा असुराणां पुरत्रयं तद्योगेन संयुक्तमभवत्। तत् ज्ञात्वा परमेश्वरः, सासुरस्य तस्य त्रिपुरस्य नाशाय क्रूरं शरमेकं मुक्तवान्। सुदारुणात् तस्मात् शरात् अग्निः जातः। सः भयावहः वह्निः पुरत्रयं दग्धुमारेभे। पुराणि शरतेजः परीतानि बभूवुः—इत्यत्रोच्यते। ततः शिवः 'तस्मात् अग्नेः मम भक्तं मयं रक्षितुं त्रिपुरं गच्छ। स्वगृहेण सः अन्यत्र गच्छतु, इति वद' इति नन्दिनं प्रेषयतीत्यत्रोच्यते। ततः मयः तथैव गच्छति।

(७-१२)

अत्र तु अग्निना रथगजाश्वशालाः, आयुधशालाः गीतनृत्यशालाः, वनितालयाः, पानशालाश्च पाकशालातुल्याः बभूवः इति उच्यते।

(५९)

प्रियैः रमन्त्यः असुराङ्गनाः दग्धाः। काचित् प्रियं हित्वा अन्यतः गन्तुमशक्ता प्रियस्य पुरतः अग्नौ मृता। अन्या काचित् कृताञ्जलिः 'अग्निदेव, परस्य भार्याहम्। धर्मसाक्षी त्वं मां स्प्रष्टुं नार्हसि। मे दयितं गृहं च विहाय गच्छ' इति अवदत्। अन्या असुराङ्गना "षण्मुखप्रिय, अग्ने, दुःखलब्धं मम बालं पतिं च उपादातुं नार्हसी'त्यवदत्।

(६५-६७)

काश्चित् असुराङ्गनाः पीडिताः प्रियान् विहाय समुद्रजले अपतन्। मातः, जनक, मातुल, सुत इति चक्रन्दुः त्रिपुर-वनिताः अग्निदग्धाः। त्रिपुराङ्गानानां मुखलोचनकमलानि अग्निः अदहत्।

(८२)

त्रिपुरविजयानन्तरं देवेन्द्रः महेश्वरं पूजयामास। सर्वे देवाः तं महादेवं तुष्टुवुरित्युच्यते।

**अध्याय :—१४६**

(४५-४६)

दितिः स्वसुतं वज्राङ्गमुवाच—"पुत्र, सहस्राक्षेण बहवः मे सुताः हताः। तेषां प्रति कर्तुमिन्द्रवधाय त्वं याहि' इति।

किंच सर्वाणि सौधानि, उद्यानानि च दग्धानि। सर्वे जलाशयाः शुष्काः अभवन्। सर्वसेनाः नष्टाः इति चात्रोच्यते।

अत्र इयं वर्णना परित्यक्ता।

असुराङ्गनाप्रलापः अत्र न वर्णितः।

(२४-)

त्रिपुरदाहानन्तरं परमेश्वरः रथादवरुरोह। ततः सर्वे देवाः तं महादेवमपूजयन् तं नत्वा प्रशशंसुरित्यत्रोच्यते।

**अध्याय :—४९**

(१६)

अत्र तु दितिः 'देवेन्द्रं बद्ध्वा मम पुरतः आनय' इति केवलं पुत्रं वदति। कारणं तया नोच्यते।

बली सः दैत्याधिपः, वज्राङ्गः, बाढमित्युक्त्वा त्रिदिवं ययौ—इत्यत्रोच्यते ।

(४७-५२)

ततः सः वज्राङ्गः इन्द्रममोघवर्चसा पाशेन बद्ध्वा क्षुद्रमृगं व्याघ्रः इव आगच्छत् । तदा ब्रह्मा कश्यपश्च तत्र आगतौ । 'पुत्र इमं मुञ्च । अनेन किं प्रयोजनम् ? अपमानः वधः प्रोक्तः । महतां वशमायाते वैरिणि वैरं नैवास्ति' इति ब्रह्मा उवाच इत्यत्रोच्यते ।

(५४-६३)

वज्राङ्गः चतुर्मुखं वदति—"देव, तपश्चरितुमहमिच्छामि । त्वत्प्रसादेन निर्विघ्नं भवेत्' इति तदा ब्रह्मा वदति—

'अस्मच्छासनसंस्थितः त्वं क्रूरं तपः आपन्नः । अनया चित्तशुद्ध्या ते जन्मनः फलं पर्याप्तमिति ।

ततः सः ब्रह्मा आयतलोचनामेकां सृष्ट्वा भार्यार्थं तस्मै ददौ ।

वराङ्गीति च तस्याः नाम कृत्वा चतुर्मुखः गतः । वज्राङ्गः तया सह तपश्चरितुं वनं ददौ । सः अन्तर्जले वर्षसहस्रकं कालं तपश्चक्रे । तस्य भार्याऽपि महाव्रता तस्य सरसः तीरे घोरं तपः चकार । अतः महाद्युतिः प्रविवेश । इन्द्रः विभीषिकां चक्रे इत्यत्रोच्यते ।

(वज्राङ्गश्च किमप्यनुक्त्वा सद्यः)
त्रिदिवं प्रतस्थे इत्यत्रोच्यते ।

(१७)

'इन्द्रः किमर्थं बद्धः' इति कश्यपेन ब्रह्मणा च पृष्ठः वज्राङ्गः 'मातुराज्ञया एवं मया कृतम्' इति उवाच । तदा तौ ऊचतुः—'त्वया यतः इन्द्रः बद्धः अतः जितः एव तवैव जयः । अतः इन्द्रः न हन्तव्यः' इति । एवमत्रोच्यते ।

(२१-२७)

अत्र तु सः दैत्यः ब्रह्माणमेवं वदति—

'अहं तपश्चरितुमेव इच्छामि । कृपया अयं वरः दीयताम् । 'निर्विघ्नं तपः कर्तव्यम् । यदि विघ्नाः भवेयुः तान् नाशयतु भवान्' इति । वरं दत्वा ब्रह्मा गतः इत्यत्रोच्यते ।

ततः सः वनं गत्वा तपश्चक्रे ब्रह्मा आविर्भूय एकां सुन्दरीं सृष्ट्वा तस्मै ददौ । सः तां परिणीय स्वपुरं गतः । सुखानि तया अन्वभवत् । किन्तु पुत्रः न जातः । अतः दुःखितः सः स्वजायया सह वनं गत्वा पुनः तपश्चक्रे । भार्या शुश्रूषां चक्रे तपसा प्रीतः ब्रह्मा आविर्भूय तस्मै वरं ददौ ।

अतः तुष्टः सः भार्यया सह स्वपुरमागतः—इत्यत्र उच्यते ।

अत्रायं महाभेदः दृश्यते ।

(६३-७५)

तपसि वर्तन्त्यां वज्राङ्गमहिष्यां देवेन्द्रः अनेकाभिः विभीषिकाभिः तां पीडयितुमियेष । अतः मर्कटमेषभुजङ्गादिरूपैः तस्याः क्लेशमजनयत् । अन्ते सा वराङ्गिनी आश्रमं विहाय शैलगहनं प्रविवेश ।

वज्राङ्गः अन्तर्जले घोरं तपश्चक्रे । अन्ते ब्रह्मा आविर्भूय वरं दातुमैच्छत् । वज्राङ्गः उत्थाय प्राञ्जलिः चतुर्मुखमवदत्—'मे आसुरः भावः मास्तु । मम अक्षयाः लोकाः सन्तु । तपस्येव मे इच्छा अस्तु' इति । सः तथैव वरान् दत्वा गतः । ततः आहारमिच्छन् सः असुरः स्वभार्यामाश्रमे न ददर्श—इत्यत्रोच्यते ।

अध्यायः—१४७

(१-१९)

वज्राङ्गः क्षुधाविष्टः फलानि आदातुं शैलगहनं यदा प्रविवेश तदा तत्र तनुप्रच्छादिताननां, दीनां, रुदन्तीं प्रियां ददर्श । 'केन ते अपकृतम् ? शीघ्रं ब्रूहि' इति अवदत् सः असुरः । तदा तस्य भार्या एवं वदति—

'अहं रौद्रेण देवेन्द्रेण त्रासिता, अपविद्धा, ताडिता, पीडिता च । दुःखपारमपश्यन्ती अहं प्राणत्यागमपि कर्तुं मेने । दुःखशोकसागरात् तारकं सुतं मे देहि' इति । तत्श्रुत्वा क्रुद्धः असुरेन्द्रः

द्रमिलमत्स्यपुराणे वज्राङ्गस्य भार्याऽपि तपश्चक्र इति नोच्यते । वज्राङ्गमहिषीतपःनोक्तम् । इन्द्रेण कृताः विभीषिकाः अपि नोक्ताः ।

अयं भागः त्यक्तः ।

अध्यायः—४९

द्रमिलमत्स्यपुराणे वज्राङ्गवराङ्गिनीसंवाद एव नोक्तः । अत्र सर्वे विषयाः परित्यक्ता ।

पुनः तपः कर्तुमियेष। तस्य सङ्कल्पं ज्ञात्वा, ब्रह्मा आगत्य तन्मुखात् तपश्चरणेच्छाकारणं च ज्ञात्वा 'अलं तपसा तारकः नाम महाबलः सुतः ते भविष्यति' इति उक्त्वा गतः। असुरः ब्रह्मवरमुक्त्वा स्वजायामानन्दयामास—इत्यत्र उक्तम्।

**अध्याय :—१४७**

(१-७)

तारकः राज्यं प्राप्य असुरश्रेष्ठान् एवमुवाच—

"हे महाबलाः असुराः, मम वाक्यं श्रूयताम्। सर्वैः श्रेयसे बुद्धिः क्रियताम्। देवाः अस्मद्वंशक्षयकराः। अक्षयं विरूढं वैरमस्माकं जातिधर्मः। सुराणां निग्रहाय वयमद्य गमिष्यामः।

स्वबाहुबलमाश्रित्यैकं कर्तव्यम्। तपसा विना इदं न कर्तुं शक्यते। घोरं तपः अहमादौ करिष्यामि। ततः देवान् जित्वा लोकत्रयमपि भोक्ष्यामः। स्थिरोपायः पुरुषः एव स्थिरश्रीः जायते। चपला श्रीः चपलेन रक्षितुं न शक्यते" इति। तद्वचनं श्रुत्वा सर्वे 'साधु साधु' इति ऊचुः ततः तारकः तपश्चरितुं प्रतस्थे इत्यत्रोच्यते।

**अध्याय :—१४७**

(७-१०)

तारकः तपसे पारियात्रगिरिकन्दरं ययौ। उत्तमं तत् कन्दरं सर्वर्तुपुष्पाकीर्णं, नानौषधिविदीपितं, नानागुहागृहं, पक्षिकुलाकुलं, नानाविधजलाशयं, विपुलं, रम्यं चासीत्।

**अध्याय :—४६**

(३५)

सर्वे असुराः तारकं नृपं प्राप्य सन्तुष्टाः। असुरैः अभिषिक्तः तारकः एवं अवदत्—

"वयमिन्द्रादिदेवान् जित्वा तेषां लोकमपि प्राप्य संतुष्टाः भवेम। तदर्थमहं तपश्चरितुं गच्छामि" इत्युक्त्वा सः वनं ययौ इत्यत्रोच्यते।

**अध्याय :—५०**

(२)

अत्र तारकः पारियात्रपर्वतं ययौ तपश्चरितुमिति केवलमुक्तम्।

पर्वतवर्णनं नास्त्यत्र।

(११-१५)

तारकः दिनेदिने स्वशरीरात् मांसमुत्कृत्य अग्नौ जुहाव। ततः सः निर्मांसतां गतः। तस्मिन् निर्मांसतां याते तपोराशित्वमागते तस्य तेजसा सर्वभूतानि जज्वलुः। तस्य तपसा सर्वे देवाः भीषिताः, उद्विग्नाश्च। ततः ब्रह्मा तुष्टः वरं दातुमागतः इत्यत्र उच्यते।

(१६-२३)

ब्रह्मा तारकं 'वरं वृणीष्व (यत्ते मनसि) रुचिरं (अस्ति)' इत्युवाच। तदा तारकः ब्रह्माणं प्रणम्य प्राञ्जलिः भूत्वा एवं वदति –

"देव भूतमनोवास, जन्तुविचेष्टितं त्वं वेत्सि। जिगीषुः जनः प्रायः कृतप्रतिकृताकाङ्क्षी। जातिधर्मेण वयं देवैः सह कृतवैराः। क्रूरैः ते दैत्याः निःशेषिताः। तेषां समुद्धर्ता अहं भवेयमिति मे मतिः। अहमवध्यः भवितव्यः। एष एव मम हृदि स्थितः वरः। एतत् मे देहि। नान्यो वरः मे रोचते" इति। ततः ब्रह्मा एवं वदति—'देहिनः मरणं भवेदेव। अतः मृत्युं यस्मान्न शङ्कसे तस्मात् मरणं भवतु इति वरय' इति ब्रह्मा वदति तदा तारकः 'सप्तवासरात् शिशोर्मे मरणं भवतु' इति वदति इत्यत्रोच्यते।

(२-३)

तारकः निराहारः तपः चिरमकरोत्। अन्ते सः स्वतनोः मांसमुत्कृत्य वह्नौ जुहाव। तदा तस्य तपसः तेजसा सर्वाः दिशः दग्धाः। ततः वरदानाय चतुर्मुखः आजगाम इत्यत्र उच्यते।

(४-)

'निर्दोषं वरं वृणीष्व' इति ब्रह्मा तारकं वदति। तदा तारकः "युद्धे देवादिभिः पराजयः न भवितव्यः। मृत्युश्च सप्तवासरात् शिशोर्भवतु" इति ब्रह्माणं वदति इत्येवात्रोच्यते।

| | |
|---|---|
| २९-३१) वरं प्राप्य तारके राज्यस्थे सति ऋतवः मूर्तिमन्तः स्वकालगुणबृंहिताः आसन्। लोकपालाः तस्य भृत्याः अभवन्। कान्तिद्युत्यादयः तं तारकं परिवव्रुः। कालागुरुविलिप्ताङ्गं महामुकुटभूषणं, रुचिराङ्गदनद्धाङ्गं, महासिंहासनस्थितं तमसुरेन्द्रं तारकमप्सरःश्रेष्ठाः अवीजयन्, दीपमार्गेषु चन्द्रसूर्यौ, व्यजनेषु वायुः, यमः अग्रेसरश्च बभूवुः तस्य। एवं गते काले तारकः सचिवान् एवं वदति प्रभूतवरदर्पितः इत्युच्यते अत्र। | द्रमिलमत्स्यपुराणे तु इमे विषयाः नोक्ताः। |
| (३२-३७) "हे सचिवाः, त्रिविष्टपमनाक्रम्य राज्येन किं प्रयोजनम्? देवैः वैरमनिर्याप्य मम मनसि शान्तिः कथं भवेत्? अमराः अद्यापि यज्ञांशान् भुञ्जते। विष्णुः श्रियं नात्यजत्। यः नरः जन्म प्राप्य पौरुषं न घटयेत् तस्य जन्म वृथा भवेत्। यः बन्धून् अशोकान् न करोति, यशश्च न लभते सः जातोऽपि मृतः एव। तस्मात् देवान् जित्वा त्रैलोक्यलक्ष्मीहरणाय शीघ्रं यत्नः कर्तव्यः। अतः देवैः सह युद्धं कर्तुं गच्छेम" इति तारकः स्वामात्यान् वदति इत्यत्रोच्यते। | तारकः वरान् ब्रह्मणः लब्ध्वा देवान् जेतुमसुरैः सह प्रतस्थे इति केवलमत्रोच्यते।<br>स्वसचिवान् विलोक्य तारकः यत् अवदत् तत् सर्वमत्र व्यक्तम्।<br>देवासुरसंग्रामवर्णने भेदः नास्ति। |
| **अध्यायः—१६०**<br>अस्मिन् अध्याये तारकासुरवधः वर्ण्यते। | **उत्तरकाण्डे-अध्यायः—५७**<br>अस्मिन् अध्याये तारकासुरवधः अधिकतया वर्ण्यते। |

तारकः कुमारं विलोक्य एवमुवाच—"बाल, तव युद्धे इच्छा मास्तु। कन्दुकलीलया क्रीड। बालत्वात् तव बुद्धिः एवं स्वल्पार्थदर्शिनी भवति" इति। तदा कुमारः तारकं वदति—'तारक शृणु। शास्त्रार्थः तव निरूप्यते। शिशुत्वं नावमंस्था। बालसूर्यः दुष्प्रेक्ष्यः यथा तथाहं दुर्जयः शिशुः। अल्पाक्षरः किं न मन्त्रः' इत्युक्त्वा तं प्रति शक्ति मुमोच। तेन तारकः हतः इत्यत्रोच्यते। अन्ते देवाः षण्मुखं स्तुवन्ति स्म इति वर्णितमत्र।

सेनाधिपानां संग्रामश्च विशेषतः वर्णितः।

तारकः बहूनि अस्त्राणि उपयुक्तवान्।

अन्ते षण्मुखेन सः तारकः हतः। तारके मृते तुष्टाः सर्वे देवाः प्राञ्जलयः षण्मुखं स्तुवन्ति स्म। ततः संप्राप्तसर्वेच्छाः ते तपोधनैस्सह गताः इत्यत्रोच्यते।

## मत्स्यपुराणे

## हिरण्यकशिपुवृत्तान्तः ।

### संस्कृतमत्स्यपुराणम् ।

**अध्यायाङ्काः** **विषयाः**

१६१

हिरण्यकशिपोः तपश्चर्याकरणवर्णनम् वरप्राप्तिः । देवेभ्यः हरिणा आश्वासप्रदानम् । सभावर्णनम् । नृसिंहप्रादुर्भावः ।

१६२

दैत्यानां नृसिंहहननप्रयत्नः ।

१६३

हिरण्यकशिपुना सह नृसिंहेन कृतं युद्धम् । उत्पातदर्शनम् । असुराधिपवधः ।

### द्रमिलमत्स्यपुराणम् ।

**अध्यायाङ्काः** **विषयाः ।**

१—हिरण्यकशिपुवरप्राप्तिः ।
२—विष्णुपुरुषपराजयः ।
३—सभाप्रवेशः ।
४—विष्णुना देवेभ्यः आश्वासप्रदानम् ।
५—ब्राह्मणप्रभावः, विष्णुप्रभावश्च ।
६—आयुधनाशः ।
७—सर्पदंशनम् ।
८—दिग्गजसंघर्षः ।
९—अभिचारप्रयोगः ।
१०—प्रासादपातनम् ।
११—षोडनवधः (मायाविवधः)
१२—प्रह्लाददेवेन्द्र संवादः ।
१३—विष्णुदर्शनम् ।
१४—नृसिंहोत्पत्तिः ।

१५—सङ्कुलयुद्धम् ।
१६—सेनावधः ।
१७—उत्पातदर्शनम् ।
१८—हिरण्यकशिपुवधः ।
१९—प्रह्लादराज्यप्राप्तिः ।

## द्रमिलमत्स्यपुराणम्

### उत्तरकाण्डे—अध्यायः—१ हिरण्यकशिपुवरप्राप्तिः ।

एकदा ब्रह्मणः मानसपुत्राः सनकादयः चत्वारः महातपस्विनः बालरूपेण वैकुण्ठं प्राप्य नारायणं द्रष्टुमैच्छन् । वस्त्रहीनान् तान् बालान् विलोक्य द्वारपालौ जयविजयौ तेषां प्रभावमजानन्तौ तान् तपस्विनः वारयामासतुः । तेन क्रुद्धाः ते सनकादयः "हे मूढाः, पद्मनाभस्य, चतुराननजनकस्य, सात्त्विकगुणयुक्तस्य, निर्मलस्य महाविष्णोः सेवासक्तयोः युवयोः असुरगुणाः एव सन्ति । तपस्विनः अस्मान् ज्ञातुं युवयोः शक्तिः नास्ति किम् ? सत्त्वगुणभूयिष्ठस्य महाविष्णोः सेवां कर्तुं युवां नार्हौ । अतः वैकुण्ठं विहाय भुवि असुरयोनौ जन्म लब्ध्वा दुःखमनुभूयताम्" इति अशपन् ।

शापं प्राप्तौ तौ जयविजयौ स्वापराधं ज्ञात्वा भीतौ रुदन्तौ, तान् महातपस्विनः नत्वा अज्ञानेन कृतस्वापराधक्षमां प्रार्थयामासतुः ।

तयोः प्रार्थनया प्रीताः ते सार्द्रमनसः, तौ विलोक्य एवमूचुः "अपराध एव युवाभ्यां कृतः। तथापि असुरकुले त्रीणि जन्मानि प्राप्य नारायणेनैव युवयोः वधः भवितव्यः। शापविमोचनानन्तरं वैकुण्ठं पुनः प्राप्येत" इति।

एवमुक्त्वा ते गताः। तेषां शापेन जयविजयौ वैकुण्ठं विहाय भुवि असुरकुले जातौ। हिरण्यकशिपुः हिरण्याक्षः इति प्रसिद्धौ असुरौ एव तौ।

तौ द्वौ अपि सोदरौ अजायेताम्।

तौ द्वावपि असुरौ महाबलिष्ठौ आस्ताम्। स्वभुजबलेन भुवि विद्यमानान् सर्वान् विजित्य स्वाधीनान् चक्रतुः। तयोः पराक्रमेण सर्वे नराः देवाश्च भीताः बभूवुः लोकत्रयमपि असुराधीनं बभूव।

एकदा हिरण्याक्षः भुवमपहृत्य पातालं गतः। तस्मात् असुरात् भुवमानेतुं नारायणः वराहरूपेण पातालं ययौ। तत्र तेन असुरेण युद्धं कृत्वा तं हत्वा सः भूमिमानीतवान्।

सोदरस्य मरणं श्रुत्वा हिरण्यकशिपुः अतीव क्रुद्धः बभूव। देवानां प्रार्थनयैव नारायणः हिरण्याक्षं जघानेति मत्वा तान् देवान् रिपून् निश्चित्य तान् पीडयितुमियेष।

अतः सः सद्यः असुरश्रेष्ठान् आनाय्य एवमवदत्—

“प्रियसुहृदः, अद्यप्रभृति देवाः अस्माकं रिपवः जाताः। गरुडध्वजस्य विष्णोः अस्माकं च संवन्धः कोऽपि नास्ति। युष्मत्प्रीतिपात्रः मम सोदरः हिरण्याक्षः विष्णुना हतः खलु वञ्चनया। अस्मत्पराक्रममसहमानानां देवानां चोदनेनैव मत्सोदरवधः जातः। इतः परमहमेव सर्वेषामधिपः। मां विना अन्यः न कोऽपि वन्दनार्हः। वञ्चकं हरिं शूलेन हत्वा मम सोदरस्य श्राद्धं करिष्यामि। हरिवृक्षच्छेदनेन देवशाखाः स्वयमेव शुष्काः भवेयुः।

अहमद्यैव तपश्चरितुं गमिष्यामि। त्रिदिवौकसां जयाय वहुवरलाभाय च घोरं तपः करिष्यामि। भूमण्डले क्रियमाणानां यागादीनां कर्मणां विघ्नं कृत्वा, देवान् बलहीनांश्च कृत्वा तान् विद्रावयित्वा च यूयमागच्छत। तेषां नगराणि दग्ध्वा सर्वान् निधींश्च आहरत। लोके क्रियमाणैः सुकर्मभिरेव देवाः बलिष्ठाः भवन्ति। अतः सुकर्मणां विघ्नाः क्रियन्ताम्” इति।

एवामुक्त्वा सः हिरण्यकशिपुः स्वसोदरस्य पुत्रान् आश्लिष्य तान् सान्त्वयित्वा घोरं तपः कर्तुं प्रतस्थे। एवमत्र सविस्तरं उक्तम्। अयं विषयः अत्र अधिकः।

| | |
|---|---|
| **अध्याय :—१६१** | |
| पुरा कृतयुगे हिरण्यकशिपुः दशवर्ष-सहस्राणि, दशवर्ष-शतानि च जलवासी स्नानमौनधृतव्रतः अभवत् । | अत्र तु हिरण्यकशिपोः तपश्चर्याकरणं सविस्तरं वर्णितम् । |
| ब्रह्मचर्येण, शमदमाभ्यां च सः ब्रह्माणं प्रीणयामास—इत्येव अत्र उच्यते । | सः हिरण्यकशिपुः अङ्गुष्ठाग्रेण तिष्ठन् ऊर्ध्वबाहुः चतुराननस्य तोषणार्थं निराहारः घोरं तपः अतप्यत । एवं दशवर्ष-सहस्राणि गतानि । ततः सः मौनव्रतः जले तिष्ठन् तीव्रं तपस्तेपे । एवं सः तपसा कायक्लेशमकरोत् । |
| तपश्चर्याकरणक्रमः अत्र न वर्णितः । | घोरं तपः कृतवतः तस्य शरीरात् योगाग्निः निर्गतः । तेनाग्निना लोकाः दग्धाः । |
| इन्द्रासुरयुद्धमत्र नोक्तम् । | अत्रान्तरे इन्द्रः देवैस्सह गत्वा इतरान् असुरान् युद्धे विजित्य तान् विद्रावयति स्म । भीताः, विजिताः असुराः सर्वे पातालं गताः । देवाः असुरबाधां विना सुखेन आसन् । |
| योगाग्निपीडा च अत्र न वर्ण्यते । | एतस्मिन्नेव समये हिरण्यकशिपोः शरीरात् निर्गतेन योगाग्निना उग्रेण सर्वे पीडिताः बभूवुः । तडागादयः शुष्काः जाताः सस्यादयः विनष्टाः । तं योगाग्निं सोढुं देवा अपि अशक्ताः बभूवुः । |
| देवेन्द्रः देवैः सह ब्रह्माणं द्रष्टुं गतः—इति अत्र नोच्यते । | ततः इन्द्रः देवैस्सह धातारमुपगम्य एवमुवाच—"प्रभो, कमलासन, अस्मान् रक्षतु भवान् । हिरण्यकशिपोः घोरतपसा भूलोकः पीडितः । तमग्निं सोढुं वयमपि अशक्ता एव । |

देवेन्द्रप्रार्थना च नोक्तात्र ।

**श्लोकः—( ४-१० )**

हिरण्यकशिपोः तपसा ब्रह्मा प्रीतः बभूव । ततः सर्वैः देवैः वृतः विधाता हिरण्यकशिपुं प्राप्य एवं वचनमब्रवीत्—"सुव्रत, भक्तस्य तव तपसा अहं प्रीतोऽस्मि । वरं वरय । यथेष्टं काममाप्नुहि" इत्यत्रोच्यते ।

**श्लोकः—(११-१४)**

हिरण्यकशिपुः धातारमेवं वदति । "देवासुरगन्धर्वाः, यक्षोरगराक्षसाः मानुषाः पिशाचा वा मां न हन्युः । ऋषयोऽपि शापैः मां न शपेयुः । अस्त्रशस्त्रादिभिरपि वधः न भवितव्यः ।

सर्वनाशः भविष्यतीति संशयः जायते । भवतैव सर्वलोकरक्षणं कर्तव्यम् । अधुनैव भवता परिहारः कर्तव्यः" इति । अत्र एवं देवेन्द्रप्रार्थना उच्यते ।

ब्रह्मा सर्वैः देवैः सह हिरण्यकशिपुमुपगम्य "वत्स अनेन घोरेण तव तपसा अलम् । तव तपसा प्रीतोऽहं वरान् दातुमेव आगतः । मां पश्य" इति तमुक्त्वा स्वकमण्डलुजलेन तस्य शिरसि प्रोक्षणमकरोत् । तस्मिन्नेवक्षणे उग्रः योगाग्निः शान्तः बभूव ।

योगशक्त्या महत्तेजः प्राप्तवान् सः असुरः उत्थितवान् । तस्य नेत्राभ्यां आनन्दबाष्पस्रावः अभवत् । उत्थितः सः तं धातारमुपगम्य ववन्दे ।

"प्रभो भवतां दर्शनेन अहं भाग्यवान् जातः" इति सः असुरः उवाच । तदा ब्रह्मा तं विलोक्य 'वत्स, तव भक्त्या अहमतीव प्रीतः । वरं वृणीष्व यथेष्टम् । ददाम्यहम्' इति अवदत्—इत्यत्र वर्ण्यते ।

अत्र तु सः असुरः ब्रह्माणमेवं वदति—

"सर्वैः देवैः मुनिभिश्च मरणं मे न भवितव्यम् । भवता सृष्टेन केनापि वस्तुनापि मरणं मे न भवितव्यम् । परमेश्वरेण,

अहमेव अर्कः, सोमः, वायुः अग्निश्च भवेयम्" इति । एतादृशान् वरान् सः अवृणोत् इत्यत्रोच्यते ।

दिने वा रात्रौ वा वधः न भवितव्यः इत्यत्रोच्यते ।

नारायणेन च मृत्युः न भवितव्यः"—इति ।

संस्कृतपुराणे शिवेन विष्णुनाचापि वधः न भवितव्यः इति वरः वृतः इति नाच्यते । अत्र तु अयं वरः अधिकतया उक्तः ।

अत्र तु दिने वा, रात्रौ वा, भूमौ वा, आकाशे वा, गृहस्यान्तर्वा, बहिर्वा मरणं न भवितव्यमित्युक्तम् ।

**श्लोकः—( २१-२६ )**

वरदानेन दर्पितः हिरण्यकशिपुः सर्वाः प्रजाः पीडयामास । महासुरः सः सर्वान् देवान् विजित्य त्रैलोक्यं वशमानीय स्वर्गे अवसत् । ततः सः दैत्यान् यज्ञियान् चकार । देवताः अयज्ञियाः चकार । ततः सर्वे देवाः शरण्यं विष्णुं शरणं ययुः— इत्यत्रोच्यते ।

**विष्णुपुरुषपराजयः ।**

अध्याय—२

वरान् प्राप्य स्वनगरं निवृत्तः असुरेन्द्रः, देवैः असुराः विद्राविताः इति ज्ञात्वा—कोपेन संरक्तलोचनः अगर्जत् । देवान् नाशयितुमियेष ।

हिरण्यकशिपुं निवृत्तं ज्ञात्वा पातालगताः सर्वे असुराः तस्य समीपमागताः । असुरेन्द्रः तान् विलोक्य अतीव सन्तुष्टः बभूव । देवान् सर्वान् विजेतुं मतिं ववन्ध सः । सन्नद्धसहायश्च सः प्रतस्थे समरप्रियः । हव्यवाहनं निवार्य देवान् अयज्ञियान् कृत्वा अमरावतीं गत्वा युद्धार्थं दूतं इन्द्रसमीपे प्रेषयामास ।

असुरेन्द्रस्य आगमनेन कम्पितः इन्द्रः बृहस्पतिं प्राप्य मन्त्रयामास । 'ब्रह्मणः बहून् वरान् प्राप्तवान् हिरण्यकशिपुः जेतुं न शक्यः । अतः सन्धिरेव कर्तव्या संप्रति' इति गुरुरुवाच ।

ततः इन्द्रः, 'असुरेन्द्रेण सन्धिं कर्तुमेव इच्छाम्यह'मिति कथयित्वा दूतं निवृत्तं चकार । ततः सः असुरेन्द्रं दृष्ट्वा 'अहं समरप्रियः नास्मि । मैत्रीमेवेच्छामि' इत्यब्रवीत् ।

तं भीतं विलोक्य असुरेन्द्रः विहस्य देवासुरावृतः ऐरावतारूढः देवसभां प्रविश्य अभिषिक्तः सिंहासनमारुक्षत् । आधिपत्यं प्राप्तः सः 'सिंहासनारूढः त्वमेव भवमदधीन' इत्युक्त्वा इन्द्राय अमरावतीं दत्वा असुरैस्सह सः असुरेन्द्रः प्रतस्थे ।

ततः सः यमं विजेतुं यमपुरीं प्राप । यमस्य असुरेन्द्रस्य च घोरं युद्धं बभूव । यमेन बहुविधानि अस्त्राणि प्रयुक्तानि । किन्तु असुरेन्द्रस्य समीपे गन्तुं तानि सर्वाणि अस्त्राणि अशक्तानि जातानि । असुरेन्द्रः अगर्जत् । यमं बलहीनं च चकार । अन्ते यमेन कालपाशः प्रयुक्तः । अशक्तः सः कालपाशोऽपि निवृत्तः । यमः इतिकर्तव्यतामूढः जातः । तदा "वरबलयुक्तः हिरण्यकशिपुः जेतुमशक्यः" इति अशरीरिणीं वाचं श्रुत्वा यमः समराङ्गणं विहाय अधावत् । ततः असुरेन्द्रः निस्सपत्नः यमपुरीं गत्वा नरकावस्थामनुभूतवतः अमोचयत् ।

ततः सः स्वसेनापतिमेकं तत्पुराधिपं कृत्वा गतः ।

ततः वरुणं विजित्य कुबेरं जेतुमलकां ययौ । कुबेरः यक्षवीरैरावृतः असुरैस्सह युद्धं चकार । यक्षवीरैः सह युद्धं कर्तुमसुराः अशक्ताः बभूवुः । असुराणामशक्तिं ज्ञात्वा क्रुद्धः हिरण्यकशिपुः

स्ववीरान् पुनः पुनः अचोदयत् । ततः ब्रह्माणं ध्यात्वा ब्रह्मास्त्र-प्रयोगं चकार । कुबेरः ब्रह्मास्त्रं विलोक्य नमस्कृत्य स्ववीरैस्सह समराङ्गणात् अधावत् । अलका च असुराधीना बभूव ।

नवनिधयोऽपि तैः अपहृताः । जयलक्ष्म्या सहितः असुरेन्द्रः स्वपुरं मुदा प्रविवेश ।

इन्द्रादीनां पराजयं दुःखानि च श्रुत्वा नारायणः क्रुद्धः हिरण्यकशिपोः उरः विदार्य तं हन्तुं निश्चितवान् । तस्य कोपः पुरुषरूपं धृत्वा तस्थौ । चतुर्भुजेषु आयुधानि धृत्वा स्थितः सः कृष्णवर्णः विष्णुपुरुषः नारायणं नत्वा 'भवदाज्ञा का' इति पप्रच्छ ।

तदा नारायणः "वीर अगण्यान् वीरान् मनसा उत्पाद्य अधुनैव असुरपुरीं गत्वा तां नाशयित्वा हिरण्यकशिपुं च हत्वा प्रत्यागच्छ' इति उवाच ।

तं विष्णुं नमस्कृत्य विष्णुपुरुषः प्रतस्थे । उदायुधाः बहवः वीराः तेनोत्पादिताः तमनुययुः ।

असुरपुरीं प्राप्तः विष्णुपुरुषः नगररक्षकान् बहून् वीरान् जघान । अवशिष्टाः केचन वीराः असुरसभां गत्वा असुरेन्द्राय सर्वं निवेदयामासुः ।

तत् श्रुत्वा हिरण्यकशिपुः अतीवक्रुद्धः संरक्तविलोचनः अहसत् ।

'भीतः विष्णुः स्वसदृशं कंचन उत्पाद्य प्रेषितवान्' इति उक्त्वा स्वसेनापतीन् ददर्श । तस्य दर्शनेन तदभिलाषां ज्ञातवन्तः ते विष्णुपुरुषेण सह युद्धमकुर्वन् । असुरवीरैः बहूनि भयानकानि अस्त्राणि प्रयुक्तानि । तथापि विष्णुपुरुषदर्शनेन ते इति कर्तव्यतामूढाः जाताः । तेषां मनसि भीतिः जाता । अतः ते श्रान्ताः बभूवुः ।

विष्णुपुरुषस्तु असुरबले प्रविश्य सुलभेन सर्वाणि असुरसैन्यानि अनाशयत् । असुरप्रयुक्तैः अस्त्रैः विष्णुपुरुषस्य बाधा न जाता ।

वरुणेन, यमेन, कुबेरेण च सह कृते युद्धे ते असुराः सन्तुष्टाः आसन् किन्तु अस्मिन् विष्णुपुरुषयुद्धे ते सर्वे भीताः शिथिलाश्च बभूवुः ।

ततः धमाक्षः, त्रिमूर्तः, विप्रचित्तिः, शम्बरः इति चत्वारः सेनापतयः सर्वैः असुरबलैः आवृताः तेन विष्णुपुरुषेण सह घोरं युद्धं चक्रुः । धूमाक्षेण ब्रह्मास्त्रं, त्रिमूर्तेन पाशुपतास्त्रं, विप्रचित्तिना कौमारास्त्रं शम्बरेण आग्नेयास्त्रं च प्रयुक्तानि ।

किन्तु तानि अस्त्राणि विष्णुपुरुषस्य समीपे शक्तिहीनानि पतितानि । तत् विलोक्य ते चत्वारः असुराः भ्रान्ताः बभूवुः । भ्रान्तान् तान् चतुरः सेनापतीन् गृहीत्वा विष्णुपुरुषः भूमौ अक्षिपत् । ते चत्वारः क्रन्दन्तः भूमौ अपतन् ।

विष्णुपुरुषस्य कर्मणा क्रुद्धः हिरण्यकशिपुः रथादवतीर्य विष्णुपुरुषस्य समीपे गत्वा तस्य उरसि मुष्ट्या कुट्टयामास। तेन शब्देन समरभूमिः अकम्पत। विष्णुपुरुषः तत्रैव विगतसंज्ञः पपात। ततः लब्धसंज्ञः सः असुरेन्द्रस्य पुरतः स्थातुमशक्तः नारायणस्य समीपे अधावत्।

### सभाप्रवेशः

**अध्यायः—३**

विष्णुपुरुषः नारायणं शरणं प्राप्य 'असुरेन्द्रस्य शक्तिः अनुपमा। तस्य प्रहारेणाहं मूर्छितः अभवम्' इत्युवाच। पराजितस्य विष्णुपुरुषस्य गमनानन्तरं।

हिरण्यकशिपुः देवेभ्यः अक्रुध्यत्। 'यदि देवाः स्वतन्त्राः भवेयुः तर्हि विघ्नान् कुर्युरेव। अतः ते मदधीना एव कर्तव्याः सर्वदा' इति सः चिन्तयित्वा स्वसेनापतीन् एवमवदत्—'सद्यः यूयमिन्द्रादीन् देवान् आनयत' इति।

इन्द्रः इमं विषयं ज्ञात्वा असुरसेनापतीनामागमनात्पूर्वमेव पलायितः। अतः वरुणादयः देवाः असुरैः आनीताः। ते सर्वे देवाः असुरेन्द्रस्य पुरतः बद्धाञ्जलयः तस्थुः।

सर्वेऽपि देवाः असुरेन्द्रस्य आज्ञानुसारिणः बभूवुः। त्रिषु लोकेष्वपि विद्यमानाः सर्वेऽपि हिरण्यकशिपोः अधीनाः अभवन्। ततः सः दैत्येन्द्रः त्रिलोकाधिपतिः बभूव। प्रत्यहं तस्य

सभायां किन्नरादयः अगायन् । अप्सरोभिः नृत्यं कृतम् । एवं नृत्यगीतैः उपास्यमानः सः लोकत्रयमपि शशास ।

अध्यायः—४

## देवेभ्यः विष्णुना आश्वासदानम्

विप्रादयः सर्वेऽपि हिरण्यकशिपुना आदिष्टाः तमेवापूजयन् नान्यं कमपि देवम् । यागादयः देवानुद्दिश्य न कृताः । दैत्येन्द्रमुद्दिश्यैव यागः कर्तव्यः इति असुरेन्द्रेण आज्ञा कृता । हविः देवेभ्यः न दत्तम् । किन्तु असुरा एव हविर्भागं लब्धवन्तः । हविषैव पूर्वं बलं प्राप्तवन्तः देवाः विगतबलाः दैत्येन्द्राधीनाः जाताः । एवं हिरण्यकशिपुः गर्विष्ठो भूत्वा सर्वान् देवान्, विप्रान् विशेषतः विष्णुभक्तांश्च पीडयामास ।

एवं बहवः संवत्सराः गताः ।

वरदर्पितेन असुरेन्द्रेण पीडिताः देवाः बृहस्पतिसकाशे गत्वा स्वदुःखानि उक्त्वा वाष्पपूर्णलोचनाः बभूवुः । ततः ते 'गुरो असुरराजस्य विनाशः भवेद्वा न वा ? कदा नाशः भविष्यति ? उच्यतां भवता' इति तमवदन् ।

ततः सः गुरुः "हे देवाः, असुरराजः स्वतपसः फलमनुभवति संप्रति । तत् केनापि वारयितुं न शक्यते । स्वतपसः फलानि अनुभवन् सः दैत्याधिपः बहूनि दुष्कृतानि कृतवान् ।

सुकर्मणां विघ्नानुत्पाद्य मुनीन्, विप्रांश्च पीडयित्वा धर्मदेवतायाः वञ्चनां कृतवान् । अतः सः इतः परं पापफलमेव अनुभविष्यति । भगवन्तं नारायणमेव भक्त्या ध्यात्वा यूयं प्रार्थयत । असुराधिप-नाशो नारायणेनैव भवितव्यः" इति सान्त्ववचनानि उक्त्वा गतः।

गुरोर्वचनानि श्रुत्वा देवाः रहसि एकत्र समेताः नारायण-मुद्दिश्य भक्त्या ध्यानं चक्रुः । तैः स्तुतः नारायणः गरुडारूढः तेषां पुरतः आविर्बभूव । तान् दृष्ट्वा सः विष्णुः एवमुवाच— "युष्माकं दुःखमहं जानामि । दैत्यराजस्य दुष्कृत्यैः तपसः शक्तिः नष्टाऽभवत् । अचिरादेव तं हन्याम्" इति ।

### अध्यायः—५—ब्राह्मणमहिमा

देवाः नारायणस्य सान्त्ववचनं श्रुत्वा अतीव संतुष्टाः तं भगवन्तं नत्वा बहुभिः स्तोत्रैः तं प्रशशंसुः । असुरराजस्य विनाशः शीघ्रमेव भविष्यतीति मत्वा ते विगतभयाः बभूवुः । ततस्ते निवृत्ताः ।

भगवान् स्वप्रतिज्ञां पूरयितुमियेष । अतः सः असुरराजस्य पुत्रेषु एकतमस्य प्रह्लादस्य मनसि श्रेष्ठां भक्तिमुत्पादयामास ।

प्रह्लादः जननात् प्रभृति सुगुणयुक्तः आसीत् । सः नक्तं दिवं विष्णुमभजत् । विप्रेषु स्निग्धः बभूव । लौकिकेषु विषयेषु तस्य आसक्तिः नासीत् । मोक्षं लब्धुमेव सः इयेष ।

उचिते काले तस्य राजकुमारस्य यद्यदवश्यमध्येतव्यं तत्सर्वं शिक्षयितुं द्वौ अध्यापकौ नृपेण आज्ञप्तौ। प्रथमतः 'हिरण्यकशिपवे नमः' इति वक्तव्यमिति तौ अध्यापकौ तं प्रह्लादमूचतुः। स तु तद्वचनमनादृत्य 'नारायणाय नमः' इत्येव अवदत्। असकृत् ताभ्यां निर्बद्धोऽपि सः स्वपितुर्नाम नैवावदत्। अन्ये बालास्तु 'हिरण्यकशिपवे नमः' इति ऊचुः प्रह्लादस्तु अस्मिन् विषये अध्यापकवचनं न शुश्राव।

किं च सः अन्यान् विद्यार्थिनोऽपि हरिभक्तान् अकरोत्। सर्वेऽपि बालाः प्रह्लादवचनेन हरिनामकीर्तनमकुर्वन्। अतः तौ अध्यापकौ अतीव भीतौ बभूवतुः।

रहसि हरिभक्तिप्रचारः क्रियते इति मत्वा यदि असुरेन्द्रः दण्डयेत् किं कर्तुं शक्येत इति तौ अध्यापकौ भीत्या चकम्पाते। तौ प्रह्लादं रहसि आहूय बहुभिः प्रकारैः उपदेशं चक्रतुः। 'पितृशत्रुं नारायणं किमर्थं त्वं पूजयसि ? त्वत्पितुः श्रेष्ठः अधिपः न कोऽप्यस्ति ? सर्वेऽपि तव जनकमेव वन्दन्ते। एवं सति त्वया एवं किमर्थं विपरीतं कर्म क्रियते ? अस्मद्वचनं अङ्गीक्रियताम्'। इति च तौ प्रह्लादमवदताम्।

तद्वचनं श्रुत्वा प्रह्लादः अहसत्। ततः एवमवदत्—

"पूज्यौ आचार्यौ भवन्तौ इत्यहं जानामि। इदं न मया विस्मृतम्। तथापि अधर्ममार्गप्रवृत्तौ क्रियमाणः निर्बन्धः वेदना-

मुत्पादयति। सर्वशास्त्रविशारदाभ्यां भवद्भ्यां ईश्वरः कः इति न ज्ञायते किम्? शास्त्राणि मम पितरमेव ईश्वरं वदन्ति किम्? शास्त्रप्रतिपाद्यमानः ईश्वरः नारायण एवेति भवद्भ्यां न ज्ञायते किम्? भवद्वचनं विचित्रं भवति। हरिं विना इदं शरीरं नास्ति। जीवो नास्ति। हरिं विना तपो वा धर्मो वा नास्ति। हरेः कृपयैव मम पिता असुरेन्द्रः दृश्यते। हरिं विना किमपि नास्ति" इति। तत् श्रुत्वा तौ आचार्यौ भीत्या इति कर्तव्यतामूढौ जातौ।

ततः असुरराजः स्वपुत्रस्य प्रह्लादस्य धीशक्तिं ज्ञातुमियेष। 'अधीतान् पाठान् कथय वत्स' इति स्वपुत्रमुवाच।

सः प्रह्लादः स्वपितरं नमस्कृत्य नारायणस्य बहूनि नामानि उक्त्वा सः विष्णुरेव सर्वेषामीश्वरः इति चाब्रवीत्। तत् श्रुत्वा क्रोधं प्राप्तः सः असुरराजः 'किमर्थमेवं जल्पसि' इत्यपृच्छत्।

"तात नाहं जल्पामि। वेदैः यत् तत्त्वं प्रतिपाद्यते तदेव मयोक्तम्। तेन हरिणा विना तृणमपि न चलेत्। अस्मान् सर्वान् स एव खलु रक्षति" इति प्रह्लादः उवाच।

प्रह्लादवचनं श्रुत्वा सभायां स्थिताः सर्वेऽपि अकम्पन्त। प्रह्लादस्य माता तु अतीवभीता अश्रुपूर्णनेत्रा बभूव।

ततः ईषत् शान्तः असुरः, बालकस्य बुद्धिभेदः आचार्याभ्यामेव उत्पादितः इति मत्वा तौ दण्डयितुमैच्छत्।

तदा सः पुत्रः, अयमुपदेशः अन्तर्विद्यमानेन नारायणेनैव कृतः। अतः आचार्यौ न दण्डनार्हौ' इत्युवाच।

सेवकैः आनीतौ आचार्यौ असुरस्य पुरतः भीत्या अवनत-शीर्षौ अतिष्ठताम्।

असुरेण तर्जितौ तौ अध्यापकौ तस्य पादयोः पतित्वा आत्मानौ निरपराधिनौ इति कथयित्वा आत्मरक्षणं प्रार्थयामासतुः। तयोर्वचने असुरस्य विश्वासः न बभूव।

ततः प्रह्लादः, पुनरपि अध्यापकौ निर्दोषौ इति कथयित्वा नारायणस्य प्रभावं विप्रप्रभावं च प्रशशंस।

किं च सः "तात, सर्वत्रव्याप्तः सः हरिरेव अस्मान् रक्षति। अतः महाशक्तिमतः तस्येश्वरस्य वन्दने विस्मृतिः न भवितव्या। यदि तं न वन्देमहि तर्हि वयं कृतघ्नाः एव भवेम। भवतः त्रिलोकाधिपत्यं कथमभूत्। कीर्तिः कथं जाता। सर्वस्यापि कारणं तस्यानुग्रहः एव खलु ? यदि सः भवता विस्मृतः भवेत् तर्हि भोगाः नाशं लभेरन्। अतः हरिस्मरणेन अयं स्वर्गभोगः शाश्वतः क्रियतां भवता" इति उवाच। तत् श्रुत्वा क्रुद्धः सः 'मम वैरिणं किमर्थं प्रशंससि' ? इति परुषैः वचनैः तमतर्जयत्।

**अध्यायः—६–आयुधनाशः**

हिरण्यकशिपुना प्रथमं मृदुभिः पश्चात् परुषैश्च वचनैः बोधितोऽपि प्रह्लादः तद्वचनमनादृत्य 'लोकेश्वरं नारायणमेव

पूजयेयं, नान्यम्' इत्युवाच । तत् श्रुत्वा अतीव क्रुद्धः सः असुरः तं पुत्रं शत्रुमेव मत्वा, अङ्के आरोपितं तं भूमौ प्राक्षिपत् । तत् दृष्ट्वा सर्वे भ्रान्ता बभूवुः ।

ततः सः असुरः प्रह्लादं हन्तुं सेवकान् आज्ञापयामास । ते उदायुधाः तं प्रह्लादं हन्तुं समीपे गताः । असिभिः तं हन्तुं अयतन्त । तदा प्रह्लादः हरिं ध्यायन् तस्थौ । सद्यः ते सेवकाः गतासवः भूतले अपतन् ।

अध्यायः—७

**सर्पदंशनम् ।**

ततः असुरेन्द्रः नागराजं चोदयामास । नागराजस्य आज्ञया क्रूराः बहवः सर्पाः प्रह्लादस्य शरीरे सर्वत्र ददंशुः । प्रह्लादस्तु हरिमेव शरणं गतः ध्यानमग्नः आसीत् ।

यदा सर्पाः प्रह्लादस्य शरीरे ददंशुः तदा तेषां दन्ताः भग्नाः बभूवुः । रुधिरप्रस्रावः अभवत् । वेदनामसहमानाः सर्पाः पलायिताः । ततः सेवकाः तेन प्रह्लादेन सह असुरस्य समीपे गताः । पुत्रं विलोक्य विस्मितः असुरः 'कथं सजीवोऽसि' इत्यपृच्छत् । 'हरिकृपयैव सजीवोऽहमिति भवता ज्ञातुं न शक्यते किम् ? इत्युवाच । पुनः असुरः क्रुद्धः बभूव । तदा पुत्रः 'हरि-भक्तिः कर्तव्या' इत्यवदत् ।

**अध्यायः— ८–दिग्गजसंघर्षः**

ततः हिरण्यकशिपुः पुत्रेण उपदेशः कृतः इति मत्वा तं निन्दित्वा सेवकान् प्रति एवमुवाच—'सेवकाः, दिग्गजानां संघर्षेण प्रह्लादः सद्यः हन्यताम्' इति । तदा प्रह्लादः स्वपितरं एवमवदत्—'तात तव विश्वासोत्पादनाय अहं परीक्षान्तर्गतो भवामि । हरिभक्तं मां सः हरिः कदापि न परित्यजेत्' इति ।

ततः ते सेवकाः तं प्रह्लादं नगरात् बहिः नीत्वा सङ्घर्षार्थं दिग्गजान् अचोदयन् । ते गजाः तं हन्तुं समीपे गताः । प्रह्लाद-स्तु नेत्रे निमील्य हरिं ध्यायतिस्म । तदा ते गजा भग्नदन्ताः वेदनां प्राप्य निवृत्ताः ।

हिरण्यकशिपुः । संघर्षणसमये गजाः भग्नदन्ताः भूत्वा पलायिताः इति विषयं ज्ञात्वा लज्जितः, क्रुद्धश्च बभूव । ततः स्वपुत्रं अग्नौ प्रक्षिप्यतामिति आज्ञां चकार ।

ततः सेवकाः अग्निज्वालायां प्रह्लादं प्राक्षिपन् । तदापि सः हरिमेव ध्यायन् आसीत् । अतः अग्निना तं दग्धुं न शक्तम् । सः अग्नेः दीप्तप्रभः आगतः । अग्निः तस्य उष्णः नासीत् शीतः अभवत् इति ज्ञात्वापि असुरेन्द्रः हरेः प्रभावः ज्ञातुं न शक्तः बभूव ।

**अध्यायः—९—अभिचारप्रयोगः**

ततः सः असुरराजः अभिचारेण स्वपुत्रं हन्तुं शास्त्रज्ञान् आज्ञापयामास। विप्रश्रेष्ठाः अथर्ववेदमन्त्रैः अभिचारहोमं चक्रुः। होमाग्नेः भयानकः भूतः प्रादुर्भूतः। प्रह्लादं हन्तुं तं भूतं विप्राः चोदयामासुः। सः भूतः तस्य समीपे गतः। परमभक्तं तं हन्तुमयतत। तदा तस्य भूतस्य आयुधानि कुण्ठीभावं प्रापुः। अतः भीतः भूतः तं हन्तुमशक्तः विप्रान् हन्तुं निवृत्तः। ते विप्राः भीताः प्रह्लादमेव शरणं ययुः। सः हरिनामोच्चारणं चकार। तेऽपि हरिनामकीर्तनं चक्रुः। ततः भूतः अग्नौ प्रविश्य तिरोबभूव। विप्राः असुरसमीपे गत्वा यथावृत्तमूचुः।

**अध्यायः—१०—प्रासादपातनम्।**

ततः असुरराजः स्वयमेव तं प्रह्लादं हन्तुमियेष। क्रूरसर्पविषमिश्रितं क्षीरं प्रह्लादाय ददौ। सः पुत्रः नारायणं ध्यात्वा तत् अपिबत्। क्षीरपानानन्तरं सः अतितेजसा बभौ। किन्तु यैः क्षीरमानीतं ते सेवकाः सद्यः मृताः।

तदा प्रह्लादः स्वपितरं विलोक्य "तात, हरिभक्तेः महिमा अद्यापि भवता ज्ञातुं न शक्यते किम्? हरिभक्तिसमं तपः नास्ति। अतः हरिमेव ध्यायतु भवान्। पापानि नश्येयुः। देवाः न पीड्यन्ताम् इति अवदत्। हिरण्यकशिपुः, पुत्रः परिहसतीति मेने।

अतः तं पुत्रं येन केनापि प्रकारेण हन्तुमियेष। सद्यः द्वौ वीरौ आहूय, बद्धकरचरणः प्रह्लादः पर्वताग्रात् युवाभ्यां निपात्यताम्" इति आदिशत्।

ततः वीराः केचन तं बद्ध्वा प्रासादाग्रमारोप्य, (पर्वतं नीत्वा शिखरात्) तदग्रभागात् प्राक्षिपन्। तदा सः हरिं ध्यायन्नेवासीत्। अतः पतनसमये गण्डशैलादिभिः वेदना तस्य न जाता। रुधिरधारा न जाता। पतनानन्तरं सः स्वदेहं ददर्श। ईषदपि व्रणं न जातम्। पुनरपि सः हरिं ध्यायतिस्म।

इमं विषयं श्रुत्वा असुरः भ्रान्तो बभूव। विस्मयं च प्राप।

**अध्यायः—११—षोडनवधः**

ततः असुराधिपः सेनापतिं शम्बरं आहूय 'मायया वीरान् बहूनुत्पाद्य तं कुमारं नाशय' इति आदिशत्। सः शम्बरः प्रह्लादसमीपं गतः। तदा सः ध्यायन्नासीत्। शम्बरः मायाशक्त्या बहून् वीरानुत्पाद्य सर्वैस्तैरावृतः युद्धं चकार तान् उदायुधान् भयानकान् वीरान् विलोक्य प्रह्लादः नारायणमेव शरणं प्राप्य प्रार्थयामास। तदा हरेः चक्रायुधं वेगेन तत्रागतम्। चक्रात् घोरा अग्निज्वाला निर्गता। तया ज्वालया दग्धाः सर्वे वीराः भीताः पलायिताः। शम्बरः भक्तं शरणं गतः। अतः चक्रेण मुक्तः सः असुराधिपं प्राप्य सर्वमुवाच।

ततः षोडनाख्यः अन्यः असुरः गतः । सः मायया वायुर्भूत्वा नासिकाद्वारा तस्य प्रह्लादस्य हृदयं प्राविशत् । ततः सः तस्य प्राणान् अपहर्तुमयतत ।

प्रह्लादः तत् ज्ञात्वा भगवन्तमध्यायत् । भगवदनुग्रहेण प्रह्लादः रक्षितः । असुरस्तु तस्य भक्तस्य रक्तेन मिश्रितः लवणमिव द्रवीबभूव । तत् ज्ञात्वा तस्य असुरस्य भार्या असुराधिपं प्राप्य अरुदत् । हिरण्यकशिपुः भ्रान्तः बभूव ।

प्रह्लादं हन्तुं नूतनः उपायः कः अस्ति ? इति स्वामात्यान् अपृच्छत् । ते एवमूचुः 'विरोधमार्गं विहाय स्नेहमार्गेणैव पुत्रस्य मनसि विपर्ययः कर्तव्यः' इति । असुराधिपस्तु सर्वदा पुत्रवधोपायमेव चिन्तयन्नासीत् ।

**अध्यायः—१२—प्रह्लाददेवेन्द्रसंवादः**

पुनरपि असुराधिपः स्वपुत्रं विद्यालयं प्रेषयामास । सः शास्त्राणि अधीतवान् । प्रत्यहं हरिनामसंकीर्तनमकरोत् । आचार्यौ प्रह्लादस्य शास्त्रप्रावीण्यं हिरण्यकशिपवे निवेदयामासतुः। सन्तुष्टः असुराधिपः पुत्रमानाय्य प्रेम्णा बभाषे 'पुत्र त्वया किमधीतम्' इति अपृच्छत् । सः राजकुमारस्य यद्यदवश्यम् अध्येतव्यं तत्सर्वं अभ्यस्तमिति उवाच । ततः पिता पुत्रं प्रति एवमुवाच—"पुत्र, शत्रुविषये जागरूको भव । तव पितृव्यमृत्युः हरिः न केवलं मम शत्रुः । अस्मद्वंशस्यैव शत्रुः । अतः सः तवापि रिपुरेव" इति ।

तत् श्रुत्वा प्रह्लादः अहसत् । "तात यस्य भगवतः अनुग्रहेण वयं सर्वे सजीवाः स्मः सः भगवान् कथं रिपुः भवेत् ?

सर्वैः प्रशस्यमानेन हरिणा किं दुःखमुत्पादितं ते ? यतः पितृव्यः दुष्कृत्यानि चकार तत एव तेन हरिणा हतः । अतः पितृव्यः दण्डनार्हः इति चिन्त्यताम्" इति प्रह्लादः अब्रवीत् ।

तत् श्रुत्वा असुराधिपः अतीवक्रुद्धः । 'रे मूढ त्वं मम पुत्रः न । त्वमेव मम शत्रुः' इत्युक्त्वा तमुरसि ताडयित्वा भूमौ अक्षिपत् ।

ततः 'तं शिलया सह बद्ध्वा समुद्रे प्रक्षिपत' इति सेवकानादिशत् ।

ततः सेवकाः तथैव कृत्वा तं समुद्रे प्राक्षिपन् ।

तैः प्रक्षिप्तः प्रह्लादः प्रथमं समुद्रे निमग्नः बभूव । तत् विलोक्य सेवकाः प्रह्लादः मृतः इति मत्वा द्रुतं गत्वा असुराधिपाय निवेदयामासुः ।

प्रह्लादस्तु हरिमेवध्यायन्नासीत् । अतः सा शिला जले काष्ठवत् पुप्लुवे ।

तत् ज्ञात्वा इन्द्रः तस्य भक्तिं परीक्षितुं तत्रागतः । 'बहूनि दुःखानि प्राप्तोऽपि तानि दुःखानि सुखानीव कथं चिन्तयासि' ? इति अपृच्छत् ।

'अमराधिप विधिनैव सुखदुःखानि जायन्ते भगवांस्तु सर्व-जीवान्तर्गतः स्वेच्छया सर्वं करोति। नरेच्छया किमपि न भवति। यदि हरिः दुःखं दद्यात् तर्हि सुखमपि, स एव दद्यात् खलु ? अतः अहं विश्वासयुक्तोऽस्मि' इति उवाच प्रह्लादः।

अध्यायः—१३—विष्णुदर्शनम्।

सन्तुष्टः इन्द्रः गतः। ततः वरुणः तां शिलां तीरमनयत्। रज्जुवन्धनात् प्रह्लादममोचयत्। तदा प्रह्लादः 'वरुणदेव, त्वया दृश्यमानं हरिमहमपि साक्षात् द्रष्टुमभिलषामि। अनुग्रहं करोतु भवान्' इति प्रार्थयामास। तत्श्रुत्वा तुष्टः वरुणः 'वत्स भगवान् सर्वदा त्वामविहाय त्वयि वसति। भक्त्या स्तुतिः यदि क्रियेत तर्हि सः दृश्येत' इत्युक्त्वा गतः।

समुद्रतीरं प्राप्तः सः प्रह्लादः भगवद्दर्शनाय स्तोत्रमकरोत्। नारायणश्च अतीव तुष्टः शंखचक्रगदाधारी आविरभूत्। सः भक्तः आनन्दाश्रुपूर्णनेत्रः हरिं ववन्दे। स्तुतिं चाकरोत् बहुधा।

नारायणः तं भक्तमाश्लिष्य शिरसि अघ्राय च 'वत्स वरं वृणीष्व, ददामि ते, इत्युवाच।

तदा 'प्रभो, भवद्दर्शनेन कृतार्थोऽहम्। मे इच्छा वापि नास्ति। सर्वदा भवच्चरणकमलसेवाप्राप्तिरेव मे भवतु। अनगृह्णातु भवान्' इति प्रह्लादः अवदत्।

'वत्स त्वत्प्रभावः सर्वैः ज्ञातव्यः। अतः अचिरादेव नारसिंहेन वपुषा आगत्य तवानुग्रहं करिष्यामि। राज्याभिषेकं कृत्वा त्वामेव राजानं करिष्यामि। धर्मेण चिरं प्रजाः पालयित्वा अन्ते मम समीपे आगमिष्यसि। तव भक्तिश्च शाश्वती भवेत्' इति हरिः उक्त्वा तिरो बभूव।

**अध्यायः—१४—नृसिंहोत्पत्तिः।**

ततः प्रह्लादः निवृत्तः। आगतं पुत्रं विलोक्य असुराधिपः विस्मितः, 'समुद्रे, पातितः त्वं कथं सजीवः आगतः'? इत्यपृच्छत्।

'तात भक्तं हरिः कदापि न परित्यजेत् इति मयोक्तं खलु? तस्य कृपयैव शिलापि काष्ठवत् पुप्लुवे। तीरं चाहं प्राप्तवान् इत्युवाच प्रह्लादः।

हिरण्यकशिपुः तत् श्रुत्वा अतीव भ्रान्तः बभूव। तं हन्तुं मार्गः कः इत्यचिन्तयत्। मार्गमजानन् तं विससर्ज। ततः सः प्रह्लादः नगरे सर्वत्र हरिभक्ति प्रचारं चकार। तद्वचनेन सर्वे बालाः हरिनामकीर्तनं चक्रुः। सर्वत्र हरिनामसंकीर्तनघोषः श्रुतः।

नगरे सर्वत्र श्रुतं हरिनामकीर्तनघोषमसुरराजोऽपि शुश्राव। स्वेच्छाविरोधेन तादृशः घोषः कैः उत्पाद्यते इति अधिकारिणः अपृच्छत् सः।

'प्रभो भवत्सुतस्य चोदनेनैव ईदृशः हरिनामकीर्तनघोषः सर्वत्र उत्पाद्यते। अस्माभिः किमपि कर्तुं न शक्यते' इति ते विनयेन ऊचुः।

तत् श्रुत्वा उग्रेण कोपेन सः उदप्लवत्। 'अधुनैव सः नीचः आनीयताम्। तमहमेव हन्तुमिच्छामि' इति जगर्ज।

सेवकाः द्रुतं गत्वा प्रह्लादमानयामासुः। प्रह्लादः पितरं विलोक्य तं क्रुद्धं ज्ञात्वा समीपे गत्वा ववन्दे।

असुराधिपः पुत्रं विलोक्य 'इतः परं मया सोढुं न शक्यते। हरिभक्तिः त्वया त्यक्ष्यते वा न वा ?' इति खड्गमुद्यम्य अपृच्छत्।

'तात मरणमपि भवतु। मम भीतिः नास्ति। हरिभक्तिं कदापि न त्यजेयमहम्। सर्वशक्तिमान् सः सर्वत्र विद्यते। तं विना लोके किमपि न भवेत्। तं विना इदं भुवनमपि न स्यात्। अतः सर्वश्रेष्ठे तस्मिन् भक्तिः सर्वैरपि कर्तव्या। भवतापि तद्भक्तिरेव कर्तव्या'।

इति उवाच प्रह्लादः।

तत् श्रुत्वा असुराधिपः अट्टहासं भीषणमकरोत्।

अतीवक्रुद्धः दैत्यः 'अरे मूढ, क्व: वर्तते तव हरिः ? तं तावद्दर्शय। अस्मिन्नेव क्षणे तं हन्याम्' इति उवाच।

तदा प्रह्लादः उवाच—'तात, महाप्रभावः हरिः सर्वत्र वर्तते।

ततः सः असुरः सभायाः मध्ये स्थितं कञ्चित् स्तम्भं प्रदर्श्य 'किमिहापि वर्तते सः ?' इति पप्रच्छ ।

प्रह्लादः 'तात मया पूर्वमेव उक्तं खलु ? सः सर्वत्र विद्यते इत्युच्यमाने अस्मिन् स्तम्भे सः कथं न वर्तेत ? अतः अस्मिन् स्तम्भेऽपि सः वर्तत एव' इत्युवाच । सद्यः अतीव संरब्धः सः दैत्यः तं स्तम्भं खड्गेन चिच्छेद । आघातेन महान् शब्दः जातः । तेन सौधः अकम्पत । दैत्योऽपि अवेपत । स्तम्भः भिन्नः बभूव । तस्मात् निर्जगाम नृसिंहरूपो हरिः । तं विलोक्य प्रह्लादः ववन्दे ।

### संस्कृतमत्स्यपुराणे

**अध्यायः—१६१**

भगवान् हरिः देवान् विहाय दैत्यस्य वधं सङ्कल्पयामास । सः प्रभुः ओङ्कारसहायः असुरपुरीं गतः । तेजसा सूर्योपमः सः नरस्य अर्धतनुं कृत्वा तथा सिंहस्यार्धतनुं च कृत्वा नारसिंहेन वपुषा दैत्यस्य सभां गतः ।

सा सभा विस्तीर्णा, दिव्या, रम्या, सर्वकामयुता, शुभ्रा च आसीत् । किं च विश्वकर्मणा विहिता सा सभा दिव्यरत्नमयैः फलपुष्पप्रदैः वृक्षैः युता तेजसा ज्वलन्ती चासीत् । तत्र अनेकदैत्यवरै परिवेष्टितमनेकाप्सरोभिः नृत्यगीतैरुपास्य-

### द्रमिलमत्स्यपुराणे

**अध्यायः—१५ – सङ्कुलयुद्धम् ।**

द्विधाभिन्नात् स्तम्भात् आविर्भूतः भगवान् हरिः । नरस्यार्धशरीरं कृत्वा, मृगेन्द्रस्यार्धशरीरं च कृत्वा सः हरिः नृसिंहरूपः आगतः ।

नृसिंहस्य अट्टहासेन भीषणेन सः सौधः चचाल ।

नृसिंहं विलोक्य हिरण्यकशिपुः अचलः तस्थौ । प्रह्लादः सद्यः पितृसमीपे गत्वा तं नमस्कृत्य एवमवदत् इत्यत्रोच्यते । दैत्यस्य सभा अत्र विस्तरेण न वर्णिता ।

मानं विचित्राभरणाम्बरं स्त्रीसहस्रैः परिवृतं सिंहासनोपर्युपविष्टं दैत्येन्द्रं नृसिंहवपुः हरिः ददर्श—इति विस्तारेण सभा अत्र वर्णिता ।

अध्याय—१६२

प्रह्लादः आगतं नृसिंहं, दिव्येन चक्षुषा देवमपश्यत् । ततः स्वपितरं एवमुवाच—'तात, नारसिंहमिदं वपुः न दृष्टपूर्वं, श्रुतपूर्वं च । जगदाकारे अस्मिन् नारसिंहे सर्वे देवाः, सर्वं त्रिभुवनं, सर्वे ऋषयः सर्वे, दैत्याश्च दृश्यन्ते । सर्वदैत्यनाशायैव आगतोऽयमित्यहं मन्ये' इति ।

तत् श्रुत्वा दैत्यराजः नृसिंहग्रहणे सर्वान् दैत्यान् अचोदयत् । ते नृसिंहं प्रति अस्त्रशस्त्रप्रहारान् चक्रुः । तदा सः नृसिंहः क्षणेनैव तान् दैत्ययोधान् सर्वान् संत्रासयामास—इत्यत्र वर्ण्यते ।

अध्याय :—१६३

ततः अनेकघोररूपधारिणः बलदर्पिताः असुराः अवध्यस्य नृसिंहस्य गात्रे शरवृष्टिं चक्रुः । ते गगने खद्योता इव विलयं जग्मुः तान् विनष्टान् दृष्ट्वा असुराः भूयः क्रुद्धाः शिलावर्षैः

अध्यायः—१५

प्रह्लादः स्वपितरं नमस्कृत्य एवमवदत्—'तात अद्यापि कालः नातीतः । मयि द्वेषं विहाय मद्वचनं श्रूयताम् । भक्तरक्षकः भगवान् भक्तान् नूनं रक्षेत् । अतः भक्तिः क्रियताम्' इति ।

तत् श्रुत्वा दैत्यः 'अरे मूढ, मम पराक्रममविज्ञाय त्वमेवं भाषसे । मया दुर्लभाः वराः लब्धाः । अतः त्रिमूर्तयोऽपि मां हन्तुं न शक्ताः । त्वयोच्यमानः हरिः अयं मृगः किम् ? अद्यैव मया सः हन्येत' इति उवाच ।

तदा शब्दं श्रुत्वा सेनापतयः तत्रागताः । विचित्ररूपं विलोक्य ते स्तब्धाः तस्थुः । तं नृसिंहं हन्तुं सर्वान् दैत्यानादिदेश दैत्यराजः । ततः ते, तमायुधैः प्राहरन् । आयुधानि चूर्णानि बभूवुः । हरिः हुंकारेणैव बहून् मृतान् चकार ।

अध्याय :—१६—सेनावध :

असुराधिपः तं नृसिंहं हन्तुं सेनापतीन् आदिदेश । तेऽपि युद्धं चक्रुः । स्तम्भस्य समीपे तिष्ठन् सः हरिः समीपे आगतान् सर्वान् असुरान् यमातिथीन् चकार ।

नृसिंहं छादयामासुः। तदपि विफलीभूतं विलोक्य सः असुराधिपः क्रुद्धो बभूव। तस्मिन् क्रुद्धे जगत् तमोभूतमभूत्।

तदा असुरनाशसूचकाः, देवानां च शुभसूचकाः बहवः घोराः उत्पाताः अभवन्।

**अध्याय :—१६३**

तदा बहवः उत्पाताः जाताः।

सप्तमरुतः क्षुभिताः। सूर्यः दिवि विवर्णतां गतः। उल्काः चन्द्रे विचरन्ति स्म। गगनात् उल्काः अपतन्। अकाले द्रुमाः फलन्तिस्म। नद्यः कलुषोदकाः अवहन्। धूम्रनिभाः घोराः सप्तसूर्याः दिवि समुत्थिताः। कृष्णं कबन्धश्च दिवि लक्ष्यते स्म। ये ग्रहाः सर्वलोकक्षये प्रादुर्भवेयुः ते सर्वे गगने दृष्टाः।

दिशः रक्तरेणुसमाकुलाः न प्रकाशन्ति स्म। पूजनार्हाः वानस्पत्यः कथञ्चन न पूज्यन्ते स्म। एवं घोरनिदर्शनाः घोराः विविधोत्पाताः अदृश्यन्त। एवमत्र विस्तरेण उत्पातोत्पत्तिः वर्णिता।

**अध्याय—१६३**

तदा जीमूतघननिर्घोषः गदी, शूली, करालश्च सः असुरा- तेषामायुधानि च चूर्णानि चक्रे। भगवान् हसन्नेव, तान् आगतान् सर्वान् असुरान् मृतानकरोत्।

एवं मृतान् असुरान् विलोक्य दैत्येन्द्रः खिन्नः क्रुद्धश्च बभूव।

अतः स्वनेत्रे भ्रामयित्वा सः असुरः जगर्ज। तदा बहवः उत्पाताः जाताः।

**अध्याय :—१७—उत्पातवर्णनम्**

अत्र तु उत्पातवर्णनं न्यूनीकृतम्।

गगनात् उल्काः प्रज्वलिताः अपतन्। रक्तवृष्टिमवर्षत् मेघः।

भूमिः अकम्पत। उलूकाः अक्रन्दन्।

धेनवः क्षीरं विना रक्तमेव ददुः। नद्यः प्रतिकूलाः अवहन्।

सूर्यः धूमेनाच्छादितः।

ईदृशान् उत्पातान् विलोक्य मुनयः, असुरनाशकालः आगतः इति मत्वा सन्तुष्टाः हरिं ध्यायन्ति स्म। एवमत्र वर्ण्यते।

**अध्याय—१८—हिरण्यकशिपुवधः**

ततः हिरण्यकशिपुना प्रयुक्तानि सर्वाणि अस्त्राणि भगवान्

धिपः नृसिंहं समुपाद्रवत् । तदा ओङ्करसहायः हरिः समुत्पत्य तीक्ष्णैः नखैः युधि तमसुराधिपमुरसि विदार्य जघान । तस्य नाशात् सर्वे देवाः, कालः, भूमिः, ग्रहाः, सर्वाः दिशः, नद्यः, पर्वताः, महार्णवाश्च प्रसादं गताः । ततः सन्तुष्टाः देवाः, ऋषयश्च आदिदेवं दिव्यैः नामभिः तुष्टुवुः ।

**अध्याय :—१६३**

ततः ब्रह्मा तं नृसिंहं दृष्ट्वा 'प्रभो, भवानेव परमो देवः । भवानेव लोकानां कर्ता विकर्ता च त्वामेव परां सिद्धिं, परं मन्त्रं, परं धर्मं, परं योगं, परं रहस्यं, परस्यापि परं पवित्रं, परस्यापि परं निधानं, परस्यापि परं दान्तमाहुः । त्वामेव अग्र्यं पुराणं पुरुषं वदन्ति । इति स्तुत्वा ब्रह्मलोकं ययौ ।

| 71. पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः<br>स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते | 1.16.8 identical | | Cf. Vi 59.26, Y. 1.105, Śruti in Apar 146.<br>Mn 3.71 in VīrA 392, Smṛtitattva 533. |
| 72. देवतातिथिभृत्यानां पितॄणामात्मनश्च यः<br>न निर्वपति पच्चानामुच्छ्‌वसन्न स जीवति | 1.16.9 identical; only *d* च [स] | MBh (Bh) 3.297.39 identical<br>Vi. 59.25 (in some editions 26) identical | Mn 3.72 in VīrA 392, Apar 146. |

**Mānava-dharmaśāstra, Book I**

| | | |
|---|---|---|
| [स्वयंभुवे नमस्कृत्य ब्रह्मणेऽमिततेजसे<br>मनुप्रणीतान्विविधान्धर्मान्वक्ष्यामि शाश्वतान्] | — | |
| 1. मनुमेकाग्रमासीनमभिगम्य महर्षयः<br>प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् | — | |
| 2. भगवन् सर्ववर्णानां यथावदनुपूर्वशः<br>अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि | — | (Kullūka *ad* 1.2 quoted in ViP 6.5.74). |
| 3. त्वमेको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः<br>अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभो | — | |
| 4. स तैः पृष्टस्तथा सम्यगमितौजा महात्मभिः<br>प्रत्युवाचार्च्य तान्सर्वान्महर्षीञ्छ्रूयतामिति | | |
| | Instead this introduction BhP has 1.2.1-8:<br>शृणुष्वेदं महाबाहो पुराणं पञ्च-<br>लक्षणम् ।<br>यच्छ्रुत्वा मुच्यते राजन् पुरुषो<br>ब्रह्महत्यया ॥ | Hem 2.1.23 identical; only *b* भविष्यत् [पु$^{0}$] |

पर्वाणि चात्र वै पञ्च कीर्तितानि स्वयंभुवा ।
प्रथमं कथ्यते ब्राह्मं द्वितीयं वैष्णवं स्मृतम् ।

Hem 2.1.23 identical; only *a* यान्यनेकत्र वै; *c* प्रथमं (better)

तृतीयं शैवमाख्यातं चतुर्थं त्वाष्ट्रमुच्यते ।
पञ्चमं प्रतिसर्गाख्यं सर्वलोकैः सुपूजितम् ।।

Hem 2.1.23 identical; only *a* °यत्वाष्ट्र्यमाख्यातं; *b* भष्यमुच्यते; *c* प्रतिभाष्यं च; *d* °लोकेषु पूजितम्

एतानि तात पर्वाणि लक्षणानि निबोध मे ।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।
चतुर्दशभिर्विद्याभिर्भूषितं कुरुनन्दन ।।
अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ।।

MBh (Bh) 12 App. 12.7-8; only *a* वेदश्चत्वरो [च° वे°]

| | | | |
|---|---|---|---|
| | आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः । अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः (BhP has in *a* आयुवेदो corrected to आयुर्वेदो) प्रथमं कथ्यते सर्गो भूतानामिह सर्वशः । यच्छ्रुत्वा पापनिर्मुक्तो याति शान्तिमनुत्तमाम् ॥ | MBh (Bh) App.XII 1.9-10 identical; only *b* चेति [चै°]; *d* तु | |
| 5. आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः | 1.2.9 reads: जगदासीत्पुरा तात तमोभूतमल° अविज्ञेयमतर्क्यं च प्र°........°वशः | (*c* often in MBh as well as in Brahma-sūtra 1.2.19, Devī-purāṇa 127, 42 *b* etc.) | Cf. Ṛgveda 10.129.3, Taittirīya-brāhmaṇa 2.1.8.9. Sāyaṇa N Intr. 5, F. Johaentgen, Ueber das Gesetzbuch des Manu. |
| 6. ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः | 1.2.10 identical; only *ab* स भगवानीशो ह्यव्य°; *d* प्रोत्थितस्तमनाशनः | | Cf. Mn. 1.5 above. |
| 7. योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ | 1.2.11 identical; *d* एष स्वयमुत्थितः and adds: 1.2.1[illegible]: यो ऽसौ षड्विंशको लोके तथा यः पुरुषोत्तमः भास्करश्च महाबाहो परं ब्रह्म च कथ्यते | | Cf. Mn. 1.5 above. |

| | | | |
|---|---|---|---|
| 8. सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः अप एव ससर्जादौ तासु वीर्यमवासृजत् | 1.2.13 identical<br>Then BhP adds: 1.2.14+ 15 *ab*:<br>यस्मादुत्पद्यते सर्वं सदेवासुरमानुषम् ।<br>बीजं शुक्रं तथा रेत उग्रं वीर्यं च कथ्यते ॥<br>वीर्यस्यैतानि नामानि कथितानि स्वयंभुवा । | *ab* MBh (Bh) 5.294 identical; only *b* वीर्यमथासृजत्<br>(*a* and *b* quoted separately in MBh) | Cf. Ṛgveda 10.121.1, Viṣṇu-purāṇa 1 and note to Mn 1.5 above. |
| 9. तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः | 1.2.15*cd*+16*ab* identical; only *b* ज्वालामालाकुलं विभो; *c* यस्मि° and adds: 16*cd*-18*ab*<br>सुरज्येष्ठश्चतुर्वक्त्रः परमेष्ठी पितामहः ॥<br>क्षेत्रज्ञः पुरुषो वेधाः शंभुर्नारायणस्तथा ।<br>पर्यायवाचकैः शब्दैरेवं ब्रह्मा प्रकीर्त्यते ॥<br>सदा मनीषिभिस्तात विरञ्चिः कञ्जजस्तथा । | MBh (Bh) 5.294* l. 2-3 identical. *ab* also MBh (Bh) 13. App. 3.267 identical (*e* also quoted in MBh 13.59.39 & 14.40.3) | Cf. Mn 1.5 above. |

| | | | |
|---|---|---|---|
| 10. आपो नारा इति प्रोक्ता आपौ वै नरसूनवः ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः | 1.2.18*cd*+19*ab* identical<br><br>BhP adds 1.2.19*cd*+20*ab*: अरमित्येव शीघ्राय नियताः कविभिः कृताः ॥ आप एवार्णवीभूत्वा सुशीघ्रा-स्तेन ता नराः । | MBh(Bh) 12.328.35 identical; only *cd* अयनं मम तत्पूर्वमतो नारायणो ह्यहम्. Viṣṇu-purāṇa 1.4.6 identical; only *c* अयनं तस्य ताः | Cf. H.H. Wilson, The Vishṇu-purāṇa, fn. 2, p. 27 (Quotations in other Purāṇas; Cf. Vāmana-purāṇa स. मा. 22. 29, Kūrma-purāṇa 1.6.5, etc.) Cf. Mn 1.5 above. |
| 11. यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते | 1.2.20 *cd*+21 *ab* identical | | Cf. Mn. 1.5 above. |
| 12. तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् स्वयमेवात्मनो ध्यानात्तदण्डमकरोद्द्विधा | 1.2.21*cd*-22*ab* reads: एवं स भगवानण्डे तत्त्वमेव निरूप्य वै । ध्यानमास्थाय राजेन्द्र त° | | Cf. Śatapatha-brāhmaṇa 11.1.6.2, Mn 1.5 above. |
| 13. ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम् | 1.2.22 *cd*+23 *ab* reads: शकलाभ्यां च राजेन्द्र दिवं भूमिं च निर्ममे । अन्तर्व्योम दिशश्चाष्टौ वारुणं स्थानमेव हि<br>*ab* 1.16.42 *cd* identical; only *a* सोण्डकपाला° | | Cf. Mn. 1.5 above. |

| | | | |
|---|---|---|---|
| 14. उद्वबर्हात्मनश्चैव मनः सदसदात्मकम्<br>मनसश्चाप्यहंकारमभिमन्तारमीश्वरम् | 1.2.23 *cd*+24 *ab* reads: ऊद्र्ध्वं महान्गतो राजन् समन्ताल्लोकभूतये । महतश्चा° तस्माच्च त्रिगुणा अपि | | Cf. MBh (Bh) 12.298.17. |
| 15. महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च<br>विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च | BhP 1.2.24 *cd*+25 has instead:<br>त्रिगुणा अतिसूक्ष्मास्तु बुद्धिगम्या हि भारत ॥<br>उत्पत्तिहेतुभूता वै भूतानां महतां नृप ।<br>तेषामेव गृहीतानि श°......... तु [च] ॥ | | Cf. Mn 2. 89-92. |
| 16. तेषां त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसाम्<br>संनिवेश्यात्ममात्रासु सर्वभूतानि निर्ममे | *ab*=1.2.26 identical; only *a* तथैवावयवाः सू° instead of *cd* BhP 1.2.27 *c* identical; rest:<br>स राजन्भगवान्विभुः ।<br>भूतानि निर्ममे तात सर्वाणि विधिपूर्वकम् ॥ | | |
| 17. यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट्<br>तस्माच्छरीरमित्याहुस्तस्य मूर्ति मनीषिणः | 1.2.28 identical; only *b* °याणि षट् | | |
| 18. तदाविशन्ति भूतानि महान्ति सह कर्मभिः<br>मनश्चावयवैः सूक्ष्मैः सर्वभूतकृदव्ययम् | 1.2.29 has in *a* महान्ति तानि; *b* आविशन्ति ततो विभुम् *c* कर्मणा सह राजेन्द्र; *d* सगुणश्चापि वै गुणाः | *ab* = MBh (Bh) 12.224.43 *cd* identical; only *b* कर्मणा | Cf. MBh (Bh) 12.224.43-4. |

| | |
|---|---|
| 19. तेषामिदं तु सप्तानां पुरुषाणां महौजसाम्<br>सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवत्यव्ययाद्व्ययम् | 1.2.30 identical.<br><br>BhP. adds 1.2.31-38 reading:<br>भूतादिमहतस्तात येन व्याप्तमिदं जगत् ।<br>तस्मादपि महाबाहो पुरुषाः पञ्च एव हि ॥<br>केचिदेवं परां तात सृष्टिमिच्छन्ति पण्डिताः ।<br>अन्येऽप्येवं महाबाहो प्रवदन्ति मनीषिणः ॥<br>योऽसावात्मा परस्तात कल्पादौ सृजते तनुम् ।<br>प्रजनश्च महाबाहो सिसृक्षुर्विविधाः प्रजाः ॥<br>तेन सृष्टः पुद्गलस्तु ऽधानं विशते नृप ।<br>प्रधानं क्षोभितं तेन विकारान्सृजते बहून् ॥<br>उत्पद्यते महांस्तस्मात्ततो भूतादिरेव हि ।<br>उत्पद्यते विशालं च भूतादेः कुरुनन्दन ॥ |

विशालाच्च हरिस्तात हरेश्चापि वृकास्तथा ॥
वृकैर्मुष्णन्ति च बुधास्तस्मात् सव भवेन्नृप ॥
तथैषामेव राजेन्द्र प्रादुर्भवति वेगतः ।
मात्राणां कुरुशार्दूल विबोधस्तदनन्तरम् ।
तस्मादपि हृषीकाणि विविधानि नृपोत्तम ।
तथेयं सृष्टिराख्यातारोध्यतः कुरुनन्दन ॥

20. आद्याद्यस्य गुणं त्वेषामवाप्नोति परः परः
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः

BhP has instead 1.2.39-41 *ab* (cf. 39 *ab/cd*)
भूयो निबोध राजेन्द्र भूतानामिह विस्तरम् ॥
गुणाधिकानि सर्वाणि भूतानि पृथिवीपते ॥
आकाशमादितः कृत्वा उत्तरोत्तरमेव हि ।
एकं द्वौ च तथा त्रीणि चत्वारश्चापि पञ्च च ॥
ततः स भगवान् ब्रह्मा पद्मासनगतः प्रभुः ।

Cf. MBh (Bh) 12.224.39.
Also in SMS 4781

| | | | |
|---|---|---|---|
| 21. सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे | 1.2.41 *cd*+42*ab* identical | | Cf. MBh (Bh) 12.672.* |
| 22. कर्मात्मनां च देवानां सोऽसृजत्प्राणिनां प्रभुः साध्यानां च गणं सूक्ष्मं यज्ञं चैव सनातनम् | 1.2.42*cd*+43*ab* identical; only *a* कर्मोद्भवानां; *b*° जहे-हिनां; *c* तुषितानां ग°; *d* राजन् यज्ञं चै° | | |
| 23. अग्निवायुरविभ्यश्च त्रयं ब्रह्म सनातनम् दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् | 1.2.43*cd*+44*ab* identical; only *ab* दत्त्वावीर समानेभ्यो गुह्यं | | |
| 24. कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा सरितः सागराञ्छैलान्समानि विषमाणि च | 1.2.44 *cd*-45 *ab* identical; only *b* ग्रहानृतुंस् तथा नृप | (*c* in MBh (Bh) 3.83.24) | |
| 25. तपो वाचं रतिं चैव कामं च क्रोधमेव च सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः | 1.2.45*cd*-46*ab* identical; only *ab* का° क्रो° तथा वाचं रतिं चापि कुरूद्वह (tr.) *cd* राजेन्द्र सिसृक्षुर्विविधाः प्र° | | |
| 26. कर्मणां तु विवेकाय धर्माधर्मौ व्यवेचयत् द्वन्द्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः | 1.2.46 *cd*-47 *ab* reads : *a* धर्माधर्मौ वि°; *b* कर्मणां च तथासृजत् *cd* सुखदुःखादिभि-द्वंद्वैः प्रजाश्चेमा न्ययोजयत् | | |

| | | | |
|---|---|---|---|
| 27. अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ताभिः सार्धमिदं सर्वं संभवत्यनुपूर्वशः | 1.2.47*cd*-48*ab* identical; only *c* सर्वम् [सा°] वीर [स°] | | |
| 28. यं तु कर्मणि यस्मिन्स न्ययुङ्क्त प्रथमं प्रभुः स तदेव स्वयं भेजे सृज्यमानः पुनः पुनः | 1.2.48*cd*-49*ab* identical; only *ab* यत्कृतं तु पुरा कर्म संनियुक्तेन वै नृप; *d* °मानं | | Cf. MBh (Bh) 12.224.47. |
| 29. हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते यद्यस्य सोऽदधात्सर्गे तत्तस्य स्वयमाविशत् | 1.2.49 *cd*+50*ab* identical only *b* °धर्मे ऋतानृते; *c* यद्यथास्याभवत्सर्गे | *ab*=MBh (Bh) 12.244.48 *ab* as in BhP | Cf. MBh (Bh) 12.224.48. |
| 30. यथर्तुलिङ्गान्यृतवः स्वयमेवर्तुपर्यये स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः | 1.2.50*cd*+51*ab* identical; only *a* यथा च लि°; *b* °वानुप° | | Cf. MBh (Bh) 12.224.70. |
| 31. लोकानां तु विवृद्ध्यर्थं मुखबाहूरुपादतः ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत् | 1.2.51 *cd*-52 *ab* identical; only *a* लोकस्येह; *cd* ब्रह्म क्षत्रं तथा चोभौ वैश्यशूद्रौ नृपोत्तम<br>BhP adds then 1.2.52*cd*-57*ab* reading:<br>मुखानि यानि चत्वारि तेभ्यो वेदा विनिःसृताः ॥<br>ऋग्वेदसंहिता तात वसिष्ठेन महात्मना । | | |

| | | |
|---|---|---|
| | पूर्वान्मुखान्महाबाहो दक्षिणा-<br>च्चापि वै शृणु ।।<br>यजुर्वेदो महाराज याज्ञवल्क्येन<br>वै सह ।<br>सामानि पश्चिमात्तात गौतमश्च<br>महाऋषिः ।।<br>अथर्ववेदो राजेन्द्र मुखाच्चा-<br>प्युत्तरान्नृप ।<br>ऋषिश्चापि तथा राजञ्छौनको<br>लोकपूजितः ।।<br>यत्तन्मुखं महाबाहो पञ्चमं लोक-<br>विश्रुतम् ।<br>अष्टादश पुराणानि सेतिहासानि<br>भारत ।।<br>निर्गतानि ततस्तस्मान्मुखात्<br>कुरुकुलोद्वह ।<br>तथान्याः स्मृतयश्चापि यमाद्या<br>लोकपूजिताः ।।<br>ततः स भगवान्देवो द्विधादेहम-<br>कारयत् । | |
| 32. द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्<br>अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः | 1.2.58*cd*+59*ab* identical;<br>only *c* च [स] | (*a* in MBh.(Bh)<br>15.38.9; 15.39.12) |

| | | | |
|---|---|---|---|
| 33. तपस्तप्त्वासृजद्यं तु स स्वयं पुरुषो विराट्<br>तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः | *ab* only 1.2.59*cd* identical<br>— | | |
| 34. अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम्<br>पतीन्प्रजानामसृजं महर्षीनादितो दश | 1.2.60 *ab* reads: स चकार तपो राजन् सिसृक्षुर्विविधाः प्रजाः *cd* identical | | 34-5 also in Hemādri, Dāne 242. |
| 35. मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्<br>प्रचेतसं वसिष्ठं च भृगुं नारदमेव च | 1.2.61-62*ab* reads instead: नारदं च भृगुं तात कं प्रचेतसमेव हि ।<br>पुलहं क्रतुं पुलस्त्यं च अत्रिमङ्गिरसं तथा ॥<br>मरीचिं चापि राजेन्द्र योसावाद्यः प्रजापतिः । | *ab* = MBh (Bh) 12.200.17 *cd* identical. | Cf. Viṣṇu-purāṇa 1.7.5. Also in other Purāṇas (Cf. H.H. Wilson's Viṣṇu Purāṇa p. 49). |
| 36. एते मनूंस्तु सप्तान्यानसृजन्भूरितेजसः<br>देवान्देवनिकायांश्च महर्षींश्चामितौजसः | 1.2.62 *cd* + 63 *ab* reads: *a* एतांश्चान्यांश्च राजेन्द्र; *b* °जङ्कूरि°; *cd* अथ देवानृषीन्दैत्यान् सोऽसृजत्कुरुनन्दन | | |
| 37. यक्षरक्षःपिशाचांश्च गन्धर्वाप्सरसोऽसुरान्<br>नागान्सर्पान्सुपर्णांश्च पितॄणां च पृथग्गणान् | 1.2.63 *cd* identical + 64*ab* which reads: मनुष्याणां पितॄणां च सर्पाणां चैव भारत | | Cf. Mn. 3.194-199. |

| | |
|---|---|
| 38. विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च<br>उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च | BhP has insted 1.2.64 *cd*-65 (cf. *d*)<br>नागानां च महाबाहो ससर्ज विविधान् गणान् ।।<br>क्षणरुचोऽशनिगणान् रोहितेन्द्र-धनूंषि च ।<br>धूमकेतुंस्तथाचोल्कानिर्वाताङ-ज्योतिषाङ्गणान् |
| 39. किन्नरान्वानरान्मत्स्यान्त्रिविधांश्च विहङ्गमान्<br>पशून्मृगान्मनुष्यांश्च व्यालांश्चोभयतोदतः | 1.2.66 reads: *a* मनुष्यान्-किन्नरान्; *b* वराहांश्च वि°; *cd* गजानश्वानथ पशून् मृगान्व्या-लांश्च भारत |
| 40. कृमिकीटपतङ्गांश्च यूकामक्षिकमत्कुणम्<br>सर्वं च दंशमशकं स्थावरं च पृथग्विधम् | 1.2.67 identical; only *b* यूकालिक्षक° |
| 41. एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः<br>यथाकर्म तपोयोगात्सृष्टं स्थावरजङ्गमम् | *ab* 1.2.68 *ab* reads: एवं स भास्करो देवः ससर्ज भुवन-त्रयम्; *cd* — |
| 42. येषां तु यादृशं कर्म भूतानामिह कीर्तितम्<br>तत्तथा वोऽभिधास्यामि क्रमयोगं च जन्मनि | 1.2.68*cd*+69*ab* identical: only *c* कथयिष्यामि तत्सर्वं |

---

| | |
|---|---|
| 43. पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः<br>रक्षांसि च पिशाचाश्च मानुषाश्च जरायुजाः | BhP 1.2.69*cd*+70*ab* reads instead: गजा व्याला मृगास्तात पशवश्च पृथग् विधाः पिशाचा मानुषास्तात रक्षांसि च जरायुजाः |

| | |
|---|---|
| 44. अण्डजाः पक्षिणः सर्पा नक्रा मत्स्याः सकच्छपाः<br>यानि चैवंप्रकाराणि स्थलजान्यौदकानि च | 1.2.70*cd*+71*ab* identical: only *a* द्विजास्तु अण्डजाः स°<br>*c* एवं विधानि यानीह |
| 45. स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्<br>ऊष्मणश्चोपजायन्ते यच्चान्यत्किंचिदीदृशम् | 1·2.71*cd*+72*ab* identical; only *b* यूकालिक्षकमत्कुणाः<br>*c* °णा चो° |
| 46. उद्भिज्जास्तरवः सर्वे बीजकाण्डप्ररोहिणः<br>ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः | 1.2.72*cd*+73*ab* identical; only *a* उद्भिज्जाः स्थावराः;<br>*d* नानाविधाफ° |
| 47. अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः<br>पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः | 1.2.73*cd*+74*ab* identical |
| 48. गुच्छगुल्मं तु विविधं तथैव तृणजातयः<br>बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च | 1.2.74*cd*+75*ab* identical |
| 49. तमसा बहुरूपेण वेष्टिताः कर्महेतुना<br>अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः | 1.2.75*cd*-76*ab* identical |
| 50. एतदन्तास्तु गतयो ब्रह्माद्याः समुदाहृताः<br>घोरेऽस्मिन्भूतसंसारे नित्यं सततयायिनि | BhP has instead 1.2.76*cd* +77 (cf. *ef*):<br>एतावत्यस्तु गतयः प्रोद्भूताः कुरुनन्दन ॥<br>तस्माद् देवा द्दीप्तिमन्तो भास्कराच्च महात्मनः ।<br>घोरेस्मिस्तात संसारे नि°...... |

| | |
|---|---|
| 51. एवं सर्वं स सृष्ट्वेदं मां चाचिन्त्यपराक्रमः<br>आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् | 1.2.78 identical; only *b* राजँल्लोकगुरुं परम्; *c* तिरोभूतः स भूतात्मा |
| 52. यदा स देवो जागर्ति तदेदं चेष्टते जगत्<br>यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति | 1.2.79 identical |
| 53. तस्मिन्स्वपति तु सुस्थे कर्मात्मानः शरीरिणः<br>स्वकर्मभ्यो निवर्तन्ते मनश्च ग्लानिमृच्छति | 1.2.80 identical; only *ab*: °ति राजेन्द्र जन्तवः कर्मबन्धनाः |
| 54. युगपत्तु प्रलीयन्ते यदा तस्मिन्महात्मनि<br>तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः | 1.2.81 identical; only *d* भारत [नि°] |
| 55. तमोऽयं तु समाश्रित्य चिरं तिष्ठति सेन्द्रियः<br>न च स्वं कुरुते कर्म तदोत्क्रामति मूर्तितः | 1.2.82 identical; only *a* तमो यदा; *c* न नवं |
| 56. यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च<br>समाविशति संसृष्टस्तदा मूर्तिं विमुञ्चति | 1.2.83 identical; only *a* यदाहंमात्रिको |
| 57. एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम्<br>संजीवयति चाजस्रं प्रमापयति चाव्ययः | 1.2.84 identical; only *b* जगत्प्रभुः [च°]<br>BhP adds here 1.2.85+86*ab* reading:<br>कल्पादौ सृजते तात अन्ते कल्पस्य संहरेत् ।<br>दिनं तस्येह तत्तात कल्पान्तमिति कथ्यते ।।<br>कालसंख्यां ततस्तस्य कल्पस्य शृणु भारत । |

| | | |
|---|---|---|
| 58. इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः<br>विधिवद्ग्राहयामास मरीच्यादींस्त्वहं मुनीन् | — | Cf. Kūrma-purāṇa 1.2.35<br>Also in PM 106. |
| 59. एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः<br>एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः | — | Also in Apar 4. |
| 60. ततस्तथा स तेनोक्तो महर्षिर्मनुना भृगुः<br>तानब्रवीदृषीन्सर्वान्प्रीतात्मा श्रूयतामिति | — | |
| | (for BhP 1.2.86*cd*-108*ab*<br>see Mn. 1 .64 sqq.) | |
| 61. स्वायंभुवस्यास्य मनोः षड्वंश्या मनवोऽपरे<br>सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानोऽमितौजसः | 1 2.108*cd* 109*ab* identical;<br>only *a* मनोः स्वायंभुवस्येह;<br>*cd* स्वाः म° महौजसः | |
| 62. स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा<br>चाक्षुषश्च महातेजा विवस्वत्सुत एव च | — | |
| | BhP adds 1.2.109 *cd*<br>सावर्णयस्तथा पञ्च भौत्यो<br>रौच्यस्तथापरः | |
| 63. स्वायंभुवाद्याः सप्तैते मनवो भूरितेजसः<br>स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् | 1.2.110 reads (cf *c*)<br>एते भविष्या मनवः सप्त प्रोक्ता<br>नृपोत्तम स्वे स्वेऽन्तरे सर्वमिदं<br>पालयन्ति चराचरम् | |

| | | | |
|---|---|---|---|
| 64. निमेषा दश चाष्टौ च काष्ठा त्रिंशत् तु ताः कला त्रिंशत्कलो मुहूर्तः स्यादहोरात्रं तु तावता | BhP has instead 1.2.86*cd*-88*ab* reading (cf *ac*)<br>निमेषा दश चाष्टौ च अक्षणः काष्ठा निगद्यते ॥<br>त्रिंशत्काष्ठाः कलामाहुः क्षणस्त्रिंशत्कलाः स्मृताः ॥<br>मुहूर्तमथ मौहूर्ता वदन्ति द्वादश क्षणम् ॥<br>त्रिंशन्मुहूर्तमुद्दिष्टमहोरात्रं मनीषिभिः ।<br>and then adds 1.2.88*cd*+89*ab*: मासस्त्रिंशदहोरात्रं द्वौ द्वौ मासावृतुः स्मृतः ऋतुत्रयमप्ययनमयने द्वे तु वत्सरः | | Cf. MBh (Bh) 12.224.13.<br><br>Cf. Viṣṇu-Purāṇa 1.3.7 sqq. (and for other Purāṇas, H.H. Wilson's Viṣṇu Purāṇa, p. 22 fn. 2).<br>K. 2.20.28 sqq. |
| 65. अहोरात्रे विभजते सूर्यो मानुषदैविके रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः | 1.2.89*cd*-90*ab* identical | MBh(Bh) 12.224.14 identical; only *b* °दैकिके (but some texts have °दैविके) | |
| 66. पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी | 1.2.90*cd*-91*ab* identical; only *c* कृष्णेः | MBh(Bh) 12.224.15 identical; only *b* °गस्तयोः पुनः; *c* कृष्णोऽहः कर्मचेष्टायां | |
| 67. दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् | 1.2.91*cd*+92*ab* identical | MBh(Bh) 12.224.16 identical | |

| | | | |
|---|---|---|---|
| 68. ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासतः<br>एकैकशो युगानां च क्रमशस्तन्निबोधत | 1.2.92*cd*-93*ab* identical; only *b* महीपते [स°]; *d* °बोध मे | | Cf. MBh (Bh) 2.224.17-8. |
| 69. चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम्<br>तस्य तावच्छती संध्या संध्यांशश्च तथाविधः | 1.2.93*cd*+94*ab* identical; only *b* तत् [तु] | MBh(Bh) 12.224.19 identical; only *b* तत् [तु] (Kullūka *ad* 1.69 cf. ViP 1.3.12-13, 10) | |
| 70. इतरेषु ससन्ध्येषु ससंध्यांशेषु च त्रिषु<br>एकापायेन वर्तन्ते सहस्राणि शतानि च | BhP 1.2.94*cd*-97*ab* reads instead (cf. *abcd*)<br>त्रेता त्रीणि सहस्राणि वर्षाणि च विदुर्बुधाः ॥<br>शतानि षट् च राजेन्द्र सन्ध्या-सन्ध्यांशयोः पृथक् ।<br>वर्षाणां द्वे सहस्रे तु द्वापरे परिकीर्तिते ॥<br>चत्वारि च शतान्याहुः सन्ध्या-सन्ध्यांशयोर्बुधः ।<br>सहस्रं कथितं तिष्ये शतद्वय-समन्वितम् ॥<br>एषा चतुर्युगस्यापि संख्या प्रोक्ता नृपोत्तम । | MBh(Bh) 12 224.20 identical | |
| 71. यदेतत्परिसंख्यातमादावेव चतुर्युगम्<br>एतद्द्वादशसाहस्रं देवानां युगमुच्यते | 1.2.97*cd*-98*ab* identical | (Kullūka *ad* 1.71 cf. ViP 1.3.14) | Cf. MBh (Bh) 12.224.28. |

| | | | |
|---|---|---|---|
| 72. दैविकानां युगानां तु सहस्रं परिसंख्यया ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च | 1.2.98*cd*+99*ab* identical; only *b* सहस्रपरि°; *d* रात्रिरुच्यते | | Cf. MBh (Bh) 12.224.29. |
| 73. तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः | 1.2.99*cd*-100*ab* identical; only *a* एतद्युगस° | MBh(Bh) 12.224.20 & in BhG 8.17; it reads: सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः रात्रिं युगसहस्रान्तां तेऽहो° | Cf. MBh (Bh) 12.224.28. |
| 74. तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते प्रतिबुद्धश्च सृजति मनः सदसदात्मकम् | 1.2.100*cd*-101*ab* identical; only *a* ततोऽसौ युगपर्यन्ते; *c* °द्धस्तु | | Cf. MBh (Bh) 12.224.31. |
| 75. मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया आकाशं जायते तस्मात्तस्य शब्दं गुणं विदुः | 1.2.101*cd*+102*ab* identical; only *c* विपुलं [आ°] | MBh(Bh) 12.224.35 identical; only *d* गुणो मतः (but some texts as in Mn.) | |
| 76. आकाशात्तु विकुर्वाणात् सर्वगन्धवहः शुचिः बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः | 1.2.102*cd*+103*ab* identical; only *a* विपुलात्तु | MBh(Bh) 12 224.36 identical; only *d* तस्य स्पर्शो गु° | |
| 77. वायोरपि विकुर्वाणाद्विरोचिष्णु तमोनुदम् ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणमुच्यते | *ab*=1.2.103*cd* identical; then BhP adds 104-105*ab*: उत्पद्यते विचित्रांशुस्तस्य रूपं गुणं विदुः। तस्मादपि विकुर्वाणादापो जाताः स्मृता बुधैः ॥ तासां गुणो रसो ज्ञेयः सर्वलोकस्य भावनः। | MBh(Bh) 12.224.37 identical; only *b* ज्योतिर्भूतं त°; *c* रोचिष्णु जायते तत्र | |

| | | | |
|---|---|---|---|
| 78. ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः<br>अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः | for *ab* see above.<br>*cd* 1.2.105*cd* identical | MBh(Bh) 12.224.38 identical; only *a* °षोऽपि; *b* भवन्त्यापो रसात्मिकाः; *d* पूर्वैषा सृष्टिरुच्यते | Cf. SMS VIII. |
| 79. यत्प्राग्द्वादशसाहस्रमुदितं दैविकं युगम्<br>तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते | 1.2 106 identical; only *b* उक्तं सौमनसं युगम् | | |
| 80. मन्वन्तराण्यसंख्यानि सर्गः संहार एव च<br>क्रीडन्निवैतत्कुरुते परमेष्ठी पुनः पुनः | *ab*=1.2.107*ab* identical; *cd* 1.2.112 *ab* identical; only *d* नराधिप. In between BhP has 1.2.107*cd*-108 *ab* (below); 108*cd*-110 (see Mn. 1.61-63) and 111 (below):<br>तथाप्यहे सदा ब्राह्मे मनवस्तु चतुर्दश ॥<br>कथ्यन्ते कुरुशार्दूल संख्यया पण्डितैः सदा ।<br>... ... ... ...<br>एवंविधं दिनं तस्य विरिञ्चेस्तु महात्मनः ।<br>तस्यान्ते कुरुते सर्गं यथेदं कथितं तव ॥ | | |

14

| | | | |
|---|---|---|---|
| 81. चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे नाधर्मेणागमः कश्चिन् मनुष्यानुपवर्तते | 1.2.112*cd*+113*ab* identical; only *d* मनुष्याणां प्रवर्तते | MBh(Bh) 12.224.22 identical; only *d* परस्तस्य प्रवर्तते | Also in VīrP 50, Apar 1002 (*ab*) |
| 82. इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः चौरिकानृतमायाभिर्धर्मश्चापैति पादशः | 1.2.113*cd*-115 *cd* read instead (cf. *a ef*) : इतरेष्वागमास्तात धर्मश्च कुरुनन्दन ॥ यादृशाः परिहीयन्ते यथाह भगवान्मनुः । चौर्याच्चाप्यनृताद्दम्भान्मायाभिरमितद्युते ॥ पादेन हीयते धर्मस्त्रेतादिषु युगेषु वै । | MBh(Bh) 12.224.23 identical; only *b* °रोप्यते; *d* चोपचीयते[चा°] | Also in VīrP 50. |
| 83. अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः कृते त्रेतादिषु त्वेषां वयो ह्रसति पादशः | 1.2.115*cd*+116*ab* identical | MBh(Bh) 12.224.24 identical; only *c* °द्विष्वेतेषां; *d* पादशो ह्रसते वयः | Also in Apar 1002 (*ab*) |
| 84. वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् | BhP has instead 1.2.116 *cd*+117 (cf. *ab*/*cd*) वेदोक्तमायुराशीश्च मर्त्यानां कुरुनन्दन । कर्मणां तु फलं तात फलत्यनुयुगं सदा । प्रभावश्च तदा लोके फलत्येव शरीरिणाम् | | Cf. MBh (Bh) 12.224.25; 12.252. 7*cd*. |

| | | | |
|---|---|---|---|
| 58. अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे<br>अन्ये कलियुगे नृणां युगह्रासानुरूपतः | 1.2.118 identical; only *b* °परे परे; *c* नृणां; *d* युगधर्मानुरूपतः | MBh(Bh) 12.224.26 identical; only *cd* धर्मा यथाशक्तिकृता इव<br>Parāśara-smṛti 1.22 identical; only *b* °परे परे; *d* युगरूपानुसारतः | Also in SC-Saṁskāra 27, Hemādri, Pariśeṣa-kāla 657. Cf. R. Lingat in JA 249.487 and in *Contributions to Indian Sociology*, VI. 7-16. |
| 86. तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते<br>द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे | 1.2.119 identical; only *c* इत्या° [एवा°] | MBh (Bh) 2.224.27 only *b* उत्तमम् [उच्य°] *d* एव [एकं]<br>Parāśara-smṛti 1.23 identical; only *c* इत्यूचुर्दा°<br>Kūrma-purāṇa 1.27.17 identical; only *a* ध्यानं [त°]; *c* एव [एकं]<br>*ab* Vāyu-purāṇa 8.65 *cd* identical; only *a* ध्यानं [त°] | Cf. Varāha-purāṇa 68.8. Also in SC-Saṁskāra 27, VīrP 48, Kṛtyasārasamuccaya 86, Hemādri, Pariśeṣa-kāla 657, SRHt 17. 11, SSSN 28. 8, SMS VIII. Cf. R. Lingat in JA 249.487 and in *Contributions to Indian Sociology*, VI. 7-16 (Also in Ślt (OJ) 65) |
| 87. सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः<br>मुखबाहूरुपज्जानां पृथक्कर्माण्यकल्पयत् | 1.2.120 identical; only *a* °स्य राजन्; *b* च [स] °द्युतेः; *c* °रुपादानां | | |

| | | | | |
|---|---|---|---|---|
| 88. अध्यापनमध्ययनं यजनं याजनं तथा दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् | 1.2.121 identical | (*a* in MBh (Bh) 13. App. 15.759) (*c* in MBh (Bh) 14.45.21) | Also in PM 135, VīP 45, NP, Saṁskāra 160. | Cf. Mn 10.75-79, 99. |
| 89. प्रजानां रक्षणं दानमिज्याध्ययनमेव च विषयेष्वप्रसक्तिं च क्षत्रियस्य समादिशत् | 1.2.122 has in *ab* पालनं राजन् दानमध्ययनं तथा; *c* विषयेषु प्र°; *d* तथेज्यां क्षत्रियस्य तु | (*a* in MBh(Bh) 8.225*) | Also in VīrP45, NP, Saṁskāra 73*b*. | |
| 90. पशूनां रक्षणं दानमिज्याध्ययनमेव च वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च | 1.2.123 identical | | Also in VīrP 45, PM 416. | |
| 91. एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् एतेषामेव वर्णानां शुश्रूषामनसूयया | 1.2.124 identical; only *b* कर्म लोके प्रकीर्तितम्; *d* अनुपूर्वशः | | Also in SMS 7526, VīrP 45, Varṣakriyā-kaumudī 568. | |
| 92. ऊर्ध्वं नाभेर्मेध्यतरः पुरुषः परिकीर्तितः तस्मान् मेध्यतमं त्वस्य मुखमुक्तं स्वयंभुवा | 1.2.125 reads instead: पुरुषस्य सदा श्रेष्ठं नाभेरूर्ध्वं नृपोत्तम । तस्मादपि शुचितरं मुखं तात स्वयंभुवः | | Cf. Mn. 5.132. | |
| 93. उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः | BhP 1.2.126 *ab* reads: तस्मान्मुखाद्द्विजो जात इतीयं वैदिकीश्रुतिः; *cd* identical | | Also in SMS 6482. | |
| 94. तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये | 1.2.127 identical; only *a* स सृष्टो ब्रह्मणा पूर्वं; *b* कुरूद्वहः [°दि°]; *c* हव्यानामिव कव्यानां; *d* °स्यापि च | | Cf. Mn. 1.33-4, 41. | |

| | | | | |
|---|---|---|---|---|
| 95. यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः<br>कव्यानि चैव पितरः किं भूतमधिकं ततः | 1.2.128 identical; only *a* अश्नन्ति च मुखेनास्य | MBh (Bh) 14. App. 4.416-7 identical; only *a* समश्नन्ति; *d* तथा | | Cf. Y 1.198-9. |
| 96. भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः<br>बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः | 1.2.129 identical | MBh (Bh) 5.6.1 identical; only *d* नराणां तु द्विजातयः | | |
| 97. ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः<br>कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः | 1.2.130 identical; only *d* °वेदिनः | *cd* = MBh (Bh) 5.30* | | |
| 98. उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती<br>स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते | BhP 1.2.131 reads instead:<br>जन्म विप्रस्य राजेन्द्र धमार्थमिह कथ्यते उत्पन्नः सर्वसिद्धयर्थं याति ब्रह्मसदो नृप | MBh (Bh) 14. App. 4.418-9 identical | Also in SMS 6588. | |
| 99. ब्राह्मणो जायमानो हि पृथिव्यामधिजायते<br>ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये | BhP 1.2.132 reads instead:<br>स चापि जायमानस्तु पृथिव्यामिह जायते भतानां प्रभवायैव ध°......... | MBh (Bh) 12.73.6 identical; only *a* °मात्रस्तु; *b* पृथिवीमन्वजायत | Also in Apar 281. | |
| 100. सर्वं स्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतम्<br>श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति | 1.2.133 identical; only *a* हि [स्वं]; *b* पृथिवीग°; *c* जन्मना चोत्तमेनेदं | MBh (Bh) 12.73.10 reads *a* विप्रस्य सर्वमेवैतद् *cd* ज्येष्ठेनाभिजनेनेह तद्धर्मकुशला विदुः | Also in Apar 282. | |
| 101. स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च<br>आनृशंस्याद् ब्राह्मणस्य भुञ्जते हीतरे जनाः | 1.2.134 *a* स्वकीयं; *b* विदधाति च सुव्रत; *c* करुणां कुर्वतस्तस्य; *d* °तीहेत° | MBh (Bh) 14. App. 4.420-1 identical<br>*ab* MBh(Bh) 12.73.11*ab* identical | | |

102. तस्य कर्मविवेकार्थं शेषाणां चानुपूर्वशः
स्वायंभुवो मनुर्धीमानिदं शास्त्रमकल्पयत्

---

BhP starts the new sub-chapter (1.1.67-71 *ab*) as follows:

शतानीक उवाच

भारतं तु श्रुतं विप्र तातस्याङ्क-
गतेन तु ।
रामस्य चरितं चापि श्रुतं ब्रह्मन्
समन्ततः ॥
पुराणानि च विप्रेन्द्र भविष्यं न
सुव्रत ।
पुराणं वद विप्रेन्द्र भविष्यं
कौतुकं हि मे ॥

सुमन्तुरुवाच

साधुसाधु महाबाहो साधु पृष्टोऽ-
स्मि मानद ।
शृणु मे वदतो राजन्पुराणं
नवमं महत् ॥
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते
मानवो नृप ।
अश्वमेधफलं प्राप्य गच्छेद्भानौ
न संशयः ॥

| | | |
|---|---|---|
| | इदं तु ब्रह्मणा प्रोक्तं धर्मशास्त्र-<br>मनुत्तमम् । | |
| 103. विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः<br>शिष्येभ्यश्च प्रवक्तव्यं सम्यङ् नान्येन केनचित् | 1.1.71*cd*-72*ab* identical; only *c* °भ्यश्चैव व°; *d* चातुर्वर्ण्येभ्य एव हि<br>BhP adds 1.1.72*cd*/*ef*-74 reading:<br>अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना ।<br>श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचन ॥<br>देवार्चां पुरतः कृत्वा ब्राह्मणैश्च नृपोत्तम ।<br>श्रोतव्यमेव शूद्रैश्च तथान्यैश्च द्विजातिभिः ॥<br>श्रौतं स्मार्तं हि वै धर्मं प्रोक्तमस्मिन्नृपोत्तम ।<br>तस्माच्छूद्रैर्विना विप्रान्न श्रोतव्यं कथंचन ॥ | Also in Mit *ad* Y. 1.3, VīrS 512, SC-Saṁskāra 10. |
| 104. इदं शास्त्रमधीयानो ब्राह्मणः शंसितव्रतः<br>मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते | 1.1.75 identical; only *d* लिम्पते | Also in SC-Saṁskāra 10. |

| | | |
|---|---|---|
| | BhP adds 1.1.76-7 reading: श्रृण्वन्ति चापि ये राजन् भक्त्या वै ब्राह्मणादयः । मुच्यन्ते पातकैः सर्वैर्गच्छन्ति च दिवं प्रभो ॥ श्रावयेच्चापि यो विप्रः सर्वान्वर्णान्नृपोत्तम । स गुरुः प्रोच्यते तात वर्णानामिह सर्वशः ॥ | |
| 105. पुनाति पङ्क्तिं वंश्यांश्च सप्त सप्त परावरान् पृथिवीमपि चैवेमां कृत्स्नामेकोऽपि सोऽर्हति | 1.1.78 *ab* reads स पूज्यः सर्वकालेषु सर्वैर्वर्णैर्नराधिप; *c* पृथिवींच तथैवेमां; *d* identical | |
| 106. इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम् इदं यशस्यं सततमिदं निःश्रेयसं परम् | 1.1.79 identical | Cf. Mn. 12.128. Also in SMS 5927. (Jn) has *c* इदं य० स० इ० (hypermetric) |
| 107. अस्मिन्धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः | 1.1.80 identical; only *d* °श्चापि | |
| 108. आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः | 1.1.81 identical; only *a* प्रथमो [प°]; *b* °क्तश्च नरोत्तम; *c* समायुक्तो | Cf. Vās. 6.1. Also in SMS 4426, MM 11-2. Cf. Mn 2.12. |
| 109. आचाराद्विच्युतो विप्रो न वेदफलमश्नुते आचारेण तु संयुक्तः संपूर्णफलभाक् स्मृतः | 1.1.82 identical; only *c* च [तु] | Cf. Vās. 6.3-5. Also in SMS 4438, SS (OJ) 260, MM 11-2. |

| | | |
|---|---|---|
| 110. एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम्<br>सर्वस्य तपसो मूलमाचारं जगृहुः परम् | 1.1.83 identical<br><br>BhP adds 1.1.84+85*ab* reading:<br>अन्ये च मानवा राजन्नाचारं संश्रिताः सदा ।<br>एवमस्मिन् पुराणे तु आचारस्य तु कीर्तनम् ॥<br>वृत्तान्तानि च राजेन्द्र तथा चोक्तानि पण्डितैः । | Also in MM 11-2, SMS 8100. |
| 111. जगतश्च समुत्पत्तिं संस्कारविधिमेव च<br>व्रतचर्योपचारं च स्नानस्य च परं विधिम् | BhP has instead 1.1.85*cd*/*eg*. 86 (cf. *ab*, *cf*):<br>त्रिलोक्यास्तु समुत्पत्तिः संस्कारविधिरुत्तमः ।<br>श्रवणं चेतिहासस्य विधानं कथ्यते नृप ॥<br>तथास्मिन् कथ्यते राजन् माहात्म्यं वाचकस्य तु ।<br>व्रतचर्या श्रमाचाराः स्नातकस्य परो विधिः ॥ | |
| 112. दाराधिगमनं चैव विवाहानां च लक्षणम्<br>महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम् | 1.1.87*ab*+88*ab* identical; only *a* दारादिग°; *c* शास्त्रकल्पं (*sic* !) | |

Iinserted 1.1.87*cd* reads: पुंसां च लक्षणं राजन्योषितां चात्र कथ्यते

113. वृत्तीनां लक्षणं चैव स्नातकस्य व्रतानि च
भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिमेव च

1.1.88*cd*-89*cd* identical; only *a* पृथिव्या [वृ°]; तत [चं°]; *b* देवार्चायाः सुलक्षणम्; *d* °द्धिरेव; inserted verse 89*ab* reads: वृत्तीनां लक्षणं चैवं स्नातकस्य व्रतानि च

114. स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च
राज्ञश्च धर्ममखिलं कार्याणां च विनिर्णयम्

1.1.90 identical; only *a* °योगस्ता°; *b* °न्यास एव; *c* धर्मो ह्यखिलं; *d* °र्णयः Then BhP adds 1.1.91-2 reading:

माहात्म्यं सवितुश्चात्र तीर्थानां च विशांपते ।
नारायणस्य माहात्म्यं तथा रुद्रस्य कथ्यते ॥
महाभाग्यं च विप्राणां माहात्म्यं पुस्तकस्य च ।
दुर्गादेव्यास्तथा चोक्तं सत्यस्य च महामते ॥

| | | |
|---|---|---|
| 115. साक्षिप्रश्नविधानं च धर्मं स्त्रीपुंसयोरपि<br>विभागधर्मं द्यूतं च कण्टकानां च शोधनम् | 1.1.93 identical; only *a* सक्षिप्त सवि°; *c* विभागं धर्मंद्यूतं; *d* कथकानां | |
| 116. वैश्यशूद्रोपचारं च संकीर्णानां च संभवम्<br>आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा | 1 1.94 identical<br>Then BhP adds 1.1.95+96*ab* reading:<br>संध्याविधिं प्रेतशुद्धिं स्नान-<br>तर्पणयोर्विधिम् ।<br>वैश्वदेवविधिं चापि तथा<br>भोज्यविधिं नृप ॥<br>लक्षणं दन्तकाष्ठस्य च रणव्यूह-<br>मुत्तमम् । | |
| 117. संसारगमनं चैव त्रिविधं कर्मसंभवम्<br>निःश्रेयसं कर्मणां च गुणदोषपरीक्षणम् | 1.1.96*cd*+97*ab* identical; only *c* नैः श्रे°<br>Then BhP adds 1.1.97*cd*-98 *ab* reading:<br>दाराणां लक्षणं प्रोक्त तथा<br>पात्रपरीक्षणम् ॥<br>प्रसूतिं चापि गर्भस्य तथा कर्म-<br>फलं नृप । | Cf. MM 12.51 sqq. |
| 118. देशधर्माञ्जातिधर्मान् कुलधर्मांश्च शाश्वतान्<br>पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान् मनुः | BhP. 1.1.98*cd*-99*ab* reads instead:<br>जातिधर्मान्कुलधर्मान् वेदधर्मांश्च<br>पार्थिव ॥ | |

वैतानव्रतिकानां च तथासौ प्रोक्तवान्विभुः ।

Then BhP adds 1.1.99*cd*-101 reading

ब्रह्मा कुरुकुलश्रेष्ठ शंकराय महात्मने ॥
शंकरेण तथा विष्णोः कथितं कुरुनन्दन ।
विष्णुनापि पुनः प्रोक्तं नारदाय महीपते ॥
नारदात्प्राप्तवाञ्छक्रः शक्रादपि पराशरः ।
पराशरात्ततो व्यासो व्यासादपि मया विभो ॥

119. यथेदमुक्तवाञ्छास्त्रं पुरा पृष्टो मनुर्मया
तथेदं यूयमप्यद्य मत्सकाशान्निबोधत ॥

BhP 1.1.102 reads instead:

एवं परंपराप्राप्तं पुराणमिदमुत्तमम् ।
शृणु त्वमपि राजेन्द्र मत्सकाशात्परं हितम्

BhP ends the chapter with the following verses 103-106.

सर्वाण्येव पुराणानि संज्ञेयानि
नरर्षभ ।
द्वादशैव सहस्राणि प्रोक्तानिह
मनीषिभिः ।।
पुनर्वृद्धि गतानीह आख्यानैर्वि-
विधैर्नृप ।
यथा स्कान्दं तथा चेदं भविष्यं
कुरुनन्दन ।।
स्कान्दं शतसहस्रं तु लोकानां
ज्ञातमेव हि ।
भविष्यमेतदृषिणा लक्षार्द्धं
संख्यया कृतम् ।।
तच्छ्रुत्वा पुरुषो भक्त्या इदं
फलमवाप्नुयात् ।
ऋद्धिर्वृद्धिस्तथा श्रीश्च भवन्ति
तस्य निश्चितम् ।।

## APPENDIX I

यक्षभूतपिशाचानां रक्षसां च नृपोत्तम ।
गम्यो भवति वै विप्र उच्छिष्टो नात्र संशयः ।। १.३.५१।।

शुचित्वमाश्रयेत् तस्माच् छु्चित्वान् मोदते दिति (?) ।
सुखेन चेह रमते इतीयं वैदिकी श्रुतिः ।। १.३.५२ ।।

शतानीक उवाच

शुचितामियात् कथं विप्रः कथं चाशुचितामियात् ।
एतन् मे ब्रूहि विप्रेन्द्र कौतुकं परमं मम ।। १.३.५३ ।।

सुमन्तुरुवाच

उपस्पृश्य शुचिर्विप्रो भवते भरतर्षभ ।
विधिवत् कुरुशार्दूल भवेद् विधिपरो ह्यतः ।। १.३.५४ ।।

शतानीक उवाच

उपस्पर्शविधिं विप्र कथय त्वं ममाखिलम् ।
शुचित्वमाप्नुयाद् येन श्राचान्तो ब्राह्मणो द्विज ।। १.३.५५ ।।

सुमन्तुरुवाच

साधु पृष्टोऽस्मि राजेन्द्र शृणु विप्रो यथा भवेत् ।
शुचिर्भरतशार्दूल विधिना येन वा विभो ।। १.३.५६ ।।

for 1.3.57 See Mn. 2.61.

जान्वन्तरे महाबाहो ब्रह्मसूत्रसमन्वितः ।
सुसमौ चरणौ कृत्वा तथा बद्धशिखो नृप ।। १.३.५८ ।।

न तिष्ठन्न च संजल्पंस्तथा चानवलोकयन् ।
न त्वरन्कुपितो वापि त्यक्त्वा राजन् सुदूरतः ।। १.३.५९ ।।

प्रसन्नाभिस्तथाद्भिस्तु आचान्तः शुचितामियात् ।
नोष्णाभिर्न सफेनाभिर्युक्ताभिः कलुषेण च ।। १.३.६० ।।

वर्णेन रसगन्धाभ्यां हीनाभिर्न च भारत ।
सबुद्बुदाभिश्च तथा नाचामेत् पण्डितो नृप ।। १.३.६१।।

## APPENDIX II

प्रथमं यत् पिबेदाप ऋग्वेदस्तेन तृप्यति ।। १.३.७१ ।।

यद् द्वितीयं यजुर्वेदस्तेन प्रीणाति भारत ।
यत्तृतीयं सामवेदस्तेन प्रीणाति भारत ।। १.३.७२ ।।

प्रथमं यन् मृजेदास्यं दक्षिणाङ्गुष्ठमूलतः ।
अथर्ववेदः प्रीणाति तेन राजन्न संशयः ।। १.३.७३ ।।

इतिहासपुराणानि यद्द्वितीयं प्रमार्जति ।
यन्मूर्धानं हि राजेन्द्र अभिषिञ्चति वै द्विजः ।। १.३.७४ ।।

तेन प्रीणाति वै रुद्रं शिखामालभ्य वै ऋषीन्
यदक्षिणी चालभते रविः प्रीणाति तेन वै ।। १.३.७५ ।।

नासिकालम्भनाद्वायुं प्रीणात्येव न संशयः ।
यच्छ्रोत्रमालभेद्विप्रो दिशः प्रीणाति तेन वै ।। १.३.७६ ।।

यमं कुबेरं वरुणं वासवं चाग्निमेव च ।
यद्बाहुमन्वालभते एतान् प्रीणाति तेन वै ।। १.३.७७ ।।

यन्नाभिमन्वालभते प्राणानां ग्रन्थिमेव च ।
तेन प्रीणाति राजेन्द्र इतीयं वैदिकी श्रुतिः ।। १.३.७८ ।।

अभिषिञ्चति यत्पादौ विष्णुं प्रीणाति तेन वै ।
यद्भूम्याच्छादकं वारि विसर्जयति मानद ।। १.३.७९ ।।

वासुकिप्रमुखान्नागांस्तेन प्रीणाति भारत ।
यद्बिन्दवोऽन्तरे भूमौ पतन्तीह नराधिप ।। २.३.८० ।।

भूतग्रामं ततस्तस्तु प्रीणन्तीह चतुर्विधम् ।
अङ्गुष्ठेन प्रदेशिन्या लभेत चाक्षिणी नृप ।। १.३.८१ ।।

अनामिकाङ्गुष्ठिकाभ्यां नासिकामालभेन् नृप ।
मध्यमाङ्गुष्ठाभ्यां मुखं संस्पृशेद् भरतर्षभ ।। १.३.८२ ।।

कनिष्ठिकाङ्गुष्ठकाभ्यां कर्णमालभते नृप ।
अङ्गुलीभिस्तथा बाहुमङ्गुष्ठेन तु मण्डलम् ।। १.३.८३ ।।

नाभिं कुरुकुलश्रेष्ठ शिरः सर्वाभिरेव च ।
अङ्गुष्ठोऽग्निर्महाबाहो प्रोक्तो वायुः प्रदेशिनी ॥ १.३.८४ ॥[1]

अनामिका तथा सूर्यः कनिष्ठा मघवा विभो ।
प्रजापतिर्मध्यमा ज्ञेया तस्माद् भरतसत्तम ॥ १.३.८५ ॥[1]

एवमाचम्य विप्रस्तु प्रीणाति सततं जगत् ।
सर्वाश्च देवतास् तात लोकांश्चापि न संशयः ॥ १.३.८६ ॥

तस्मात् पूज्यः सदा विप्रः सर्वदेवमयो हि सः ।
.......................................................॥ १.३.८७॥ (for Mn. 1.3.87 *cd*-88 *ab* see Mn. 2.58).

---

1. Also in Apar 41 with the following changes : in *d* चन्द्रमाः स्मृतः [म° वि°]; *cf* °मा तु ज्ञेया य° better in Bhaviṣya purāṇa hypermetric.

# APPENDIX III

वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः ।
सर्वे तु वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः ।। १.४.१०३ ।।

नानृग्ब्राह्मणो भवति न वणिङ्न कुशीलवः ।
न शूद्रः प्रेषणं कुर्वन्नस्तेनो न चिकित्सकः ।। १.४.१०४ ।।

अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः ।
तं ग्रामं दण्डयेद्राजा चोरभक्त प्रदो हि सः ।। २.४.१०५ ।।

संतुष्टो यत्र वै विप्रः साग्निकः कुरुनन्दन ।
याति साफल्यतां वेदैर्देवैरेवं हि भाषितम् ।। १.४.१०६ ।।

वेदैरुक्तं यथा वीर सुरज्येष्ठमुपेत्य वै ।
वेपन्ते ब्राह्मणा भूमावभ्यस्यन्ति ह्यनग्निकाः ।
क्लिश्यन्ते ते किमर्थं हि मूढा वै फलकाङ्क्षया ।। १.४.१०७ ।।

अनुष्ठानविहीनानामस्मानभ्यसतां भुवि ।
क्लेशो हि केवलं देव नास्मदभ्यसने फलम् ।।१.४.१०८ ।।

अनुष्ठानं परं देवमस्मत्स्वभ्यसनात्सदा ।
इत्येवं राजशार्दूल वेदा ऊचुर्हि वेधसम् ।
तस्माच्च वेदाभ्यसनादनुष्ठानं परं मतम् ।। १ ४.१०९ ।।

चत्वारो वा त्रयो वापि यद्ब्रूयुर्वेदपारगाः ।
स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ।। १.४.११० ।।

यद्वदन्ति तमोमूढा मूर्खा धर्मजानतः । (?)
तत्पापं शतधा भूत्वा वक्तॄनेवानुगच्छति ।।१.४.१११ ।।

शौचहीने व्रते भ्रष्टे विप्रे वेदविवर्जिते ।
दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतम् ।।१.४.११२ ।।

जपोपजीविने दत्तं यदात्मानं प्रपश्यति ।
नृत्यति स्म तदा राजन्करावुद्धृत्य भारत ।। १.४.११३ ।।

विद्यातपोभ्यां संपन्ने ब्राह्मणे गृहमागते ।
क्रीडन्त्यौषधयः सर्वा यास्यामः परमां गतिम् ।। १.४.११४ ।।

अव्रतानाममन्त्राणामजपानां च भारत ।
प्रतिग्रहो न दातव्यो न शिलातारयेच्छिलाम् ।।१.४.११५।।

श्रोत्रियायैव देयानि हव्यकव्यानि नित्यशः ।
अश्रोत्रियाय दत्तानि न पितॄन्नापि देवताः ॥ १.४.११६ ॥

यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः ।
बहुश्रुताय दातव्यं नास्ति मूर्खव्यतिक्रमः ॥ १.४.११७ ॥ also in PSDh. 1.2,347; identical; only *b* वेदविवर्जिते ।
ब्राह्मणातिक्रमो नास्ति मूर्खे जपविवर्जिते ।
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ १.४.११८ ॥[1]

न चैतदेव मन्यन्ते पितरो देवतास्तथा ।
सगुणं निर्गुणं वापि ब्राह्मणं दैवतं परम् ॥ १.४.११९ ॥

नातिक्रमेद्गृहासीनं ब्राह्मणं विप्रकर्मणि ।
अतिक्रमन्महाबाहो रौरवं याति भारत ॥ १.४.१२० ॥

गायत्रिमात्रसारोऽपि ब्राह्मणः पूज्यतां गतः ।
गृहासन्नो विशेषेण न भवेत् पतितस्तु सः ॥ १.४.२१ ॥

धान्यशून्यो यथा ग्रामो यथा कूपश्च निर्जलः ।
ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः ॥ १.४.१२२ ॥

यस्त्वेकपङ्क्त्यां विषमं ददाति
स्नेहाद्भयाद्वा यदि वार्थहेतोः ।
वेदेषु दृष्टमृषिभिश्च गीतं,
तां ब्रह्महत्यां मुनयो वदन्ति ॥ १.४.१२३ ॥

---

1. Identicaly 1.184. 29; only *b* विप्रे वेदविवर्जिते ।

The '*Purāṇa*' Bulletin has been started by the Purāṇa Department of the All-India Kashiraj Trust with the aim of organising the manifold studies relating to the Purāṇas. It specially discusses the several aspects of text-reconstruction, of the interpretation of the vast cultural and historical material, and of the obscure esoteric symbolism of legends and myths of the Purāṇas. The editors invite contributions from all those scholars who are interested in the culture of the Purāṇa literature in which the religion and philosophy of the Vedas have found the fullest expression.

---


Statement of ownership and other particulars about

पुराणम्—PURĀṆA

| | | |
|---|---|---|
| 1. | Place of Publication | ... Fort Ramnagar, Varanasi |
| 2. | Periodicity of Publication | ... Half yearly |
| 3. | Printer's Name | ... Rama Shanker |
| | Nationality | ... Indian |
| | Address | ... The Tara Printing Works, Kamachha, Varanasi |
| 4 | Publisher's Name | ... Ramesh Chandra De, General Secretary, All-India Kashiraj Trust |
| | Nationality | ... Indian |
| | Address | ... All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |
| 5. | Editors' Names with Address | ... Rajeshwar Sastri Dravid (Sāṅga-Veda Vidyālaya, Varanasi), V. Raghavan (Madras), L. Sternbach, University of Paris. (Sorbonne), A. S. Gupta ( *Editor-in-Charge* ) ( Purāṇa Deptt., Fort Ramnagar, Varanasi). |
| | Nationality | ... Indian, and Polish (L. Sternbach) |
| 6. | Name of the owner | ... All-India Kashiraj Trust, Fort Ramnagar, Varanasi. |

I, Ramesh Chandra De, hereby declare that the particulars given above are true to the best of my knowledge and belief.

**Ramesh Chandra De**
Publisher.

THE BOARD OF TRUSTEES

OF

THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A., D.Litt.; Fort Ramnagar, Varanasi.—(*Chairman*).

*Trustee nominated by the Govt. of India* :—

1. Dr. Raghunath Singh, M.A., Ph.D., D.Litt., LL.B.; Varanasi.

*Trustees nominated by the Govt. of Uttar Pradesh* :—

3. Panditaraja Rajeshwar Shastri Dravid; Principal, Sangaveda Vidyalaya, Varanasi.

4. Pt. Kamalapati Tripathi; Minister of Shipping and Transport, Govt. of India.

*Trustees nominated by His Highness the Maharaja of Banaras*:—

5. Dr. Suniti Kumar Chatterji, M.A., D. Litt. (London), F. A. S. B., Professor Emeritus of Comparative Philology, University of Calcutta; National Professor in Humanities.

6. Maharaj-kumar Dr. Raghubir Singh, M. A., D. Litt.; Raghubir Niwas, Sitamau (Malwa).

7. Pt. Giridhari Lal Mehta, Varanasi; Managing Director: Jardine Handerson Ltd.; Scindia Steam Navigation Ltd.; Trustee: Vallabhram-Saligram Trust, Calcutta.

## PUBLICATIONS OF THE ALL INDIA KASHIRAJ TRUST

**Critical Editions and Translations**

| | | |
|---|---|---|
| 1. | Vāmana Purāṇa—Edited by Sri A. S. Gupta. | Rs. 125 |
| 2. | Kūrma Purāṇa—Edited by Sri A. S. Gupta. | Rs. 125 |
| 3. | Rāmacaritamānasa—Edited by Acharya Vishwa Nath Prasad Misra. | Rs. 6.50 |
| 4. | Vāmana Purāṇa—Constituted Text with English Translation and Appendices. | Rs. 80 |
| 5. | Vāmana Purāṇa—Constituted Text with Hindi Translation and Appendices. | Rs. 50 |
| 6. | Kūrma Purāṇa—Constituted Text with English Translation and Appendices. | Rs. 80 |
| 7. | Kūrma Purāṇa—Constituted Text with Hindi Translation and Appendices. | Rs. 50 |
| 8. | Devīmāhātmya—Text with English Translation and annotation. By Dr. V. S. Agrawala. | Rs. 10 |
| 9. | Svargakhaṇḍa of the Padma Purāṇa—edited by Dr. Asoke Chatterjee | Rs. 40 |

**Studies**

| | | |
|---|---|---|
| 1. | Garuḍa Purāṇa—A Study. By Sri N. Gangadharan | Rs. 40 |
| 2. | Matsya Purāṇa—A Study. By Dr. V. S. Agrawala | Rs. 30 |
| 3. | Nārada Purāṇa—A Study. By Dr. K. Damodaran Nambiar | (In the Press) |
| 4. | Nīti-Section of Purāṇārthasaṁgraha—By Dr. V. Raghavan | Rs. 2 |
| 5. | Vyāsa-Praśasti [ व्यासप्रशस्तिः ]—Compiled and edited By Dr. V. Raghavan | Re. 1 |
| 6. | Greater Rāmāyaṇa—By Dr. V. Raghavan | Rs. 30 |
| 7. | Viṣṇupurāṇa Viṣayānukramaṇī [ विष्णुपुराण-विषयानुक्रमणी ]—By Pt. Madhvacarya Adya | Rs. 5 |
| 8. | Bṛhaspati-Saṁhitā of the Garuḍa Purāṇa—By Dr. L. Sternbach | Rs. 10 |
| 9. | Mānavadharmaśāstra and Bhaviṣya Purāṇa—By Dr. L. Sternbach | Rs. 20 |

**Journal**

Purāṇam—Half Yearly Research Journal dealing with the various aspects of the Purāṇas.
Annual Subscription Rs. 18, £ 1.50